श्री :

# ॥ कथाशतकम् ॥

## 100 POPULAR STORIES

*TRANSLATED FROM VERNACULAR ORIGINALS*

BY THE LATE

S. VENKATARAMA SASTRI, B.A.,

MAHARAJA'S COLLEGE, MYSORE.

---

APPROVED AS A TEXT BOOK

BY THE

INSPECTOR GENERAL OF EDUCATION
IN MYSORE

AND THE

DIRECTOR OF PUBLIC INSTRUCTION,
MADRAS PRESIDENCY

AND

# ॥ भारती श्लोकत्रिशती ॥

## 300 SLOKAS FROM MAHABHARATA

---

Price Eight Annas.

PRINTED AT THE MODERN PRINTING WORKS,
MOUNT ROAD, MADRAS.

SEVENTH EDITION—4000 Copies.



# PREFACE.

This little book is designed as a reader in Sanskrit prose and verse for beginners. It is written in a very simple style, compounds of more than two words being conspicuously absent. It is accordingly expected to find favor with the little folks in the Third and Fourth Forms of Middle and High schools.

The book consists of two parts:—Part I, called Kathasataka, is a collection of one hundred moral and amusing stories in prose; Part II, entitled Bharati Slokatrisati, contains three hundred slokas from the Mahabharata giving rules of life by which happiness both here and hereafter may be attained.

The book, though carefully revised, is not altogether free from imperfections; all suggestions in regard to rectifying them will be most thankfully received.

6TH JANUARY 1898.
*Maharaja's Sanskrit College, Mysore.*

S. VENKATARAMA SASTRI.

# INSTRUCTION POSSIBLY INTENDED TO BE CONVEYED BY THE STORIES OF KATHASATAKA.

STORY.

1. Kindness is lost upon the wicked.
2. We should not attempt impossibilities.
3. Wanton cruelty should be avoided.
4. Learning leads to happiness.
5. In trying to seize what belongs to others we lose what is our own.
6 Fortune favours the brave.
7. The base retain their baseness even when exalted.
8. Nature never fails to assert itself.
9. Liars are not believed.
10. We should not keep bad company.
11. It is risky to befriend an enemy.
12. No person however strong can afford to war with a whole community.
13. Imprudent people soon come to grief.
14. Avarice invariably leads to loss.
15. Genius is often discerned in the child.
16. Better to be a master of at least one art than to know many indifferently.
17. Advice offered unasked to peevish people serves but to anger them.

Silly people are found to err ceaselessly.

18. Undiscerning masters cannot apply the rod unerringly.

19. Rashness has to be rued.

20. Sound and seasonable advice succeeds.

21. The truthful are esteemed by all.

22. The predictions of professional astrologers do not command respect.

23. Gratitude has short memory.

24. The robber robbed: The wily outwitted.

25. High merit has often sprung from obscurity.

26. Masters mar their own good name when they trust their servants too much.

27. A beneficent administration brings its own reward.

28. Castle-building ends in a catastrophe.

29. Grief comes to him who brags the most.

30. A foolish judge is easily confounded.

31. Man proposes and God disposes.

32. Judges have to be astute. Sagacity, the saving merit in a judge.

33. Conscience makes cowards of us all.

34. Out of the frying pan into the fire.

35. Necessity is the mother of invention.

36. One ought not to meddle with other people's affairs.

37. Put the right man in the right place.

38. God rewards each one according to his deserts.



40. Any person who purposes doing evil to others, has to suffer it himself.

41. The credulous are befooled.

42. We learn to be humble as soon as we are divested of our self-conceit.

43. We displease our friends when we inaptly interest ourselves in their affairs.

44. There have been wise ministers who successfully reclaimed their sovereigns from their reprehensible courses by artful innuendoes.

45. A strong foe is overcome by a statagem.

46. The crafty have to be met by craft.

47. People under an evil star fare ill in all they undertake.

48. The unwise ought not to be put in high places.

49. A deposit can be restored to the depositors only when they claim it conjointly.

50. The evil sought to be done to another often recoils upon the doer.

51. Fate cannot be altered.

52. An apostate can never prosper.

53. Several rogues leagued together outwit a wise man.

54. The crafty are often deceived.

55. It is very risky to approach a king when surrounded by evil councillors.

56. It is a great blessing for a king to have a loyal minister.

57. No one that despises the counsels of well-wishing friends can get on well.
58. One ought not to be beguiled by the insidious words of a foe.
59. We can gain our ends when we adopt the proper means.
60. Noble servants would risk their own life to save their master's.
61. Prescience and presence of mind help people to tide over dangers far and near, while procrastination brings inevitable ruin in its train.
62. Generous people would freely give up their life to save that of a fellow creature.
63. Even things of intrinsic excellence are not prized by people when of no service to them.
64. Those that put their trust in God are never forsaken.
65. A prodigal dies of want.
66. People who are resourceful and persevering are seen to succeed ultimately.
67. The envious can never be happy.
68. A person's character is affected for good or for evil by his early training and associations.
69. Diligence is the mother of good luck.
70. Calumny is an unfailing weapon. The very best men fall victims to it.
71. Knaves impose upon people by plausible falsehoods.



72. When fear gets the better of our judgment, we cannot take a proper measure of the danger threatening us.
73. A learned man is sometimes overcome by a repartee.
74. A grasping man loses what he can otherwise get.
75. You cannot expect fair treatment so long as you do not treat others fairly.
76. Silence is golden.
77. Authority is brought into contempt when evil-doers are not adequately punished.
78. Judges worthy to be ranked with Justices Jeffreys of Bloody Assizes fame in English History.
79. When people that ought to be friends fight and go to court, the decision that is there given pleases neither party.
80. We are often rebuked and deservedly too by those that we regard as our inferiors.
81. What cannot be cured must be endured.
82. When we profess to know much more than we do, we often expose our ignorance and are deservedly laughed at.
83. Can folly go farther?
84. People prone to primitive ways cut a sorry figure when they would resort to civilised appliances without understanding their use.
85. An accuser often has to play the part of the accused.

86. A witness sometimes proves more than a match for the lawyer that would nonplus him.
87. A lawyer is often found out when he over-does his game.
88. A word to the wise will always suffice. Work while it is called to-day : you know not how much you may be hindered to-morrow.
89. It is a disputed point whether school-boys are as ingenuous as they seem.
90. Very few people are proof against the blinding effects of prosperity.
91. I made a hundred people run.
92 The King spoke to me.
93. Half the marriage is settled already.
94. It is Brahmanas that can do justice to a feast.
95. One hyperbole is matched by another.
96. Give him but an inch, he will go in for an ell.
97. Are not comparisons odious ?
98. Sauciness is soon subdued.
99. Professors of divers religions preach only partial truths.
100. Gambling is a great temptation and should be given up.

---



# ॥ भारती श्लोकत्रिशती ॥

SLOKA.

1. Parental admonition
2. Virtue elevates, vice depresses.
3, Every man, the architect of his own fortune.
4-8. Hospitality, a duty.
9-44. Work, good or bad, bears its own fruit. Industry and well-doing recommended.
45. Avarice grows with age.
46-47. Duty towards parents and preceptors.
48-56½. Fidelity to promise, a duty.
57-59. Relief of distress, meritorious.
60-67. Who go to Hell ?
68-82. Who go to Heaven ?
83-93. Greatness of a Brahmana and how one is to behave towards such a one.
94-97. On the Treatment of Women
98. Who should be respected and who not.
99. Characteristics of base birth.
100-106. The value of cows.

---

शुभमस्तु ।

# कथाशतकम् ॥

---

## कथा १.

काश्चित्पुरुषः कंचिद्वृश्चिकम् अग्नौ पतन्तं दृष्ट्वा "अस्य रक्षणेन मम पुण्यं भविष्यति" इति मत्वा तं पतनाद्वारयन् दधार । स वृश्चिकः तमुपकारमविमृशन्नेव पुरुषस्य हस्तमदशत् । तेन पुरुषः महतीं व्यथामन्वभवत् । अतो दुष्टस्य उपकारो न कार्यः ॥

## कथा २.

कस्यचित् शूद्रस्य वशे कृष्णः कुक्कुरः आसीत् । सः "इमं कुक्कुरं श्वेतं करिष्यामि" इति नदीं नीत्वा तं बहून् दिवसान् जलेन क्षालयन्नासीत् । तथाऽपि कुक्कुरः श्वेतो नैव बभूव । अतः असाध्यं साधयितुं न यतेत ॥

## कथा ३.

एकस्मिन्दिने केचन बालकाः तटाकस्य तीरे क्रीडन्तः तटाके स्थितान्भेकान्दृष्ट्वा तेषु अश्मनः प्रक्षेप्तुमारभन्त । तदा भेकानाम् एकतमः बालकानालोक्य उवाच । "भो बालकाः अस्मासु अश्मनां क्षेपणं युष्माकं क्रीडा संवृत्ता । तेन अस्माकं प्राणा नश्यन्ति" इति ॥

## कथा ४.

काश्याम् एको विद्वान् आसीत् । तस्य द्वौ कुमारौ आस्ताम् । सः ज्यायसे पुत्राय सर्वं धनं दत्वा कनीयांसं पुत्रं सम्यक् विद्याः अशिक्षयत् । ज्यायान् कतिपयैरेव दिवसैः धनं सर्वं व्ययित्वा दरिद्रो बभूव । कनीयान् स्वपाण्डित्येन बहु धनं संपाद्य सुखेन अवर्तत । अतः विद्यावान् सुखं लभते ॥

## कथा ५.

कस्यचित् कूपस्य प्रान्ते आसित्वा आम्रं भक्षयन् एको मर्कटः यावत् अवनम्य कूपस्य अन्तः अवलोकयति, तावत् जले तस्य च्छाया आविरासीत् । अन्यश्च मर्कटः अन्तर्जले आम्रं भक्षयन्निव आसीत् । 'तं भाययित्वा तत्फलं गृह्णानि' इति मत्वा उच्चैरशब्दयत् । तदानीं तस्य मुखात् फलं कूपे पतित्वा न्यमज्जत् । तेन मर्कटः दुःखितः अभवत् । अतः यदा परकीयं गृध्येम तदा स्वीयमपि नाशयेम ॥

## कथा ६.

आसीत्कश्चिद्बालकः- स एकमारामं गत्वा तत्र एकस्मिन्नाम्रे मनोहरं फलं दृष्ट्वा तदपचेतुम् ऐच्छत् । परंतु तं वृक्षं परितः बहवः कण्टकिनो गुल्माः आसन् । तेभ्यः कण्टकेभ्यो भीत्वा फलमनपचित्यैव गृहं ययौ । तदा अन्यो बालकः तत् फलं दृष्ट्वा परिगतेभ्यः कण्टकिभ्यः गुल्मेभ्यः अभीत्वा वृक्षमारुह्य फलमपचित्य भक्षयामास । अतो धैर्यवतो भाग्यमुपैति ॥



## कथा ७.

कश्चित् स्तेनः कस्य चित् नगरस्य राजा बभूव । तस्य अन्तिकं कश्चित् कविवरः आगत्य तमधिकृत्य कानिचित् पद्यानि पठित्वा "मह्यं यां कांचित् संभावनां देहि" इति ययाचे । ततः स राजा पार्श्वे स्थितान् आलोक्य "अस्य कविवरस्य देहे वर्तमानानि सर्वाणि वस्त्राणि अपनीय एनं विद्रावयत" इति आदिशत् । ते तथैव तस्य सर्वाणि वस्त्राणि अवलुप्य तं निरवासयन् । अतः नीचः महत्पदं प्राप्तोऽपि स्वीयां दुःशीलतां न त्यजति॥

## कथा ८.

राजा कश्चित् निम्बबीजमेकमानाय्य स्वनगर्यां शर्करया आलवालं विरचय्य तत्र तन्निचखान । यावत्प्ररोहः आविर्भूय महान् भवति तावत् तं क्षीरेण सिञ्चन् अवर्धयत् । प्रवृद्धे च तस्मिन् पुष्पाणि फलानि च प्रभूतानि आविरभवन् । स राजा तानि फलानि अतीव मधुराणि भवितुमर्हन्तीति मत्वा एकं फलम् आनाय्य आत्मनः मुखे न्यक्षिपत् । तत्तु भृशं कटु आसीत् । नैव मधुरम् । अतः दुर्जनः बाल्यात्प्रभृति सज्जनैः सह वसन्नपि आत्मनः दुर्गुणं न त्यजति ॥

## कथा ९.

एकस्मिन् ग्रामे एकः ब्राह्मणः आसीत् । तस्य एकः कुमारो बभूव । तस्मिन् पुत्रेण सह एकं ग्रामं प्रति गच्छति मार्गे स बालकः 'आर्य व्याघ्र आगत' इति हेलयाऽक्रोशत् । तदा यावत्

पिता परावृत्य पश्यति तावत् व्याघ्रो नाऽऽसीत् । ततः भूयः कियच्चिद्दूरं गतयोः तयोः व्याघ्रः आगत्य बालकं जग्राह । तदा 'व्याघ्र आगत' इति अक्रोशत् । 'पूर्वमिव अधुनाऽपि हेलया क्रोशति' इति मत्वा पिता अपरावृत्य अगच्छत् । येन पुत्रो व्यपद्यत । अतः मृषाभाषिणां वचनं न कोऽपि श्रद्धत्ते (प्रत्येति) ॥

**कथा १०.**

एकस्मिन्दिने द्वौ बालकौ कंचिदाराममगच्छताम् । तयोरेकतरः वृक्षे कस्मिंश्चित् चारूणि फलानि दृष्ट्वा तान्यादातुमैच्छत् । तदा अन्यतरः "फलानि माऽऽदिथाः आरामपालो यदि पश्येत् प्रहरिष्यति" इति अब्रवत् । परंतु सः तस्य वचनमनादृत्य वृक्षमारुह्य फलं गृहीत्वा अवातरत् । एतस्मिन्नन्तरे आरामपालः आगत्य "एतानि फलानि किमिति अग्रहीः" इति पृच्छन् तं जग्राह । तदा स बालकः "नाहम् एतदग्रहीषम् एषः अवचित्य मम हस्ते प्रायच्छत्" इति आत्मानं अकार्यात् विरन्तुम् उपदिष्टवन्तं सुहृदं निरदिशत् । सः आरामपालः तं गृहीत्वा अदण्डयत् । अतः दुष्टैः सह अवस्थितिः न कार्या ॥

**कथा ११.**

कश्चिच्छूद्रः एकं परशुं निर्माप्य तस्य सदृशो दण्डः संपादयितव्य इति मनसि कृत्वा अटवीं गत्वा तत्रत्येषु वृक्षेषु कतमा शाखा अनुरूपेति यदा निरूपयति तदा चिञ्चावृक्षः कश्चित् तम् आलोक्य किमपेक्ष्यते त्वयेति पप्रच्छ । बाहुमात्रो यदि



दण्डो लभ्यते तदा तेनैव मे अर्थः सिध्यति इति स उवाच । किं तव अपेक्षितमियदेवेति ब्रुवन् स तरुः आत्मनः शाखासु एकतमां तस्मै ददौ । ततः स तां तक्षित्वा परशुना संयोज्य तमेव चिञ्चावृक्षम् अटवीस्थान् शिष्टांश्च तरून् छित्वा विक्रेतुमारभत । अतः शत्रोरुपकारकरणेन जात्वपकार एव घटते ॥

**कथा १२.**

कस्यांचिदटव्यां व्याघ्रः कश्चिदासीत् । स तत्रत्यान् मृगानवधीर्य दृष्टमात्रानेव तान् बाधमान आसीत् । एवं स्थिते कस्मिंश्चिद्दिवसे स व्याघ्रः उक्षाणमेकं दृष्ट्वा तमास्कन्दन् दैवाल्लक्ष्यमप्राप्य परेणोक्षाणं गभीरे गर्ते पपात । तदा सर्वे मृगाः पतितं व्याघ्रं दृष्ट्वा मिलिताः मन्त्रयामासुः । "अस्मिन्नेव समये वयं यदीमं न हन्याम पुनरेष बाधेतास्मान् । तदस्मिन्नेव क्षणे वयमेनं हन्तुमर्हामः" इति निश्चित्य प्रत्येकमश्मानमेकं गृहीत्वा व्याघ्रस्योपर्यपातयन् । ततो गर्ते पूर्णे व्याघ्रो ममार । तन्महाबलोऽहमिति बहुभिः सह न कोऽपि विरोधं कुर्यात् ॥

**कथा १३.**

हस्तिनापुरे विलासनाम्नो रजकस्य वशे गर्दभ एक आसीत् । स भारमूढ्वोढ्वा दुर्बलो भूत्वा उत्थातुमप्यक्षमः शिश्ये । तदा स रजकः व्याघ्रचर्मणा तं प्रावार्य सस्यक्षेत्रे अचारयत् । तत्रत्याः सर्वेऽपि जनाः तं दृष्ट्वा व्याघ्रोऽयमिति भिया पलायामासुः । कस्माच्चित्कालात्परं तस्य क्षेत्रस्य पालकः "चेष्टाभिरयं व्याघ्रो न

लक्ष्यते तथाऽपि परीक्षे" इति सङ्कल्प्य आत्मानं गर्दभचर्मणा प्रावार्य तत्स्थानमासीदत्। एष गर्दभस्तं दृष्ट्वा गर्दभीति बुद्ध्या रुवन् तदन्तिकमभ्यधावत्। क्षेत्रपालः शब्देन गर्दभोऽयमिति बुद्ध्वा तं व्यापादयामास। एवमविवेकिनः स्वयमेव नाशं प्राप्नुवन्ति॥

**कथा १४.**

कस्यचिच्छूद्रस्य वशे एका महिषी आसीत्। सा प्रत्यहं प्रस्थं दुग्धं ददौ। स तद्दुग्धं पणाभ्यां द्वाभ्यां विक्रीय लब्धेन मूल्येन जीविकां कुर्वन् वर्तते स्म। एवं विद्यमाने स एकस्मिन् दिने समचिन्तयत् 'एतया दीयमानस्य पयसो विक्रयेण पणद्वयमेव लभ्यते। नाहमेतेन धनी भवेयं तदस्या ऊधः (आपीनं) छित्वा अन्तःस्थं सर्वं पयः एकपद एव यद्यहं विक्रीणीय प्रभूतं मे भाग्यं भविष्यति' इति। अथ स यावदस्या ऊधः छित्त्वा पश्यति तावत्तदन्तः रक्तं मांसं च विना नान्यत्किंचिदासीत्। ततः सः आत्मनो जीवनप्रदा महिषी मृतेति भृशं शुशोच। एवमधिगतादधिकं यदि गृध्यते अधिगतस्याप्यपायो भवति॥

**कथा १५.**

काञ्चीपुरे कश्चिद्विद्वानभवत्। सः बहूनां बालकानां पाठप्रवचनेन जीवनं कुर्वन्नासीत् एकस्मिन्दिने तस्य अन्तिकम् एकः बालः एत्य 'आर्य मम विद्या अधिगन्तव्येति आशा भूयसी वर्तते। तद्भवान् मां विद्याम् अध्यापयितुमर्हति' इति प्रार्थयामास। स विद्वान् अस्य बालकस्य बुद्धिं पश्यामेति मनसि कृत्वा



'अरे देवः क्वास्ति' इति पप्रच्छ। ततः स बालः "देवो यत्र नास्ति तद्भवान् प्रथमतः वक्तु (प्रसद्य ब्रवीतु) ततः परम् अहमावेदयामि" इति उवाच। सः विद्वान् तस्य बालकस्य वचनेन अयं बुद्धिमानिति अवधार्य तत्प्रार्थनामनुरुध्य तं विद्यां सम्यक् अध्यापयत्। एवं बुद्धिमतां बुद्धिः पूर्वे एव वयसि प्रकाश्यते॥

**कथा १६.**

एकस्मिन्दिने मार्जारी जम्बुकश्च इति उभौ मिलित्वा संलपन्तौ आस्ताम्। तदा जम्बुकः मार्जारीम् अवलोक्य "भोः मार्जारि, यदि या काचिदापदापतेत् तस्याः आत्मानं मोचयितुं कत्युपायान् त्वं शिक्षितवती" इति अपृच्छत्। मार्जारी प्रत्यवदत्। "मम एक एव उपायः विदितः। आपतिताः सर्वा अप्यापदः तेनैकेनैवोपायेन तीर्णवत्यस्मि"। एवं ब्रुवतीं तां जम्बुकः हसन् "किं तव इयदेव विदितं मम विदितान् सर्वानुपायान् न खलु त्वं ज्ञातुं पारयसि" इत्युक्त्वा अवामन्यत। एवं सति कुतश्चिद्दिशः विश्वकद्रवः तेन मार्गेण आगच्छन्। कुक्कुरानालोक्य मार्जारी तत्रत्यं वृक्षमेकं आरुरोह। जम्बुकः वृक्षमारोढुं अपारयन् उपायमन्यं चाप्रतिपद्यमानः शुनां वशं प्राप्य ममार। अतः एकामपि विद्यां सम्यक् शिक्षितवान् सुखमश्नुते॥

**कथा १७.**

गोदावर्यास्तीरे एको न्यग्रोधपादप आसीत्। तस्मिन्वृक्षे शुका नीडान्निर्माय तेषु आत्मनः अपत्यानि वर्धयन्तः चिराय

न्यवसन् । एवं वर्तमाने कार्तिके मासि एकस्मिन्वासरे प्रभूता वृष्टिः समजायत । तदा तस्या नद्यास्तीरे स्थिताः सर्वे कपयः शीतमसहमाना यदा तरुमूलमगच्छन् तदा तस्य तरोरुपरि नीडस्थाः शुका एतान् कपीनवलोक्य ऊचुः । "देवे युष्मभ्यं पाणिपादं दत्तवति एकमावासं निर्माय तत्र सुखेन वासमकुर्वन्तः किमित्यस्यां वृष्ट्याम आर्द्रीभवन्तस्तिष्ठथ, इतःपरं तावत् शृणुत नो वंचनम् । विरतायामस्यां वृष्ट्याम् आवासमेकं कल्पयत" इति । तदा कपयः सर्वे "परिहसन्त्यस्मानिमे शुकाः" इति मत्वा विरतमात्रायामेव वृष्ट्यां वृक्षं तमारुह्य शुकनीडान्विमर्द्य तत्रत्यान् शुकशावकान्नाशयामासुः । एवं मूर्खाणामुपदेशः प्रकोपाय भवति उपदेष्टुश्च अरिष्टे पर्यवस्यति ॥

## कथा १८.

एकस्मिन् ग्रामे द्वौ बालकौ आस्ताम् । तयोरेकतरो बुद्धिमान्, अपरो मूढः एकस्मिन्दिने आराममेकं गच्छन्तावुभौ पक्वं नारिकेलमेकमध्यगच्छताम् । स बुद्धिमान् तत्फलं भङ्क्त्वा अन्तःस्थं सर्वमपि भक्षयित्वा बाह्यां पुटं तस्मै मूढाय ददौ । स पुटं खण्डशः कृत्वा शकलमेकं यावदात्मनो मुखे प्रक्षिपति तावत्तदश्मतुल्यं कठिनमासीत् । तदा सः अचिन्तयत् । "अहो वञ्चितोऽस्मि सख्या यदीतःपरं यदा कदाऽपि एवं प्रसज्यते तत्कृतं प्रतिकर्तुमर्हामि" इति । कतिपयेभ्यो दिवसेभ्यः परम् उभाभ्यामाम्रमेकमलभ्यत । तदा मूढः पुरा सख्या आत्मने



यत्कृतं तत् प्रतिकर्तव्यमिति मन्वानः बुद्धिमन्तं बालकं सम्बोध्य "अन्तःस्थं मह्यं दत्वा बहिःस्थं सर्वं त्वमशान" इति अवदत् । एवमुक्तो बुद्धिमान् संतोषेण तथेति प्रतिपद्य फलस्य बहिःस्थं सर्वं भागं भक्षयित्वा सकवचामष्ठीलां तस्मै मूढाय ददौ । एवं बुद्धिहीनाः भूयो भूयः अतिसंधीयन्ते ॥

## कथा १९.

ग्रामे कस्मिंश्चित् शूद्र एको बभूव । स एकं मर्कटमजञ्च यत्नेन वर्धयन्नासीत् । एवं सति कार्यं किंचित् तमुपानमत् । (यस्य कृते सः ग्राममन्यं गन्तुमैच्छत्) येन तस्य ग्रामान्तरं गन्तव्यमासीत् । सः दध्योदनं पाथेयं वस्त्रे अपिनह्य अजं कपिं च आदाय गच्छन् मार्गे कञ्चित्तटाकमाससाद । तत्र निविश्य अजं कपिं च आसन्ने तरौ कस्मिंश्चित् बध्वा तयोरेव समीपे दध्योदनस्य भारं निक्षिप्य सरस्तीरमगच्छत् । तत्र दन्तान्धावयित्वा शुद्धं वस्त्रं च धृत्वा यावन्न न्यवर्त्तते तावदेव स मर्कटः सर्वं दध्योदनमशित्वा स्वहस्ते लग्नेन दध्ना अजस्यास्यं विलिप्य वृत्तं किमप्यजानन्निव दूर आसीनोऽभवत् । शूद्रश्च यदा सरसो निवृत्य पश्यति तदा अन्नस्य कणोऽप्येको नादृश्यत । अजस्य केवलं मुखे दधि लग्नमासीत् । ततः सः "मया अशनार्थं निक्षिप्तमन्नमशेषम् अयं भक्षितवान्" इति महता कोपेन अजं प्राहरत् । एवमविवेकिनः प्रभवो न्याय्यमन्याय्यं च न विमृशन्ति ॥

**कथा २०.**

पलनाडुदेशे शूद्र एको बभूव। तस्य वशे नकुल एको बभूव। स तं प्रेम्णा पोषयन्नासीत्। कार्यवशात् ग्रामान्तरं प्रति गमने उपस्थिते स तमात्मनो भार्याया हस्ते निक्षिप्य प्रतस्थे। परेद्यवि सा आत्मनः शिशुं डोलायां स्वापयित्वा नकुलं च डोलायाः समीपे निवेश्य जलमानेतुं सरसस्तीरं जगाम। एतस्मिन्नन्तरे शिशुना अधिशयितां डोलां तां सर्प एक आजगाम। स नकुलः सर्पं तमास्कन्द्य खण्डशः कृत्वा प्रास्य वृत्तान्तमिमं स्वामिनीमावेदयितुमिच्छन् रक्तालितेन मुखेन तस्याः स्त्रिया अभिमुखं जगाम। सा नकुलस्य तमाकारं दृष्ट्वा अयं मे पुत्रं दष्ट्वा मारितवानिति निश्चित्य दुःखिता महता कोपेन तमश्मखण्डेनैकेन प्रहृत्य व्यापादयामास। तदनु गृहं गत्वा डोलायां सुखेन स्वपन्तं शिशुं तस्य समीपे खण्डशो विदार्य पातितं सर्पं च यदा पश्यति तदा सा "हा धिगातिपापां मां यदहं सुतस्य प्राणान् रक्षितवन्तं नकुलम् अविचार्य हतवत्यस्मि" इति क्रोशन्ती भृशमशोचत्॥

**कथा २१.**

उज्जयनीपत्तने सुदर्शनो नाम राजा असीत्। तस्य एकः कुमारो बभूव। सः यान् यान् पश्यति तांस्तानवगुरमाणः विदुषः परिहसन् दीनाम् हिंसन् उत्पथेषु बहुषु प्रवर्त्तमानश्चासीत्। राजा आत्मनः पुत्र एवं जनहिंसकः संपृत्त इति चिन्ताकुलः एकदा पुत्रं गृहं आनाय्य आत्मनः समीपे उपवेश्य एवं तमबोधयत्। "यत्त्वं विद्वदादीनवमंन्यसे तेन तवैव महत्पापं संभवति विद्वदादीनान्तु न काऽपि तेन हानिः अस्य दृष्टान्तमेकं वच्मि। आकाशे मध्याह्नवेलायां प्रकाशमानं सूर्यं दृष्ट्वा यः कश्चिदसूयन् जलेन मुखं पूरयित्वा यदि सूर्यमपि निष्ठीव्येत तज्जलं प्रतिनिवृत्य तन्मुख एव पतेत् न तु सूर्यस्याल्पापि हानिः भवति" इति। एवं पितुर्वचनं श्रुत्वा युक्तरूपमेतदिति गृहीत्वा दुर्गुणान्विहाय स कुमारः साधुः समवर्त्तत॥



**कथा २२.**

धारापुरे कश्चिद्ब्राह्मणो बभूव। तस्मिन् एकदा पुष्पफलानि आहर्त्तुमटवीं गते व्याघ्र एक आजगाम। व्याघ्रं दृष्ट्वा अतिभीतो ब्राह्मणः पलायितुमारेभे। व्याघ्रश्च तमनुधाव्य जग्राह। तदा ब्राह्मणः व्याघ्रं प्रार्थयामास। "भवान्मयि दयां कृत्वा त्रीणि दिनानि केवलं मामहत्वा विस्रष्टुमर्हति तावता कालेन अहं गृहं गत्वा सर्वाणि मम कार्याणि निर्वर्त्य सर्वान्बन्धून्दृष्ट्वा तानामन्त्र्य चात्र निवर्त्स्यामि" इति। व्याघ्रो ब्रूते "यदि त्वं नागच्छेः किमस्माभिः कार्यम्" इति। सत्यमेवागच्छामीति यदा ब्राह्मणः प्रतिजज्ञे तदा व्याघ्रः साधु भोःब्राह्मण गत्वा प्रतिनिवर्तस्वेति उक्त्वा तं प्रस्थापयामास। ततः ब्राह्मणः शोकाकुलः गृहं गत्वा त्रिभिर्दिनैः सर्वाणि कार्याणि यथावत् समाप्य प्रतिज्ञातायां वेलायां व्याघ्रस्यान्तिकमाययौ। व्याघ्रश्च तस्य सत्यव-

त्तां प्रशस्य तं अहिंसित्वा गृहं याहीत्युक्त्वा विससर्ज । एवं सत्यवादिनं सर्वे पूजयन्ति ॥

## कथा २३.

आसीदङ्गेषु कश्चिद्राजा । प्रत्यहं तस्यान्तिकं एको ज्यौतिषिकः आजगाम । एकस्मिन्दिने स राजा ज्यौतिषिकमपृच्छत् । "इतः परं कति वर्षाण्यहं जीवेयं ब्रूहि भोः" इति । "द्वाभ्यां वत्सराभ्यामधिकं कालं न जीवितुं शक्नुयाद्भवान्" इति ज्यौतिषिकस्य वचनं श्रुत्वा राजा अतीव चिन्ताकुल आसीत् । समीपस्थो मन्त्री दैवज्ञमपृच्छत् । महाराजो वर्षद्वयात्परं न जीवेदिति विदितवान् त्वं इत ऊर्ध्वं कति वर्षाणि जीवेः 'किमेतद्वक्तुं शक्नोषि" इति । तदा दैवज्ञः इतः आरभ्य विंशति वर्षाणि जीवेयमिति प्रत्युवाच । तदा मन्त्री आत्मनः असिं कोषादाकृष्य प्रहारेणैकेन दैवज्ञस्य शिरः छित्वा राजानं संबोध्य "आर्य एतस्य वचनं श्रद्धाय भवानभैषीत् । आत्मनो मरणस्य कालमजानन् कथमयमितरान् बोधयितुं क्षमेत । देवो न भेतुमर्हति" इति उक्त्वा समाश्वासयामास । राजा मन्त्रिणो बुद्ध्या हर्षितः तस्मै बहूनि पारितोषिकाणि ददौ । अतो ज्यौतिषिकस्य वचो न श्रद्धेयम् ॥

## कथा २४.

अटव्यामेकस्यां व्याघ्रः कश्चिदटवीस्थान् मृगान् गृहीत्वा भक्षयन्नासीत् । एकदा स वन्यं महिषमासाद्य अभक्षयत् । महिषास्थि एकं व्याघ्रस्य दन्तान्तरेषु दृढलग्नं यदा न निर्गमयितुमशक्यत तदा तत्र रक्तपूययोः समागमेन महती व्यथा समजायत । तदा व्याघ्रः वृक्षस्य मूले व्यथया मुखं व्यादाय कथमिदं अस्थि निर्गमयेयं कथं जीवेयं किं वा कुर्यामिति बहु प्रलपन् वृक्षे काकमालोक्य "भोः काक ईदृशीमवस्थां गतोऽस्मि । यदि त्वं मम मुखात् अस्थि निष्कृष्य मां जीवयेः तदा तुभ्यं प्रत्यहं आह्रियमाणं मांसं यावदपेक्षं दद्याम् । एतावन्मात्रमुपकारं कर्त्तुमर्हसि" इति प्रार्थयत । काकश्च दयमानः व्याघ्रस्य मुखं प्रविश्य तदस्थ्युद्धृत्य "भो व्याघ्र मांसं दद्यां म इति किल त्वमवोचः, तदधुना देहि" इत्ययाचत । व्याघ्रस्तं संबोध्य "मुखं प्रविष्टं त्वाम् अदशन् जीवन्तमेव यन्मुक्तवानास्मि तेनासन्तुष्टः भूयोऽपि किं मां मांसं देहीति याचसे इतःपरम् अत्र मा स्थाः अपेहि" इत्युवाच । एवमापदि उपकृतवन्तः सुहृदो जनाः अभ्युदये विस्मरन्ति ॥



## कथा २५.

कश्चिद्बालकः एकस्या वाप्यास्तीरे निषद्य उच्चैः क्रन्दन्नासीत् । तदा कश्चित् स्तेनः बालकमभ्येत्य पप्रच्छ । "अरे बालक किमर्थं रोदिषि" इति । बालकोऽवदत् "अहमत्र क्रीडन् यावत् कूपस्यान्तरवलोकयामि तावत्मम ग्रीवाया मुक्ताहारः स्खलित्वा जलेऽपतत् । यद्यहं हारं विना गृहं गच्छेयं मातापितरौ मां प्रहरेताम् । अतोऽहं रोदिमि" इति । बाल एवं ब्रुवति स चोरः तं

हारमपहर्तुमिच्छन् "रे मा भैषीः अहं वापीमवगाह्य मुक्ताहार-मादाय यावत्प्रतिनिवर्त्स्यामि तावत्त्वमप्रमत्तो मम वस्त्राण्यवेक्षस्व" इत्युक्त्वा वस्त्राणि तीरे निवेश्य नग्नः कूपमवातरत् । अवतीर्णमात्र एव तस्मिन् बालकः वस्त्राण्यादाय पलायत । ततः स चोरः चिराय वाप्यां हारं विचित्य अलभमानः कूपाद्बहिरेत्य यदा अपश्यत् तदा बालको नोपालभ्यत । ततः स्तेनः विस्मितः अवदत् । "अहमेव धूर्त्त इत्यमन्ये किल मामप्ययं बालको वञ्चितवानहो" इति । एवं पटुजातीयादपि जनात् पटीयान् जनो नियतं विद्यत एव (एवं यो यो जन आत्मानमतिपटुं मन्यते ततोऽपि पटुतरो लोके नियतमस्त्येव) ॥

**कथा २६.**

सकलेषु शास्त्रेषु प्रवीणः एको ब्राह्मणः काशीं जिगमिषुः शिष्यैः सह प्रस्थाय गच्छन् एकस्मिन्दिने सायाह्नवेलायाम् एकं ब्राह्मणदारकमटव्यां गाश्चारयन्तं दृष्ट्वा रात्रौ निवेष्टुकामः "तव ग्राम इतः कियद्दूरे वर्त्तते" इति तं पप्रच्छ । स बालकोऽवदत् । "भो ब्राह्मण मां पश्य मया चार्यमाणा गाः पश्य अटवीं पश्य इमां कालकलां च पश्य एतत्सर्वं यदि पश्येः त्वत्प्रश्नस्य उत्तरं सुव्यक्तं भवेत् । यदि ग्रामः अन्तिके नाभविष्यत् तत्किमहं अस्यां वेलायां एतस्यां च अटव्यामेकाकी इयतीर्गाश्चारयन् अभविष्यम्" इति । बालकस्य वचनं श्रुत्वा अयमतिबुद्धिमानिति मत्वा तमनुसृत्य तद्गृहं प्राप्य तत्पितरं संबोध्य "तव पुत्रः



अतिबुद्धिमान् गाश्चारयितुं नार्हति यद्ययं शिष्यैः सह मां काशीमनुगच्छेत् एनं सम्यक् विद्यां शिक्षयेयं" इत्यवदत् । एतद्वचनं श्रुत्वा बालकस्य पिता तथेति प्रतिपद्य आत्मनः कुमारं पण्डितेन सह प्रास्थापयत् । पश्चात् स दारकः ब्राह्मणाद्विद्या अधीत्य प्रथितः पण्डितः समपद्यत ॥

**कथा २७**

चेन्नपत्तने कश्चन हूणप्रभुरासीत् । स इङ्ग्लीष्भाषां विना नान्यां भाषामवैत् । अतः स आत्मनः समीपे देशभाषाभिज्ञं द्विभाषिणमस्थापयत् । एकस्मिन्दिवसे वंशनर्त्तिनः केचित् तमुपसृत्य वंशं निखाय तस्मिन् नर्त्तित्वा सर्वमात्मनः कौशलं समभिव्याञ्जन् तेन भृशं तोषितः प्रभुः आत्मनो द्विभाषिणमाहूय दीयतामेभ्यो वराहदशकमित्यादिशत् । ततः स द्विभाषी तान् स्वगृहं नीत्वा वराहमेकमेव तेभ्यो दत्वा गम्यतामित्युवाच । तावता श्रमेण कृतस्य स्वनृत्यस्य पारितोषिकमियदल्पमासीत्किलेति भृशं दुःखिताः द्विभाषी किमस्मान् जातु वञ्चितवानिति शङ्कया ते प्रभोरन्तिकं गत्वा तस्मै वराहमेकं प्रदर्श्य द्विभाष्येतत्प्रायच्छदित्यावेदयन् । स प्रभुः तेषां भाषामजानन् द्विभाषिणमानाय्य किमेते ब्रुवन्ति पृच्छेत्यादिशत् । तदा द्विभाषी प्रभुं संबोध्य "आर्य भवता दत्ते वराहदशके अयं वराहः मिथ्यामुद्रया अङ्कितः एतं स्वीकृत्य वराहान्तरं देहीति इमे याचन्ते" इति न्यवेदयत् । तच्छ्रुत्वा स प्रभुः महता कोपेन तांस्ताडयित्वा

व्यद्रावयत्। अतः ये केऽपि जनाः आत्मना अध्युषितस्य देशस्य भाषाया अनभिज्ञश्चेत् इतरेषां वचः श्रद्धाय अन्याय्यमाचरेयुः ॥

**कथा २८.**

पाञ्चालेषु राजा कश्चित् बभूव। तस्य एकः पुत्र आसीत्। स बाल्यात्प्रभृति अतीव बुद्धिमानभवत्। एकस्मिन्दिने राजानं संबोध्य "आर्य कीर्तिः संपादनीयेति ममै महती इच्छा वर्तते। कथमाचरन् कीर्तिमहं लभेय" इति पप्रच्छ। राजाऽवदत्। "त्वं राज्यं शासत् प्रजानां पीडनमनुत्पाद्य भाग्यवतो दरिद्रांश्च सम्यग्विचार्य दरिद्रेभ्यस्तदा तदा अन्नं वस्त्रं च ददत् संरक्षेश्चेत् तव कीर्तिस्तेन विस्तारिता भविष्यति। भाग्यवद्भ्यः (प्रभूतस्य दानेनापि कीर्तिर्न भवति) प्रत्तं प्रभूतमपि दानं कीर्तिं न जनयति। अत्र दृष्टान्तं वच्मि श्रूयताम्। जलाभावेन सस्ये शुष्यति यदि वृष्टिः पतेत् तेन मेघस्य कीर्तिः विस्तृता भवति। समुद्रे प्रभूतयापि वृष्ट्या मेघस्य कीर्तिर्नोदेति' इति। एतावदुक्त्वाऽयं बुद्धिमानिति निश्चित्य तस्मै राज्यस्यार्धम् अर्पयामास। स च कुमारः तद्राज्यं स्वीकृत्य प्रजाभ्यो दत्तानि शासनानि संविदश्च परिपाल्य दरिद्रान् विचार्य तेभ्यः अन्नं वस्त्रं च दत्त्वा तानादरेण अवर्धयत्। तेन तस्य महद्यशः उदपद्यत ॥

**कथा २९.**

एकस्मिन् पत्तने दरिद्रः कश्चिद्ब्राह्मण आसीत्। एकदा तस्मै कश्चिद्वणिक् पिष्टपूर्णं कुम्भं ददौ। तमादाय गृहमागच्छन्



भृशं श्रान्त्वा मार्गे कस्यचिद् गृहस्य बाह्ये अलिन्दे उपविश्य एवमचिन्तयत्। "कुम्भगतं पिष्टं यदि विक्रीणीय तेन मया रूप्यार्धं लभ्यते। तेन च रूप्यार्धेन अजपोतमेकं क्रीणीयाम्। अस्माच्च अजपोतात् केनचित्कालेन महदजवृन्दमुद्भविष्यति। तमजवृन्दं विक्रीय लब्धेन धनेन गा महिषीश्च क्रेष्यामि ततः कतिपयैरेव संवत्सरैः पशूनां द्वयोः सहस्रयोः स्वामी भविष्यामि। तदा एकं महद्भवनं क्रीत्वा तदादर्शादिभिः रम्यवस्तुभिरलंकृत्य रूपवतीं स्त्रियं परिणेष्यामि। तस्यां च एकः पुत्रो मे जनिष्यते। तेन मे मनोरथः सेत्स्यति। तदा सा मयि प्रेम्णा बहुना वर्तिष्यते। परं तु अहमत्यर्थमस्या नैव छन्दमनुवर्तिष्ये यदि कदाचित्सा मामालिंगितुमुपसर्पेत्तदा तामेवं पद्भ्यां प्रहृत्य प्रणोत्स्यामि" इति। मनसि भावितं प्रत्यक्षवदनुतिष्ठता तेन पद्भ्यां प्रहृत्य पातितः कुम्भो व्यशीर्यत। पिष्टं च रजसा मिश्रमभवत्। तेन मनसि चिन्तितं सर्वमप्यनश्यत् ॥

**कथा ३०.**

समुद्रतीरे वटवृक्षे कश्चित् काक आसीत्। सः तेन समुद्रतीरस्य मार्गेण डयमानं हंसमेकं दृष्ट्वा क गच्छसीति तं पप्रच्छ। अहं मानससरो गच्छामीति हंसः प्रत्युवाच। तर्ह्यहमप्यागच्छामि किं मां सह नेष्यसीति काकः पप्रच्छ। तच्छ्रुत्वा हंसोऽवदत्। भोः काक क मानससरः क त्वं, तावद्दूरं गन्तुं न शक्नुयाः इति। अनेन वचसा भृशं कुपितः काकः उवाच। भोः

हंस त्वं गर्वेण किंचिदप्यजानन् एवं ब्रवीषि । वस्तुतः विचार्यमाणे अहमत्र त्वत्तोऽपि आशुतरं डयितुं शक्नुयाम् । अत्र निदर्शनमस्मिन्नेव क्षणे दर्शयिष्यामि । एहि मयैव सह प्रतिष्ठस्व" इति । एतावदुक्त्वा आकाशमुत्पत्य समुद्रस्योपरि कियच्चिद्दूरं हंसेन सह गत्वा ततः हंसं पृष्ठतः विहाय वेगेन पुरो दश व्यामान् प्रयाय पुनः प्रतिनिवृत्त्य हंसस्याभ्याशमेत्य भो हंस अतित्वरया गच्छामीत्यब्रवीः किल । मया सह गन्तुं नाशकः आत्मनः शक्तिं अविचार्यैव मां तिरस्कृतवानसि इति परिजहास । पुनश्च कियतिचिद्दूरे याते काकः भृशं श्रान्त्वा डयने पक्षती व्यापारयितुमक्षमः अवासीदत् । हंसः काकं दृष्ट्वा हसन् तं जले पातात् त्रस्यन् आत्मनः पक्षाभ्यां धृत्वा तीरमानीय तत्र निदधे । एवमशक्तो दुर्जनः शक्तं सज्जनं अवधीरयन्नात्मानमेवान्ततः अपकर्षयति ॥

### कथा ३१.

पुरा मच्चिलिपत्तने कश्चित्तुरुष्कः आसीत् । एकस्यां रात्रौ तस्य गृहं सहसा प्रविश्य स्तेनाः सर्वस्वमपजह्रुः । ततः सः स्तेयं निपुणं मार्गयन् स्वगृहे मुषितानि कानिचिद्वस्तूनि एकस्य वशे स्थितानि यदा उपलेभे सदृशैश्च हेतुभिः विचार्यमाणे नूनं स एव स्तेन इति यदा स्फुटमवागच्छत् तदा तं गृहीत्वा प्राड्विवाकस्यान्तिकमनयत् । तदा प्राड्विवाकस्तुरुष्कमपृच्छत् । "अनेन तव गृहे कृतं स्तेयं प्रति मां प्रत्याययितुं किं सन्ति ये केचित् साक्षिणः" इति । तुरुष्क उवाच "न सन्ति साक्षिण" इति । प्राड्विवाकोऽवदत् "साक्षिहीना अर्था न विचारणीया इति धर्मशास्त्र उच्यते । तदहमेतमर्थं न विचारयितुमिच्छामि" इति । प्राड्विवाकस्य वचनं श्रुत्वा तुरुष्कः पादगते आत्मनः उपानहाववमुच्य ताभ्यां स्तेनं प्रहर्तुमुपचक्रमे । तद्दृष्ट्वा अतीव कुपितः प्राड्विवाकस्तुरुष्कमपृच्छत् "किमर्थमेनं ताडयसि" इति । तुरुष्कः प्राड्विवाकं प्रत्युवाच "आर्य यद्ययं मम गृहे मोषिष्यन् अहं तव गृहे मोषितुमागच्छामीति पूर्वमेव आवेदयिष्यत् अहमपि स्तेयं प्रमाणयितुं साक्षिणः समपादयिष्यम् । अयं तथा नावेदयत किमिति नावीविद इति एनं प्रहरामि" इति ततः लज्जितः प्राड्विवाकः उत्तरं किमपि अप्रतिपद्यमानस्तूष्णीं तस्थौ ॥



### कथा ३२.

कश्चिद्राजानमाश्रितावुभावास्ताम् । तयोरेको ब्राह्मणः अन्यस्तुरुष्कः । स राजा उभाभ्यामपि प्रीत्या प्रत्यहं बहुमानमददात् । तेन उभावपि आढ्यौ भूत्वा सुखेनावर्तेताम् । एकस्मिन्दिने राजा तावुभौ पप्रच्छ । "कस्य प्रसादेन युवां सुखिनौ वर्तेथे" इति । "भवतः प्रसादेन सुखी वर्ते" इति ब्राह्मणोऽब्रवीत् । तुरुष्कस्तु "देवस्य प्रसादेन सुखी वर्ते" इत्युवाच । उभयोरपि वचनं परीक्षा इति राजा कश्चित्कूश्माण्डकं छिद्रयित्वा तदभ्यन्तरं मुक्ताभिरापूर्य छिद्रं च पिधाय कूश्माण्डं ब्राह्मणाय ददौ । तुरुष्काय द्वावेव पणौ प्रायच्छत् । ततः स ब्राह्मणः कूश्माण्डस्य

अन्तर्मुक्ताः सन्तीत्यजानन् राजा मह्यमियदल्पं दत्तवानिति भृशं खिन्नः राजगृहान्निर्गत्य मार्गे तुरुष्कमवदत्। "मम अनेन कूष्माण्डेन नास्ति प्रयोजनं यदि अपेक्ष्यते तर्ह्ययं गृह्यतां त्वदीयं पणद्वयं अस्मात् प्रतियच्छ" इति तुरुष्कस्तथेति प्रतिपद्य पणद्वयं दत्त्वा कूष्माण्डं गृहमानीय यावदभिनत् तावत्स मुक्ताभिः पूरितो ददृशे तेन सः अतीव संतुष्य राजान्तिकमेत्य तस्मै वृत्तान्तमेतन्न्यवेदयत्। तच्छ्रुत्वा राजा सर्वे मया रक्षिता वर्तन्त इति दुरभिमानं परित्यज्य सुखेन अवतर्त। अतो देवस्य साहाय्यं विना मनुष्यस्य व्यवसायः विफलो भवति॥

### कथा ३३.

आसीद्दाक्षिणात्ये जनपदे कश्चिद्ब्राह्मणः। तस्य द्वे भार्ये आस्ताम्। तयोर्ज्यायसी पुत्रमेकं प्रासूत। सप्तमास एव तस्मिन् शिशो स ब्राह्मणः काशीं यियासुः भार्याभ्यां सह प्रस्थाय कियश्चिद्दूरं गत्वा मार्गेऽम्रियत ते स्त्रियौ तत्रत्यमग्रहारं एकं प्रविश्य तं पुत्रं महता प्रेम्णा तथा वर्धयन्त्यावास्तां यथा स शिशुः उभयोः कतरा आत्मनो मातेति नाजानात्। एवं वर्तमाने एकदा कनीयसी ब्राह्मणभार्या ज्यायस्या कलहायिता इतः परं त्वया सह न वत्स्यामीति शिशुमादाय गृहान्निर्ययौ। तदा ज्यायसी मम पुत्रं किमर्थं नयसीति अभिदधाना पुत्रं जग्राह। अहमिमं प्रासुवि। अत एवाहं नयामीति कनीयसी अवदत्। ततः उभे अपि विवदमाने राज्ञे स्वकलहं निवेदयामासतुः राजा क्षणं विचिन्त्य



आत्मनो भृत्यानादिदेश। इमं शिशुं द्विधा कृत्वा अनयोरेकैकस्यै एकैकमर्धं प्रयच्छतेति। तदा कनीयसी किमप्यभाषमाणा तूष्णीमास्त। ज्यायसी तु शिशोर्माता पुत्रस्य मरणमनिच्छन्ती पुत्रो मे यत्र कुत्रचिज्जीवन् वर्तताम्। तेनैव तुष्येयमिति मनसि कृत्वा राजानमब्रवीत्। "आर्य अयं तस्याः सुतः न मम। अतोऽयं तस्या एव दाप्यताम्" इति। तस्यास्तद्वचनं श्रुत्वा शिशोर्ज्यायसी जननी इति निश्चित्य तस्यै शिशुं समर्पयामास। एवं विवादानां निर्णायका उपायज्ञा भवितुमर्हन्ति॥

### कथा ३४.

इन्द्रप्रस्थपुरे अतिधनी वणिक्कश्चिद्बभूव। तत्सेवकेष्वेकतमः एकस्यां रात्रौ वणिजो गृहे किञ्चिद्द्रव्यं मुषित्वा पलायत। परे द्यवि वणिक् बहुत्र विचिन्वन्नपि स्तेनं नाऽऽससाद। केषुचिद्दिवसेषु गतेषु वणिक् नगरान्तरं वाणिज्येन निमित्तेन गतः अचिरादात्मनो गृहे द्रव्यं मुषित्वा पलायितं सेवकं नगरे वीथ्यां गच्छन्तं विलोक्य तं करे गृहीत्वा "मम गृहाद्द्रव्यं किमिति मुषित्वा पलायथाः" इति पप्रच्छ। तदा सः वणिजं मध्यबन्धे गृहीत्वा "त्वं मे सेवकः मम गृहाद्द्रव्यं मुषित्वा पलायथाः बहूनि दिनानि विचिन्वन् अद्यैव त्वां प्राप्तवानस्मि। अर्पय मदीयन्द्रव्यमस्मिन्नेव क्षणे" इति निर्बध्यापृच्छत्। तदा तावुभौ विवदमानौ प्राड्विवाकस्यान्तिकमेत्य आत्मनो वृत्तान्तं तस्मै निवेदयामासतुः। सः प्राड्विवाकः कञ्चित्कालं पर्यालोच्य युवयोरेकै-

कोऽपि आत्मनः शिरः गवाक्षविवरस्य द्वारात् बहिः प्रेरयात्वित्युक्त्वा घातुकपुरुषानादिदेश। 'अनयोः यः सेवकः तस्य शिरः छिन्त' इति। तदा वणिजो गृहे द्रव्यं मुषित्वा पलायितः स्तेनः सेवकस्य मम शिरः छिन्द्युरिति भयात् वातायनाद्बहिः प्रेरितमात्मनः शिरः अन्तरपचकर्ष। वणिक्तु निश्चलः तस्थौ। अनेन प्राड्विवाकः वातायनाद्बहिःस्थं शिरः अन्तर्योऽपचकर्ष स एवायं स्तेनः वणिजः सेवकः येन वणिग्गृहे द्रव्यं मुषितमिति निश्चित्य तं सम्यगदण्डयत् ॥

**कथा ३५.**

कस्मिंश्चित्पत्तने वणिगेक उवास। सः स्वगृहस्य पश्चाद्भागे आरामं कञ्चिदकल्पयत्। तत्र प्रभूताः शाका रोहन्त आसन्। एकस्मिन्दिने गृहस्य पक्षद्वारे उद्घाटिते कश्चिद्रजकगर्दभः आरामं प्रविश्य शाकान् भक्षयन् वणिग्भार्यया दृष्टः लगुडेन तीव्रं प्राहियत। येन तस्य चरण एको भग्नोऽभवत्। एतं वृत्तान्तमाकर्ण्य रजकः वणिग्भार्यामभ्येत्य 'किमिति त्वया मे गर्दभस्य चरणौ भग्नौ' इति तामाक्रुश्य तस्या गर्भं पादेन प्रजहार। तेन प्रहारेण गर्भिण्यास्तस्या गर्भः विशीर्णोऽभवत्। ततः स वणिक् प्राड्विवाकस्यान्तिकं गत्वा 'आर्य अस्य रजकस्य दुराचारेण मम जनिष्यमाणः पुत्रः अनाशि। स कुमारः जनित्वा मम वार्धके सम्यक्प्रक्षणं कुर्यात्' इत्याशशासि। 'अस्य रजकस्य स्वदुष्कर्मणा सदृशं दण्डं विधेहि' इति प्रार्थयामास। ततः प्राड्विवाको रजक-



मानाय्य 'किमित्येवं दुष्कर्माकार्षीः' इति अपृच्छत्। तदा रजकः 'आर्य प्रत्यहं क्षालनीयानि वस्त्राणि वहतो गर्दभस्य चरणं वणिग्भार्या भग्नवतीति तां गर्भे प्राहार्षम्' इति प्रत्युवाच। एतच्छ्रुत्वा कञ्चित्कालं विमृश्य प्राड्विवाक इमं निर्णयमकरोत्। गर्दभस्य चरणो यावत् सुस्थो भवति तावद्रजकस्य क्षालनीयानि वस्त्राणि वणिग्वोढुमर्हति। रजकश्च वणिग्भार्यां स्वगृहमानीय यावत् सा गर्भिणी भवति तावत् तां तत्रैव स्थापयितुमर्हतीति। एवम् अनार्यैरधिष्ठिते धर्माधिकरणे धर्मः प्रायेण निहन्यते। अधर्मोऽप्यनल्प आचर्यते ॥

**कथा ३६.**

अयोद्ध्यापत्तने राजा कश्चिदासीत्। स एकं पुष्पोद्यानं कल्पयित्वा आत्मनो विश्रामकालं सर्वं (लब्धान् सर्वानवकाशान्) तत्रैव विहरन्नासीत्। तस्य राज्ञो मन्त्री कश्चिद्बभूव। मन्त्रिणश्च सुतः एकः प्रत्यहं उद्यानं गत्वा पुष्पाण्यपहरन् आसीत्। तेन तस्मिन्नुद्याने पुष्पाणि बहूनि नष्टान्यभवन्। राजा उद्यानपालानाहूय "मम उद्याने विकसन्ति पुष्पाणि कोऽप्यपहरन्वर्तते। यूयं जाग्रतो निरीक्ष्य तं स्तेनं गृहीत्वा निवर्तध्वम्" इत्यादिदेश। ते च तथैव जागरूकाः स्थित्वा मन्त्रिपुत्रं पुष्पाण्यपचिन्वन्तं विलोक्य तं पुष्पैः सह गृहीत्वा शिबिकायां निवेश्य राजनगरं निन्युः। तदा मन्त्री पुरद्वारे दैवादतिष्ठत्। तत्रत्याः तं संबोद्ध्योचुः। "अयं ते कुमारः राजोद्याने पुष्पाण्यमुष्णादिति इमं

राजान्तिकं नयन्ति । किं त्वमेनं राजगृहं गत्वा मोचयितुं न यतसे" इति । एतच्छ्रुत्वा मन्त्री तान् प्रति उच्चैरुदैरयत् "वत्क्रमस्ति चेज्जीविष्यति गच्छत यूयम्" इति । एतद्वच आकर्ण्य पितुर (र्थं) भिप्रायं गृहीत्वा आत्मनः समीपस्थानि सर्वाणि पुष्पाणि भक्षयामास । ततो राजा अन्तिकमानीतं तं पप्रच्छ । "किमिति पुष्पाण्यपाहार्षीः" इति । स मन्त्रिपुत्रः "आर्य अहं भवतः उद्यानं दिदृक्षयाऽगच्छम् । न तत्र पुष्पाण्यपाहरम् । मामन्यायेन गृहीत्वाऽऽनैषुः" इति धृष्टः सञ्जगरे । ततः तस्य समीपे पुष्पाण्यनुपलभमानः राजा अन्यायेनेममानैषुरिति निश्चित्य उद्यानपालान्दण्डयित्वा तं व्यसर्जयत् । एवं बुद्धिमान् आपतिताः सर्वा अप्यापदः उपायैरुत्तरति ॥

## कथा ३७.

वाराणस्यामेको रजक उवास । तस्य एकः श्वा एको गर्दभश्च आस्ताम् । एकस्यां रात्रौ तं निद्रास्यन्तं निरीक्ष्य अस्य गृहं सहसा प्रविश्य सर्वस्वमपहरामेति अभिप्रायेण तस्य गृहे चोराः सन्धिं कुर्वाणा आसन् । तदा श्वा तत्र नासीदतो गर्दभः चोरान्वीक्ष्य 'मम स्वामिनो गृहं सहसा प्रविश्य इमे सर्वमपहरन्तो वर्तन्ते । यदि श्वा अत्र स्यात् उच्चैर्भषित्वा गृहस्वामिनं प्रबोधयेत् । स कदा आगमिष्यति । आगमिष्यति वा नवेति न ज्ञायते । शुन आगमनं यावद्यद्यहं मूको वर्तेय सर्वमपीदं गृहं मुष्येत । आपत्काले स्वामिनः कार्यं नोपेक्षणीयम् । अहमेव



रासित्वा तं प्रबोधयानि' इति तारं ररास । तदा स रजकः गर्दभस्य रसितं श्रुत्वा कथमयं मे निद्राभङ्गं विधत्ते इति महता कोपेन उत्थाय लगुडं गृहीत्वा गर्दभं परुषं प्रहृत्य पुनश्च शयितो निद्रां सिषेवे । ततश्चोरा गृहं प्रविश्य मुष्णन्त आसन् । अस्मिन्नेवावसरे श्वानमागतं दृष्ट्वा गर्दभ उवाच । "मम स्वामिनो गृहे चोराः सन्धिं कुर्वाणा अभवन् । तदा त्वमत्र नासीः चोराणामागमनं स्वामिने निवेदयानीति यदाऽहमरटं तदा दौरात्म्यादयं तथाऽरटदिति मत्वा प्रबोधितः स्वामी मां प्रहृत्य गतवान् । अद्यापि वा त्वं भषन् इमं वृत्तान्तं स्वामिने निवेदय" इति । एवं ब्रुवति गर्दभे कुक्कुर उच्चैर्बुक्कितुमुपचक्रमे । स रजकः कुक्कुरस्य भषणं श्रुत्वा किं चोराः अस्माकं गृहमागता इति शङ्कमानः झटित्युत्थाय गृहस्य चतुरः कोणान्यावदपश्यत् तावच्चोराः सर्वस्वं मुषित्वा प्रस्थिताः । ततः स भृशं दुःखितो बभूव । एवं यः परस्य अधिकारे प्रवर्तते तस्य निन्दा भवति । चिकीर्षितञ्च कार्यं प्रणश्यति ॥

## कथा ३८.

चोलदेशे द्विजकीर्तिरिति कश्चिद्राजा बभूव । तस्य त्रयः पुत्रा आसन् । स राजा जरां प्राप्य राज्यस्य परिपालनं कर्तुमक्षमः आत्मनः त्रयाणां पुत्राणां यः राज्यं शासितुमर्हस्तस्मा एव राज्यमर्पणीयमिति मनसि कृत्वा तस्य तस्य योग्यतां परीक्षितुकामः आदौ ज्येष्ठं पुत्रं आनाय्य पप्रच्छ । "पुत्र, किं ते मनस्यभिलषितं वर्त्तते ब्रूहि" इति । ज्येष्ठोऽब्रवदत् । "मम मनसि एषा इच्छा

बलवती वर्त्तते । व्याकरणे तर्के अलङ्कारे शास्त्रेष्वन्येषु च प्रवीणान् विदुषः अन्तिके (वस्थाप्य) स्थापयित्वा रामायणस्य वा भारतस्य वा अन्येषां वा सदृशानां ग्रन्थानां पठनेन कालं सदा नयानि " इति । तदा राजा तस्मै कांश्चन (बृत्यर्थं) व्ययार्थं पर्याप्तान् ग्रामान् दत्वा यथेष्टं आचरेति उक्त्वा तं व्यसृजत् । तत द्वितीयं पुत्रमाकार्य "तव कीदृशो मनोरथः" इति राजा पप्रच्छ। स पुत्रोऽब्रवीत् । "विपुलं धनं संपाद्य तीर्थयात्रां गच्छानीति मम महती आशा वर्त्तते" इति । ततस्तस्मै अपेक्षितं धनं दत्वा तं तीर्थयात्रां प्रति प्रस्थापयामास। अथ राजा तृतीयं पुत्रमानाय्य पप्रच्छ "तव किमभीप्सितम्" इति । "अहं तु राज्यं संपाद्य तत्र विपुलां सेनां प्रतिष्ठाप्य राज्यगताः प्रजाः सादरं संवर्ध्य जनपदेषु सस्यानां समृद्धिमुत्पाद्य सर्वान् जनान् पालनेन रञ्जयन् यशः प्रेप्सामि" इति । अस्य वचनं श्रुत्वा राजा भृशं संतुष्टः अयमेव राज्यमर्हतीति निश्चित्य राज्यं सर्वं तस्य वशे अकरोत् । स कनिष्ठः कुमारः सिंहासनमास्थाय प्रजाः धर्मेण पालयामास । येन तस्य राज्ये सर्वे जनपदाः सुसमृद्धा अभवन् । अतः यस्य अधिकारो दित्सयते तस्य तदर्हता प्रथमं विचार्या ॥

### कथा ३९

विशाखपत्तने सुहृदावुभावास्ताम्। तयोरेकः प्रत्यहमस्तमिते सूर्ये सन्ध्यादिकं निर्वर्त्य देवालयं गत्वा देवं प्रदक्षिणं नमस्यन्नासीत् । अन्यस्तु सूर्यस्य निम्लोच एव वेश्यानां गृहं



गत्वा ताभिः सह सरसं संलापं कुर्वन् कालमनयत् । उभावपि अन्योन्यस्मिन् स्निग्धाववर्तेताम् । देवालयं गतः पुरुषः वेश्यागृहं गतं सुहृदं तत्र तत्कृत्यानि च मनसि भावयित्वा तद्वदात्मना वर्तितुं हन्त नाशक्यतेति व्यषीदत् । वेश्यागृहगतश्च देवालयस्थं सुहृदं ध्यात्वा तद्वदात्मना देवाराधने कालो हा नानीयतेति सदा तप्यमान एव आसीत् । एवं कस्मिंश्चित्काले याते उभावपि अम्रियेताम् । तदा वेश्यागामिनं मोक्ष उपानमत् । देवालयगामिनन्तु नरकः । विपरीते अनयोर्गती दृष्ट्वा नारदो मुनिः देवस्य सविधं प्राप्य एवमुवाच । "भगवन्, सदा देवालयं गतः यस्त्वामभजत् स नरकं प्रापितः । यावज्जीवं वेश्यावासे स्थितः यः त्वां क्षणमपि न दध्यौ स मोक्षं लम्भितः यदि सर्वज्ञस्त्वं एतावदन्याय्यं कुर्याः कस्त्वद्धजनमितः परं लोकेषु विदध्यात्" इति । तच्छ्रुत्वा देवो विहस्याब्रवीत् । वेश्यागृहगः सदा मां ध्यायन्नासीत् ततस्तस्मै मोक्षमदाम् । देवालयगः अन्येषु विषयेषु मनो निधाय मां व्यस्मरत् । तेन स नरकं प्रापत्" इति। एवं सुगतेः दुर्गतेश्च सम्भवे मन एव कारणं नान्यत्किञ्चित् ॥

### कथा ४०

गान्धारदेशे महावीरो नाम राजा बहुधनं व्यययित्वा (बहुना धनव्ययेन) तालद्वयदघ्नं योजनविस्तीर्णं सरः खानयित्वा तत्परितः रोधोबन्धञ्च व्यरचयत् । महत्यामपि वृष्ट्यां महत्यपि जलागमे तत्सरः शुष्यदेव भवति । न तत्र किञ्चिदपि

जलमवतिष्ठते । एकदा राजा सरसः रोधसि उपविश्य महता धनव्ययेन खातेऽस्मिन् सरसि जलं नावतिष्ठते । हा कष्टमिति शोचन्नवर्तत । तदा एरुण्डो नाम ऋषिः तत्रागच्छत् । राजा तं प्रत्युत्थाय प्रणम्य आसन उपवेश्य सादरमभ्यभाषत । ऋषिः राजानं पप्रच्छ । "भो राजन् विषण्णः खलु लक्ष्यसे । किं कारणं तत्र स्यात् ब्रूहि" इति । राजाऽब्रवीत् । "भगवन्, महान्तं धनव्ययं कृत्वा एतत्सरः अचीखनम् । अत्र जलबिन्दुरपि नावतिष्ठते । अतः शोचामि" इति। ऋषिरवदत् । "राजन् माशुचः विक्रमेण च औदार्येण च अन्यैरेतादृशैश्च विशिष्टैर्गुणैरुपेतस्य राज्ञो वा सकलाभिः योगशक्तिभिः सम्पन्नस्य वा कस्यचिद्दषेः कण्ठरुधिरेण मिश्रितं अन्नं सरसः समीपे अवस्थितायै दुर्गायै यद्युपहारं कल्पयेः अस्मिन् सरसि जलं न शुष्येत् । समुद्रवच्च सरः पूर्येत" इति । एतच्छ्रुत्वा राजा चिन्तयामास । महागुणैः सम्पन्नो राजा कृच्छ्रेण लभ्यते । अयं तु ऋषिः सकलाभिः योगशक्तिभिः सम्पन्नः अत्रोपस्थितः अत इममेव दुर्गाया बलिं करवाणीति । एवं निश्चित्य चन्द्रहासमाकृष्य ऋषेः ग्रीवां छित्वा तद्रक्तेन मिश्रितमन्नं दुर्गाया उपाहरत् । ततः दुर्गायाः प्रसादेन वृष्टं जलं सर्वं सरसि अवतस्थे । सरश्च तेन पुपूरे । अतः प्रभुभ्यः हितमहितं वा उपदिशन्तः कालमवेक्ष्य वक्तुमर्हन्ति अन्यथा उपदेष्टृणामेव अपाया आविर्भवन्ति ॥



## कथा ४१.

एकदा केरलदेशे नन्दनो नाम प्रभुः शशास । तमुपेत्य एको मल्लो न्यवेदयत् । "महाराज आयुधादिषु विद्यासु मया महान् परिश्रमः कृतः । महता व्याघ्रेण योद्धुं शक्नोमि पर्वतमपि शिरसा वहेयम् । मच्छक्तेरनुरूपं वेतनं दत्त्वा मां रक्षितुं क्षमः भवन्तमन्तरेण न कोऽपि दृश्यते । अतो भवतो रक्षणमधिगम्य जीवितव्यमिति भवतः सन्निधिमागतोऽस्मि" इति । राजा तच्छ्रुत्वा एतादृशः पुरुषो यदि मम निकटे स्यात् मम भद्रं भवेदिति चिन्तयन्मासि वराहशतकं वेतनं कल्पयित्वा तमात्मनोऽन्तिकेऽवस्थापयामास । एवं स्थिते नगरस्य समीपस्थे पर्वते हिंस्रा मृगा बहुलीभूय जनानुपद्रोतुमारभन्त । राजा तं मल्लमाहूय "पूर्वं पर्वतं वोढुं शक्तोऽस्मीत्यब्रवीः किल । अधुना अस्य नगरस्य समीपे पर्वतस्य अवस्थानेन महानुपद्रवः प्रजानां सम्भवति । तं पर्वतं दूरं नीत्वा कुत्रापि विसृज" इत्यदिदेश । यथाज्ञापयति महाराज इति मल्लः प्रत्युवाच । परेद्यवि उषसि राजा मल्लं गृहीत्वा मन्त्रिणा पुरोहितेन सेनया च परिवृतः पर्वतस्य समीपं ययौ । तदा मल्लः परिकरं बध्वा शिरो वस्त्रेण वेष्टयित्वा प्रतीक्षाञ्चक्रे । राजा मल्लमामन्त्र्य "किं विमृशसि । पर्वतं शिरसि आरोप्य याहि" इत्यादिदेश । मल्लोऽवदत् "पर्वतं वहामीत्येव महाराजमहं पूर्वं न्यवेदयं न तु पर्वतमुत्क्षिप्य नयामीति । महाराजः सैनिकानादिशतु पर्वतमुत्पाट्य मल्लस्य

शिरसि निधत्तेति । यावदिमे मम मूर्ध्नि पर्वतं स्थापयन्ति तावत्तमहम् अभीष्टं देशमूढ्वा अवतारयिष्यामि" इति ॥

### कथा ४२.

पत्ननगरे नाम ग्रामे कस्याश्चित् स्थविराया गृहे एका अङ्गारधानिका एका कुक्कुटी चास्ताम् । प्रत्यहं सा कुक्कुटी यावत्प्रभातस्य याने रौति तावत् ग्रामीणा जनाः सुप्तोत्थिताः स्थविराया गृहमागत्य वह्निमादाय स्वगृहं यान्ति । एवं बहुषु दिनेषु यातेषु एकदा सा वृद्धा चिन्तयामास । 'मम कुक्कुटी रौति तेन ग्रामस्थाः वह्निमादाय अन्नं पक्त्वा भोजनं निर्वर्त्तयन्ति । यद्यहं एतं ग्रामं विसृज्य अन्यतो गच्छेयं कथमत्र रजनी प्रभायात् कथं च ग्रामस्थाः भोजनं निर्वर्त्तयेयुः पश्यानि ' इति आलोच्य कस्याप्यनिवेद्य कुक्कुटीमङ्गारशकटीं च गृहीत्वा ग्रामस्य बहुदूरे अटवीमासाद्य तत्र न्यविशत । परस्मिन् दिवसे प्रभाते ग्रामीणाः यथापूर्वं स्थविराया गृहं वह्न्यर्थमागत्य तां तत्र अपश्यन्तः सा यत्र कुत्रापि गतेति मन्यमानाः अन्यतः स्थलात् वह्निं गृहीत्वा स्वीयं स्वीयं कार्यं निर्वर्त्तयामासुः । वृद्धा तु अटव्यामस्तमयं यावत् उपोष्य निषण्णा तेन पथा कार्यवशात् कुत्रचिद्गच्छन्तं स्वग्रामीणमामन्त्र्य पप्रच्छ । "अहमद्य वो ग्रामे नाभूवम् । तत्र किं रजनी प्रभाताऽभूत् । किं वह्निरलम्भि । किं सर्वे यूयं भोजनमकार्ष्ट" इति । एवं पृष्टः सः हसन् प्रत्युवाच । "अयि मूढे किमयं प्रपञ्चः तव कुक्कुट्यां अङ्गारशकट्यां च श्रितः (आयत्तः) । त्वं किमर्थमत्र



उपवसन्ती आस्से । उत्तिष्ठ गृहं गच्छ" इति । एतच्छ्रुत्वा सा अतीव लज्जिता ग्रामंप्रति निवृत्य अवत्स्याः सर्वेऽपि मामाश्रित्य जीवन्तीति दुरभिमानं परित्यज्य निर्वृताऽभवत् । सर्वेषां जनानां संरक्षणस्य धुरं ईश्वरे वहति बुद्धिहीनाः अस्माभिरेव सर्वे संरक्ष्यन्ते अस्मान्विना न काऽपि तेषां गतिरन्याऽस्तीति मन्यन्ते ॥

### कथा ४३.

कस्मिंश्चित्पत्तने कस्यचिद्वणिजः कश्चित्सुहृदासीत् । स च बधिरः । एकदा सः वणिजः शरीरमस्वस्थमिति श्रुत्वा तस्य देहस्थितिः कीदृशीति विचार्य आगच्छामीति प्रस्थाय गच्छन् वणिजं प्रति संभाषणे आत्मना वक्तव्यानि वचांस्यधिकृत्य मार्गे एवमालोचयत् । अहं तं दृष्ट्वा प्रणम्य भोः भवतः देहस्थितिः इदानीं कीदृशीति पृच्छेयम् । ईषदनुकूलेति स प्रतिब्रूयात् । अहं सन्तोषमभिव्यज्य ततः पृच्छेयम् । किमौषधं सेव्यते । पथ्यञ्च कीदृशमिति । स च प्रतिवदेत् अलवणमन्नमिति । तेन भवत आरोग्यं भूयादित्युक्त्वा को भिषक् चिकित्सतीति पृच्छेयम । अमुक इति स प्रतिब्रूयात् । भिषक् अयं देवस्य कृपया भवतः शरीरं स्वस्थं क्रियादित्युक्त्वा तमापृच्छ्य गृहंप्रति निवर्तेय । इत्थमालोच्य वणिजो गृहमासाद्य तं प्रणम्य अन्तिके उपविष्टः "आर्य भवतः शरीरं इदानीं कथं वर्त्तते" इति पप्रच्छ । "ज्वरो मां भृशं बाधते" इत्यातुरोऽवदत् । बधिरः तद्वचनमगृहीत्वा "मया पूर्वं यथा चिन्तितं तथैव अयं भाषते" इति मन्वानः

"साधु देवस्त्वामेवमेव स्थापयतु" इत्युवाच । वणिक् तु प्रागेव रोगेणायासितः एतद्वचः श्रुत्वा भृशं संरब्धोऽभवत् । तदा बधिरः "किमौषधं भवान् सेवते । किञ्च तत्सेवनाय पथ्यं विहितम्" इति पुनः पप्रच्छ । "यत्किंचित् स्यात् पार्थिवं रजः अपैतु भवान्" इति आतुरः प्रत्यब्रवीत् । तेन भवतं आरोग्यं भूयादित्युक्त्वा को भवतश्चिकित्सक इति भूयोऽपि बधिरः पप्रच्छ । अनेन वचसा संरब्धतर आतुरः यम एव चिकित्सक इत्यब्रवीत् ! तेन क्रियमाणायाश्चिकित्साया देवोऽपि सहायो भूयादित्युक्त्वा बधिरः स्वगृहं प्रत्येयाय ॥

## कथा ४४.

यवनदेशे महम्मदुसुल्तान्नाम राजा बभूव । स परदेशं गत्वा युद्धं कुर्वन् स्वदेशे सर्वत्र जनान् जिहिंस । तेन सर्वोऽपि तस्य देशः शून्य उत्सन्नाश्चाभवत् । ततः तस्य मन्त्री येन केनाप्युपायेन राज्ञः शोभना बुद्धिर्जनयितव्या इत्यालोच्य तत आरभ्य यदा यदा राज्ञा सह संलपति तदा तदा एवं व्याहरति । "अहं पुरा कञ्चिदृषिं सेवमान आसम् । तस्य प्रसादात् पक्षिणां भाषाः शिक्षितवानस्मि । यद्यत्पक्षिणो व्याहरन्ति तत्सर्वं मे विदितं भवति" इति । एवं स्थिते एकदा मृगयाया निवर्तमानो राजा मार्गे कस्मिंश्चिद्वृक्षे निविष्टयोर्घूकयो रुतं श्रुत्वा मन्त्रिणं संबोध्य "त्वं किल पक्षिणां भाषा अपि जानासि । तद् ब्रूहि मह्यं किमेतौ घूकौ भाषेते" इति पप्रच्छ । ततो मन्त्री तद्रुतमवधदिव कञ्चित्कालं श्रुत्वा । राजानमुवाच । "नैतानि वचांसि देवः श्रोतुमर्हति" इति । "यानि वा कानि वा भवन्तु वक्तव्यान्येव मह्यमिमानि त्वया वचांसि" इति राजा निर्बबन्ध । ततो मन्त्री सविनयं न्यवेदयत् । अनयोर्घूकयोः एकस्य पुत्री वर्तते । अन्यस्य पुत्रः । उभावपि स्वपुत्रयोः विवाहकरणे प्रयत्नं कुरुतः । पुत्रवान् दुहितृमन्तं पृच्छति । "मम पुत्राय दुहितरं प्रदास्यन् पञ्चाशतं शून्यान् ग्रामानपि किं प्रदद्याः" इति । "देवस्य कृपया अस्माकं महाराजः सुलूतान् महम्मदः केवलं सुखेन राज्यं शासत् वर्त्तताम् । तदा शून्यग्रामाणां का वा हानिरस्माकं भविष्यति । पञ्चाशतं खलु शून्यान् ग्रामानयाचथाः । पञ्च शतानि तेषां प्रदास्यामि" इति दुहितृमान् प्रत्याह । इति मन्त्रिणो वचः श्रुत्वा अतीव विषण्णो राजा शून्यान् ग्रामान् पुनर्नवीकृत्य सर्वेषां जनानाम् सुखमजनयत् ॥



## कथा ४५.

दण्डकारण्ये कश्चित्सिंह आसीत् । स तत्रत्यान् मृगानास्कन्द्य भक्षयन्नासीत् । एकदा मृगाः सर्वे मिलित्वा सिंहादात्मनः सर्वदा उपस्थितं भयं निवारणीयमिति पर्यालोच्य सिंहस्यान्तिकं गत्वा ऊचुः । "भो मृगराज यदि त्वमस्माकं व्यापादनाद्विरमेः वयं एकैकस्मिन् दिवसे एकैकं मृगं आहारार्थं त्वदन्तिकं प्रेषयामः" इति । सिंहः तथेति प्रतिपद्य तदा प्रभृति मृगाणां हिंसाया विरराम । मृगाश्च सिंहस्याहारार्थं प्रत्यहं एकं

मृगं प्रास्थापयन् । एवं कतिपयेषु दिनेषु यातेषु एकदा सिंह-स्यान्तिकं गन्तुं जंबुकस्य पर्यायः आगच्छत् । स सिंहेन आत्मनो वधमनिच्छन् यं कञ्चिदुपायं कृत्वा सिंहं व्यापाद्य आत्मनः प्राणान् रक्षामीति निश्चित्य शनैरगच्छत् । सिंहः वेलामतिक्रम्यागतो जंबुक इति भृशं कुपितः "कुत इयानागमने विलंब, इति पप्रच्छ । जंबुक उवाच । "स्वामिन् सर्वे मृगाः देवस्य आहारार्थं जंबुकमेकं मम वशे कृत्वा देवायायं निवेद्यतामिति उक्त्वा मां प्रास्थापयन् मार्गे अन्यः सिंह आगत्य देवाय कल्पितं जबुकं गृहीत्वा देवाय वृत्तान्तमिममावेदयितुं मामत्र प्रैषयत्" इति । एतत् श्रुत्वा महता कोपेन "मम शत्रुः सिंहः यत्र वर्तते तं देशमस्मिन्नेव क्षणे मां नय" इत्यादिशत् । स जंबुकः सिंहं कस्याश्चिद्वाप्यास्तीरं नीत्वा "अस्यां वाप्यां नवागतः सिंहो वर्तते । एनमहं द्रष्टुमिच्छामि । मामुत्क्षिप्य तं दर्शयतु देवः" इति ययाचे । तथेति जंबुकमुत्क्षिप्य यावद्वापीमवेक्षते सिंहः तावत्तस्य जम्बुकस्य च प्रतिबिम्बे तत्राविरभवताम् । आत्मनः शत्रुः वाप्यां जंबुकं भक्षयन्नासीदिति मत्वा सिंहः उत्क्षिप्तं जंबुकं अधो निवेश्य महता रोषेणाविष्टो वेगाद्वाप्यामवप्लुत्य ममार । अतः प्रबलः शत्रुरुपायेन हन्तव्यः ॥

**कथा ४६.**

कल्याणपुरे नाम पत्तने वेश्या काचिद्बभूव । सा रात्र्यां स्वप्ने यो यः पुरुषः आत्मनाऽदृश्यत तस्मात्तस्माद्वराहाणां शतक-



मादददानाऽवर्तत । एकस्मिन्दिने कश्चिद्दरिद्रो ब्राह्मणः तया स्वप्नेऽदृश्यत । ततः सा तस्य लक्षणान्युक्त्वा सः यत्र स्यात्तत्स्थानमन्विष्य वराहाणां शतकं याचित्वा आनयतेति आदिश्य स्वदासीः प्रास्थापयत् । तदा ताः वीथ्यामायान्तं ब्राह्मणं वीक्ष्य "भोः ब्राह्मण त्वं अस्माकं स्वामिन्या स्वप्ने अदृश्यथाः सा च आत्मना स्वप्ने दृष्टात्पुरुषात् वराहाणां शतकमादत्ते । अतः त्वं शतं वराहान् दत्वा याहि" इति तमर्थयामासुः । तदा स ब्राह्मण एतद्वचनं श्रुत्वा भृशं दुःखितः "दरिद्रोऽहं वराहान् दातुं न शक्नोमि" इत्युवाच । "यदि त्वं वराहान्न दद्याः न त्वां वयं जह्याम" इति तास्तं भृशं निरबध्नन् । ततः स पत्तनाधिपस्य सकाशं गत्वा "इमा मां वराहान् प्रयच्छेति अधर्मेण निर्बध्नन्ति" इति न्यवेदयत् । राजा च वेश्यामानाय्य पप्रच्छ । "कस्य हेतोरिमं वराहान् प्रयच्छेत्युपद्रवसि" इति । वेश्याऽवदत् "यदयं मया स्वप्ने दृष्टः तदेनं अहं वराहान् देहीत्यभ्यर्थये" इति । ततो राजा 'तव धनं दापयामि क्षणमपेक्षस्व' इति वेश्यामुक्त्वा वीथ्यां स्तम्भमेकं निखाय वराहाणां शतं वस्त्रखण्डस्य अञ्चले पिनह्य स्तम्भस्याग्रे लम्बयित्वा स्तम्भस्य अधोभागे मुकुरं निवेश्य वेश्यामुवाच । "पश्यैतत् वराहाणां शतकस्य ग्रन्थि स्तम्भे अभान्त्सम ते वराहा अधः स्थिते अस्मिन्दर्पणे दृश्यन्ते त्वं हस्तं दर्पणस्यान्तः प्रवेश्य धनं गृहाण" इति । ततो वेश्या "कथमहं

दर्पणे दृश्यमानान् वराहान् गृह्णीयां यं कञ्चित् स्तम्भमारोप्य ग्रन्थिमवतार्य मह्यं दत्त" इति प्रार्थयत। राजोवाच "त्वया-स्वप्ने ब्राह्मणोऽदृश्यत। तत्त्वं दर्पणस्यान्तर्हस्तं प्रवेश्य तत्र दृश्य-मानान् वराहानादातुमर्हसि न वयं तं ग्रन्थिमवरोप्य तुभ्यं दातु-मर्हामः इति। तदा सा वेश्या ह्रीता नम्रमुखी न्यवर्तत। अतो न्यायस्य निर्णायका उपायज्ञा भवितुमर्हन्ति ॥

## कथा ४७.

कर्णाटकदेशे हैमन्तको नाम तन्तुवाय आसीत्। स दुकू-लादीनि सूक्ष्मवस्त्राण्यवयत्। तया वृत्त्या तस्य न कोऽप्यायः आसीत्। सः प्रत्यहं जीवनमपि अलभमानः अतीव दुर्गतोऽभ-वत्। तद्गृहस्य समीपे धीमान्नाम तन्तुवायः स्थूलानि वस्त्राणि वयन् विपुलमायं लब्ध्वा सुखेनावर्त्तत। एकदा हैमन्तकः भार्यामवदत्। "अहं महता प्रयासेन सूक्ष्माणि वस्त्राणि वयामि। अन्नायाप्यलं धनमर्जितुमक्षमः महतीं दुर्दशामापन्नोऽस्मि। अकिञ्चित्करान् स्थूलान् शाटकान् ऊत्वा अस्माकं प्रतिवेशी कियत् भाग्यवान् संवृत्तः पश्य। अत्र न कोऽपि मम सामर्थ्यं वेत्ति। अहमेतं देशं विहाय देशान्तरं गत्वा धनमर्जित्वा प्रति-निवर्त्स्यामि" इति। भार्यावदत् "किमन्यत्र गमनेन यत्र कुत्रापि स्थितः प्राप्तव्यमेवार्थं लभेथाः नातोऽधिकं किञ्चिदपि अतः किमिति स्वदेशं हित्वा देशान्तरं गच्छन् श्रममनुभवसि" इति एतादृशं भार्यया उक्तं सर्वमप्यनादृत्य गृहात् प्रस्थाय पुरमन्यत्



प्राप्य तत्रत्यानां जनानां अभिमतानि वस्त्राणि वयन् कतिपयैरेव अहोभिः विपुलं धनमर्जयामास। ततः स्वदेशं प्रेप्सुः नगरात्त-स्मात् प्रस्थायाऽऽगच्छन् एकस्यां रात्रौ सत्रे किञ्चिदासाद्य आत्मीयानि सर्वाणि द्रव्याणि एकत्र सुरक्षितानि कृत्वा शयितः सुष्वाप। स्तेना रात्रौ सत्रं सहसा प्रविश्य सर्वं तद्धनं अपजह्रुः। प्रभाते सुप्तोत्थितः यावदपश्यत् तावदात्मीयं सर्वं नष्टमभवत् तेन भृशं दुःखितः स्वभार्याया वचनं सत्यमिति बुद्ध्वा "मम सम्पदमनुभवितुं भागधेयं नास्ति" इति नैराश्यमापन्नः स्वदेशं प्राप्य तत्र लब्धेन आयेन जीवनमकरोत्। एवं भाग्यहीना यत्र यत्र गच्छन्ति यद्यदध्यवस्यन्ति तत्र तत्र तेषां सिद्धिर्नैव भवति ॥

## कथा ४८.

कलिङ्गदेशे कश्चिद्राजा बभूव। तस्मै कश्चिद्रजकः वस्त्राणि सम्यक् निर्णिज्य पुनरानीय प्रत्यर्पयन्नासीत्। एकस्मि-न्दिने तेन निर्णिक्तानि वस्त्राणि दृष्ट्वा भृशं प्रीतो राजा तमानाय्य एवमुवाच। "त्वया कृतमिदं वस्त्रनिर्णेजनं नितरां मह्यं रोचते। तद्वृणीष्व वरं आत्मनोऽभिमतं प्रदास्याम्यहम्" इति। एवमभि-हितो रजकः राजानं विज्ञापयामास। "देवस्य मन्त्री भवितुमि-च्छामि। तस्माद्देवो मां मन्त्रिणोऽधिकारे नियोक्तुमर्हति" इति। ततः स राजा चिरावस्थितमात्मनो मन्त्रिणमपनीय तत्स्थाने रजकं नियोजयामास। केनचित्कालेन शत्रवो राजानः अस्य

नृपस्य आसन्नं रजकं मन्त्रिणं मूर्खमसमर्थं च ज्ञात्वा स्तेनाः सन्नाह्य तेन राज्ञा योद्धुं आगच्छन्। इमं वृत्तान्तं श्रुत्वा राजा मन्त्रिणमाहूय मम सैन्यानि युद्धाय सन्नाह्यन्तामित्याज्ञापयामास। मन्त्री प्रोवाच। "आयतिमुद्दिश्य कर्तव्यं सर्वं पूर्वमेव कृतवा-नस्मि अतः शत्रुभ्यो न भेतव्यम्" इति। तद्वचः सत्यमिति राजा श्रद्दधे। ततः शत्रूणां सेनाः नगरं न्यरुन्धन्। तदा राजा "मन्त्रिणमाकार्य शत्रवो मे नगरं न्यरौत्सुः किमस्य प्रतिविधानं कल्पितम्" इति पप्रच्छ। मन्त्री राजानमब्रवीत्। "देव शत्रुभिः पत्तनस्य निरोधनादस्माकं किमपि भयं न विद्यते। अस्य राज्यस्य अवेक्षणमत्यन्तं कष्टं आवहति कथमेतत् कष्टं निवार्यते इति चिन्तयत्येव मयि दैवाच्छत्रव आगत्य नगरं न्य-रुन्धन्। त एव एतस्य राज्यस्य पालने क्लेशमनुभवन्तु। अहम-स्मिन्पत्तने चिराय कुलशतस्य वस्त्राणि नेनिजदासम् मन्त्रिप-दस्य प्राप्तेरारभ्य तमुद्योगं त्यक्तवानस्मि। इदानीं पुनरपि तमु-द्योगं प्राप्य तदर्धं तुभ्यं दत्वा शिष्टमर्धमहमुपजीवेयं तेन उद्योगेन मम किमपि कष्टं न भविष्यति। एतत्सर्वं विमृश्य युद्धार्थं सन्नाह न कृतवानास्मि" इति। एतच्छ्रुत्वा राजा अवि-वेकिन आस्पददानेन एतत्कष्टं आत्मन आपतदिति भृशमशो-चत्। अतः अविवेकिनामास्पदं न देयम्॥



## कथा ४९.

मधुरापत्तने कस्यचिद्ब्राह्मणस्य द्वौ पुत्रावास्ताम्। स भूरि धनमुपार्ज्य ममार। तस्य कुमारौ तद्धनं सर्वं द्वेधा समं विभज्य भागद्वयमपि भस्त्रिकायां निवेश्य मुद्रयित्वा प्रातिवेशिन्याः कस्याश्चिद्वृद्धाया हस्ते भस्त्रिकां न्यस्य 'यावदावां तीर्थयात्रां कृत्वा निवर्तावहे तावत्त्वमेतद्धनं गोपायेः यदा पुनरागत्य याचे-वहि तदा धनमेतदुभाभ्यामावाभ्यां प्रत्यर्पय' इत्युक्त्वा तीर्थया-त्रामुद्दिश्य प्रातिष्ठेताम्। कस्मिंश्चिदध्वनि गते कनीयान् 'ज्या-यांसमतिसन्धाय सर्वं धनमहमेक एव हरेयम्' इत्यध्यवसाय एकस्यां रात्रौ निशीथ उत्थाय ज्यायांसमज्ञापयित्वा प्रस्थाय स्व-ग्राममागत्य वृद्धामुपेत्याब्रवीत्—'अहं ज्यायान्मे भ्राता च ती-र्थयात्रामुद्दिश्य गच्छन्तावास्व मार्गे महाकायो व्याघ्रो ज्यायांसं मे भ्रातरं व्यापादयत्। अतोऽहमेक आगतोऽस्मि। पूर्वमावाभ्यां तव हस्ते न्यस्तं धनं प्रत्यर्पय' इति। तच्छ्रुत्वा सा वृद्धा 'कथमस्मै सर्वं धनं प्रयच्छेयम्' इति कञ्चित्कालं व्यमृशत्। 'ततः ज्या-यांसं भ्रातरं न वञ्चयेदयम्' इति प्रतीत्य तस्मै सर्वं धनं प्रददौ। स च तद्गृहीत्वा देशान्तरं पलायत। अत्रान्तरे ज्यायान् भ्राता कनीयांसमदृष्ट्वा भृशं दुःखितः स्वग्रामं प्रतिनिवृत्य वृद्धामुपेत्य उवाच—'मम कनीयान् भ्राता क्व गत इति न ज्ञायते। आवाभ्यां तव वशे निक्षिप्तं धनं प्रत्यर्प्यताम्' इति। वृद्धा 'तव अनुजः कतिपयेभ्यो दिनेभ्यः पूर्वमिहागत्य त्वं मृत इत्युक्त्वा सर्वं धनं

गृहीत्वा गतः' इति न्यवेदयत्। ततः स वृद्धया विवदमानः तां प्राड्विवाकस्य सकाशं नीत्वा सर्वमात्मनो वृत्तान्तं तस्मै न्यवेदयत्। प्राड्विवाकस्तदुक्तीः वृद्धायाश्च वचांसि श्रुत्वा 'असंशयमियं वञ्चितासीत्' इति परिज्ञाय तमवदत्। "पूर्वं युवां वृद्धाया हस्ते धनं निक्षिप्य एवं किल अवदतम्" 'यदा भ्रातरावावां सहागत्य धनमिदं याचेवहि तदा त्वमेतत्प्रत्यर्पय' इति। त्वं कनीयांसमप्यानयेश्चेद्धनं तुभ्यं दापयेयम्। एक एव त्वमागत्य यदि याचेथाः कथमेतत्तुभ्यं दापयितुं युज्यते। धनं यदि ग्रहीतुमिच्छसि अनुजमत्रानय' इति। एतच्छ्रुत्वा सः उत्तरं किमपि वक्तुं न शशाक॥

## कथा ५०.

अवन्तिपत्तने सुबुद्धिः दुर्बुद्धिरिति च द्वौ वणिजावास्ताम्। तौ देशान्तरं गत्वा महद्धनमर्जित्वा प्रतिनिवृत्य स्वनगरस्य उपकण्ठे कस्यचिच्चिञ्चातरोरधः तद्धनं कस्याप्यविदितं निखाय स्वं स्वं गृहं ययतुः। ततः एकस्मिन्दिने दुर्बुद्धिः एक एव तं चिञ्चावृक्षं निभृत उपेत्य सर्वं धनमुत्खाय स्वगृहं निनाय अन्यदा उभावपि सह गत्वा चिञ्चातरोर्मूले यावत् अखनुतां तावत्तत्र गुप्तं धनं नादृश्यत। तदा दुर्बुद्धिः सबुद्धिं मन्ध्यबन्धे गृहीत्वा "सर्वमेतद्धनं त्वं रहस्यपहृत्य इदानीं किमप्यजानन्निव मया सह अत्र धनमुत्खायादातुमागतवानसि। मम भागं प्रति



लभ्यान् वराहानधुना देहि" इति तं निर्बन्ध्य अयाचत। 'नाहमत्र किमपि वेद्मि' इति ब्रुवतः तस्य शपथाननादृत्य, तं प्राड्विवाकस्य सकाशं नीत्वा "उभाभ्यामावाभ्यां सम्भूय निखाय गुप्तं धनं सुबुद्धिरेक एव गृहीतवान् तस्मात् धनात् मदीयमंशं प्रभुः प्रसह्य दापयितुमर्हति" इति न्यवेदयत्। प्राड्विवाको दुर्बुद्धिं पप्रच्छ। "युवाभ्यामुभाभ्यां निखाय गुप्तं धनं सुबुद्धिरेको गृहीतवानिति अभिधत्से। तत् किं साक्षिभिः साधयितुं शक्नोषि" इति। दुर्बुद्धिरवदत्। "यस्य वृक्षस्य मूले धनं निखाय अगोपायाव तेनैव वृक्षेण एतदुपपादयामि" इति। प्राड्विवाक आह स्म। "श्वः वृक्षस्य सकाशमागत्य इममर्थं विचारयितास्मि" इति। ततः दुर्बुद्धिः रात्र्यामेव पितरं तत्र रहसि नीत्वा तरुकोटरे निवेश्य प्रोवाच। "प्राड्विवाक इमं वृक्षमुपेत्य यदि पृच्छेत् सर्वं धनं सुबुद्धिरहरदिति ब्रूहि" इति। प्रभाते प्राड्विवाकः परिवारेण सह आगत्य "अत्र निखाय गुप्तं धनं को हृतवान्" इति पप्रच्छ। तदा कोटरस्थः "सर्वं धनं सुबुद्धिर्हृतवान्" इति उच्चैरवदत्। तां वाचं श्रुत्वा सर्वेऽपि विस्मिता अभवन्। न्यायाधिपतिस्तु कञ्चित्कालं विमृश्य तस्मिन्कोटरे तृणं किञ्चिन्निवेश्य तदग्निना समदीपयत्। ततः कोटरस्थः निश्वसितुमक्षमः मृत एव निरपतत्। अनेन प्राड्विवाकः दुर्बुद्धेः छलं परिज्ञाय स एव धनं सर्वं अपहृतवानिति निश्चित्य हृतं सर्वं धनं सुबुद्धये अदापयत्। धननाशात् पितुर्मरणाच्च दुःखितः दुर्बुद्धिः गृहं

निवर्तते । अतः यः अन्यं विनाशयितुं यतते सः ईश्वरेण विनाश्यते ॥

## कथा ५१.

कावेरीतीरे जयस्थले नाम अग्रहारे दुर्गतो नाम ब्राह्मण उवास । सः अत्यन्तदरिद्रः प्रत्यहं चतुर्षु ग्रामेषु भिक्षामटित्वा तृतीये यामे गृहमागत्य पक्त्वा अन्नं भुञ्जान आसीत् । एवं कस्मिंश्चित्काले गते एकदा अयं ब्राह्मणः भिक्षामटित्वा आतपे श्रमेण गृहं प्रति निवर्तमान आसीत् । तस्मिन्नेव काले आकाशमार्गेण पार्वती परमेश्वरश्च सञ्चरमाणावास्ताम् । पार्वती देवी ब्राह्मणेन अनुभूयमानं श्रमं दृष्ट्वा कृपया आविष्टा अस्मै भाग्यं दातव्यमिति वल्लभं परमेश्वरमुवाच । "भाग्यं भवतीत्यस्य भाले ब्रह्मा न लिखितवान् । अयं यावज्जीवं एवमेव भिक्षामटन् वर्त्तितुमर्हति" इति परमेश्वरः प्रत्युवाच । तद्वचः श्रुत्वा पार्वती देवी अस्य भाग्यं कथं न भवेत् पश्यामीति उक्त्वा तस्य ब्राह्मणस्य गन्तव्ये मार्गे वराहाणां सहस्रं राशीकृत्य पातयामास । वराहराशेर्व्यामदशके आगतः ब्राह्मणः 'अन्धवत् क्रमितुं शक्नोमि वा न वा परीक्षे' इति मत्वा तस्मात् स्थानात् आरभ्य चक्षुषी निमील्य क्रममाणो वराहाणां राशिमतीत्य गृहं ययौ । अतो ब्रह्मणा ललाटे लिखितं लेखं परिहर्तुं न केनापि शक्यते ॥



## कथा ५२.

बृन्दारण्ये कस्मिंश्चिदश्वत्थे बहवः काकाः नीडान् विरच्य तत्र शावकैः साकं सुखेन निवसन्त आसन् । तस्य समीपे कस्मिंश्चिद्वटवृक्षे मयूरा न्यवसन् । तेषु काकेष्वेकतमः सजातीयान् काकान् मयूरांश्च वीक्ष्य स्वजातीयेभ्यः पक्षिभ्यो मयूराः श्रेयांस इति मत्वा 'अहं इमे मयूरा यथा वर्तन्ते तथैव वर्तेय' इत्यभिनिविश्य स्वजातीयान् विकृत्य वटवृक्षस्य अधः पतितानि मयूरबर्हाणि आदाय आत्मनः पत्रेष्वासज्य मयूरवदाचरन् मयूराणां बृन्दं प्रविश्य कानिचिदहान्युवास । तत एकस्मिन्दिने मयूराः तस्य ध्वनिं श्रुत्वा 'नायं मयूरः परन्तु काकः अस्मान् वञ्चयित्वा अस्माभिः संसृष्टवान्' इति ज्ञात्वा तमाक्रम्य चञ्च्वा नखैश्च तस्य सर्वस्मिन्नङ्गे क्षतान्युत्पाद्य तं निरवासयन् । स काकः अतीव दुःखितः स्वजातीयानां काकानामन्तिकं यावत् पुनरायात् तावत् 'अयं पूर्वमस्मानवज्ञाय मयूरान् श्लाघमानः तैः सह कानिचिदहान्युषित्वा तेभ्यः प्रहारान् लब्ध्वा पुनरस्मदन्तिकमागत' इति सर्वं वृत्तान्तं विदित्वा काकास्तमवदन् । 'वयं क्षुद्रा इति अस्मानवज्ञाय अस्मत्तोऽप्युत्तरतया वर्तितुमिच्छन् त्वं मयूराणामन्तिकं गतवान् किल इदानीमपि त्वं तत्रैव गत्वा तैः सह वर्त्तितुमर्हसि । अस्माकमन्तिके तव किं कार्यं गम्यताम्' इति । एवमुक्त्वा काकबृन्दे प्रवेशामदत्त्वा तं व्यद्रावयन् । अतः यः

स्वजातिं हित्वा जात्यन्तरं प्रविशति सः श्रेयः किञ्चिदप्यलभमानोऽवसीदति ॥

कथा ५३.

ताम्रपर्णीतीरे श्रीरामपुरे नाम अग्रहारे वसन्तयाजी नाम ब्राह्मण उवास। स यक्ष्य इति सङ्कल्प्य तदर्थमजान् सम्पादयितुं समीपवर्ति ग्रामान्तरं गत्वा लक्षणवतः पञ्च अजान् क्रीत्वा तान् ग्रीवासु रज्जुभिः सन्दाय गृहीत्वा ग्रामं प्रतिनिवृते। मार्गे तमायान्तमवलोक्य तानजान् जिहीर्षन्तः चत्वारः शूद्राः मन्त्रयाम्बभूवुः। ततस्तेष्वेकः ब्राह्मणस्याभिमुखो भूत्वा 'कोसि भो अलर्कं नयसि' इत्यपृच्छत्। तच्छ्रुत्वा 'अयमुन्मत्तो योऽजानलर्कान् ब्रूते' इति वदन् ब्राह्मणः यावत् स्तोकमगच्छत् तावत् द्वितीयः शूद्रः मार्गे ब्राह्मणमभिगम्य उवाच। 'कोऽसि भो अलर्कान्नयसि अप्रमत्तो याहि अलर्का इमे जनानास्कन्द्य दशेयुः' इति एतद्वचः यदा ब्राह्मणोऽशृणोत् तदा तस्य संशय कश्चित्समजायत। ततो भूयः किञ्चिद्दूरं गते ब्राह्मणे तृतीयः शूद्रः अजानां समीपमागत्य 'कोऽसि भोः अलर्कानानीय मार्गस्थेषु विसृजसि' इति सकोपमवदत्। तच्छ्रुत्वा 'इमे अलर्का' इति निश्चित्य तान् परित्यक्तुकामः यावत्तेषां गजरज्जूरपनेतुं ब्राह्मणः प्रावर्तत तावत्स शूद्र उवाच। 'गलरज्जवो यद्यपनीयन्ते इमे आस्कन्द्य दशेयुः अतो मार्गे वृक्षे बद्ध्वा याहि भोः' इति। ततः स ब्राह्मणः मार्गे कस्मिंश्चिद्वृक्षे तान् बद्ध्वा पलायामास।



ततः शूद्राः अजान् विमोच्य गृहीत्वा स्वगृहं ययुः। अतो बुद्धिमानपि चतुर्भिरेकीभूय प्रतार्यते ॥

कथा ५४.

याचवरे नाम ग्रामे सिकातमायो नाम शूद्र आसीत् स एकदा ग्रामान्तरं जिगमिषन् सिकतानामष्टपलं वस्त्राञ्चले पिनह्य गृहीत्वा प्रतस्थे। तस्य ग्रामस्य समीपे माचवरे नाम ग्रामे गोमयमाय इति शूद्रो बभूव। स च ग्राममन्यं प्रति गमिष्यन् गोमयस्य चत्वारिंशतं पलानि वस्त्राञ्चले पिनह्य गृहीत्वा प्रतस्थे। ततः उभाविमौ दैवात् एकमेव ग्रामं सायाह्ने आसाद्य तत्रत्यायां धर्मशालायामुपाविशताम्। तदा सिकतामायः गोमयमायस्य समीपे निवेशितं भारमालोक्य तमन्नभारं मत्वा छलेन तमपजिहीर्षुः पप्रच्छ। 'भोः तव भारे किमस्ति' इति! इतः प्रागेव गोमयमायः सिकतामायस्य भारं दृष्ट्वा तण्डुलभ्रान्त्या तदपहरणं सङ्कल्पितवान्। अतः 'मम भारे अन्नं वर्तते' इत्युक्त्वा तव भारे किमिति पप्रच्छ। सिकतामायः प्रत्यवदत्। 'मम भारे तण्डुलाः सन्ति। अहमपि त्वद्वत् ओदनं नानीतवानस्मीति शोचामि। क्षुधितः खल्विदानीमस्मि किं करवाणि' इति तच्छ्रुत्वा गोमयमाय उवाच। 'ममेदानीं क्षुधा न विद्यते। ममान्नभारं गृहीत्वा तव तण्डुलभारं मह्यं देहि' इति। तथेति प्रतिपद्य उभावपि भारयोर्विनिमयं कृत्वा आत्मनः छलमन्यो जानीयादिति शङ्कया तत्र भूयः क्षणमप्यनवस्थाय प्रस्थितौ

किञ्चिद्दूरं गत्वा स्वं स्वं भारं विवृत्य अन्तर्गतं दृष्ट्वा विस्मितौ बभूवतुः । एवमतिसन्धित्सव एव दैवादतिसन्धीयन्ते ॥

**कथा ५५.**

गन्नवरे नाम ग्रामे देवशर्मा नाम ब्राह्मणः आसीत् । सः अतिदरिद्रः प्रत्यहं ग्रामे दशसु गृहेषु भिक्षामटन् लब्धैस्तण्डुलानां मुष्टिभिः वृत्तिं कुर्वन्नासीत् । स एकदा ग्रामस्य समीपवर्तिनीमटवीं समिदर्थं गत्वा तत्र कस्यचिद्वृक्षस्य अधस्तले व्याघ्रं वीक्ष्य नितान्तं भीतः 'अहो बत न जाने किमनिष्टं मे व्याघ्रः करिष्यति केनोपायेन गृहं प्रति निवर्तेय, किं करोमि' इति चिन्तया आक्रान्तः वेपथुमान् समवर्तत । तदा व्याघ्रस्य निकटे द्वित्रा मृगा आसन् । ते ब्राह्मणं दृष्ट्वा 'अयमत्र अमत्या आगतः यद्येनं व्याघ्रः पश्येत् हन्यात् । ततः प्रागेव सुनीत्या अस्य प्राणा रक्षणीयाः' इति संमन्त्र्य व्याघ्रं सम्बोध्य 'भो व्याघ्रराज त्वमतीव धर्मात्मा त्वत्कीर्तिर्दिगन्तेषु विस्तृता वर्तते । अतः कश्चित् ब्राह्मणः तव दर्शनार्थमागतो दृश्यते' इति न्यवेदयन् । व्याघ्रस्तेन वचसा सन्तुष्टः 'साधु ! तमत्रानयत' इत्यादिशत् । ततस्ते मृगा ब्राह्मणमुपेत्य 'मा भैषी' रिति ब्रुवन्तः तस्य त्रासमपनीय तं व्याघ्रस्य सन्निधिं प्रापयन् । व्याघ्रश्च तस्मिन् महतीं प्रीतिं कृत्वा आत्मना हतपूर्वाणां नराणां आभरणेषु कानिचित् तस्मै प्रायच्छत् । ततो ब्राह्मणश्च संतुष्टः स्वग्राममागत्य तान्याभरणानि विक्रीय शरीरयात्रां कुर्वन् आस्त । अथ कदाचित् तस्य प्रतिवेशी



कश्चित् ब्राह्मणो वृत्तान्तमिमं श्रुत्वा 'अहमपि व्याघ्रमुपसृत्य आभरणान्यानयामि' इति अध्यवसाय अटवीमगच्छत् । तदा व्याघ्रस्य समीपे जम्बुकाः श्वानश्चाभवन् । ते तं ब्राह्मणं दृष्ट्वा 'यदि वयं व्याघ्राय अवेद्य तेन इमं घातयेम अस्माकमाहारो लभ्येत' इति मन्त्रयित्वा व्याघ्रमूचुः । 'तत्रास्ते कश्चिन्मनुष्यः यदि तं हन्याः तेन ते एकवारं भोजनं निष्पद्यते' इति । व्याघ्रश्च सहसा उत्थाय तं गृहीत्वा व्यापादयामास । अतो दुष्टैरन्वास्यमानं प्रभुमुपयतो महत्यापद्भवति ॥

**कथा ५६.**

वङ्गदेशे कश्चिद्राजा बभूव । स महद्दुर्गं निर्माप्य विपुलेन सैन्येन तदध्यवसत् । बलवन्तोऽपि शत्रवः दुर्गस्थं तं युद्धे जेतुं नाऽपारयन् । एवं स्थिते तस्य करदः कश्चित् क्षुद्रो राजा केनाऽप्युपायेन तं राजानं दुर्गान्निर्गमय्य गृहीत्वा बन्धने नियोज्य तस्य राज्यं सर्वमाक्रमितव्यमित्यालोच्य एकदा तं राजानमुपेत्य 'आर्य मम कुमारस्य श्वो विवाहो भविता । अतो मयि दयां कृत्वा मम गृहमागत्य शुभं विवाहविधिमालोक्य प्रतिनिवर्तितुमर्हति भवान्' इति प्रार्थयामास । 'साधु तथैव आगच्छामि' इति राजा प्रत्युवाच । अथ राज्ञः सचिवः एतं वृत्तान्तं श्रुत्वा राजान्तिकमागत्य उवाच । 'देवस्तस्य करदस्य राज्ञो गृहं गमिष्यतीति श्रूयते । स उपजापकः महता सैन्येन युक्तः गृहमागते देवे कूटं किञ्चिदाचरेत् । अतो देवस्तस्य गृहं न गन्तुं अर्हति,

इति । एवं मन्त्रिणा निवेदितो राजा पप्रच्छ 'भो मन्त्रिन् स मायावी यद्यपि भवेत् तेन मम किमापतिष्यति । मम स आप्त एव वर्तते । अद्यावधि मयि न किञ्चित् कूटमाचरितवान् अधुनाऽपि न कूटमाचरिष्यति । तादृशी यदि द्रोहबुद्धिस्तस्यास्ति तर्हि किमिति दुर्गस्थे मयि कूटं नाऽऽचरितवान्' इति । मन्त्री प्रत्युवाच 'यावद्देवो दुर्गमाश्रितो वर्तते तावद्युद्धे देवं जेतुं स न शक्नोति । अतो मैत्रीमपेक्षते दुर्गं विसृज्य तद्गृहं गतो देवः पराधीनो भविष्यति । ततः स देवे शात्रवमेव प्रकटयेत् । अद्यावधीव मित्रं न वर्तिष्यते अत्र कमलं निदर्शनम् । कमलस्य किल सूर्यो मित्रं यावत् कमलं जले वर्तते तावत्सूर्यो महान्तं तापं कुर्वन्नपि कमलं विकासयति तदेव कमलं यदि जलाद्बहिः स्थाप्यते तदा सूर्यस्तद्ग्लपयत्येव अतो देवस्तस्य गृहं न गन्तुमर्हति' इति । मन्त्रिणो वचः श्रुत्वा सन्तुष्टो राजा करदस्य राज्ञो गृहं प्रति आत्मनो गमनं परिजहार ॥

## कथा ५७

मन्दारपुरे नाम पत्तने चत्वारः सुहृद आसन् । ते अतिदरिद्रतया अशनवसनयोः कृते महत् कष्टमनुभवन्तः आसन् । कदाचित् ते सर्वे एकत्र मिलित्वा मन्त्रयामासुः 'वयं कतिदिनानि इदं दारिद्र्यमनुभवेम । सुखमधिगन्तुं कमप्युपायं करवाम' इति । एवमालोच्य तद्ग्रामस्थं दुर्गायतनं गत्वा तां दुर्गामुद्दिश्य घोरं तपश्चक्रुः । तेन तपसा तुष्टा देवी प्रत्यक्षीभूय 'वरं वृणीध्वम्' इति तानुवाच । ते देवीं प्रार्थयन्त 'वयं भाग्यवन्तः सुखिनश्च असाम । एवमस्माननुगृह्णातु भगवती' इति । देवी तेभ्यश्चतुर्भ्यो घुटिकाश्चतस्रो दत्वा तानवदत् 'एता घुटिकाः शिरसि निधायस्य उत्तरां दिशमभिगच्छत यत्र घुटिकाः पतेयुः तत्र खात्वा पश्यत प्राप्तव्यं प्राप्स्यते' इति ते तथैव घुटिकाः शिरसि निवेश्य अगच्छन् प्रथममेकस्य घुटिकाऽपतत् ते खात्वा यावदपश्यन् तावत्ताम्रं विस्तृतमलक्ष्यत । सः त्रीन् सखीन् सम्बोध्य 'मम एतत्ताम्रं पर्याप्तं अत्रैव अहमवतिष्ठे' इत्युक्त्वा तत्ताम्रं वृषभैरवाहयत् । इमे त्रयः यावत् किञ्चित् दूरमगच्छन् तावत् द्वितीयस्य घुटिकाऽपतत् । तत्र खात्वा यावदपश्यन् तावत्तत्र विपुलं रजतमासाद्यत । सः आत्मनः सखायौ प्रति 'मम एतद्रजतं पर्याप्तं अहमत्रैव अवतिष्ठे' इत्युक्त्वा रजतं सर्वं गृहीत्वा जगाम । ततः शिष्टावुभौ पुनः किञ्चिद्दूरं यावदगच्छतां तावत् तृतीयस्य घुटिकाऽपतत् । तत्र खनित्वा तौ यावदवैक्षेतां तावत् प्रचुरं सुवर्णमासाद्य स सखायं चतुर्थमवदत् 'उभावावामिदं सुवर्णमादाय गत्वा सुखेन वत्स्यावः । त्वमेकाकी गत्वा किमर्थं कष्टमनुभवसि अत्रैव तिष्ठ' इति । स आत्मनः सख्युर्वचनमप्रतिपद्य भूयः किञ्चिद्दूरं यावद्गच्छति तावत् तस्य शिरसः घुटिकाऽपतत् । तत्र खात्वा स यावत्पश्यति तावदयोऽध्यगम्यत । ततः सः अतीव दुःखितः 'सख्युर्वचनमवधीरितवानस्मि अद्यापि वा तस्य सकाशं गत्वा तेन

वितीर्यमाणं सर्वं सुवर्णमादाय सुखेन वत्स्यामि' इति धिया सखायमन्विष्याऽगच्छत्। सखा तु नासाद्यत तेन नितरां विषण्णः 'मम प्रासमयोऽपि वा विक्रीय वृत्तिं करिष्यामि' इति तत् स्थलमन्विष्य गच्छन्नोपालभत। तेनातीव व्यथितः पुनर्नगरमेत्य भिक्षाटनेन जीवनमकरोत्। अतः आप्तानां वचनमशृण्वन् आयत्यां न ऋद्धिमधिगच्छति ॥

**कथा ५८.**

विमलापे नाम सरसि नानाविधा मत्स्याः चिराय वसन्त आसन्। एकदा बकः कश्चित् तत्र जलजन्तून् दृष्ट्वा केनाप्युपायेन इमान् मदीयं स्थलं नीत्वा प्रतिदिनमल्पशो भक्षयानीति मनसि कृत्वा जलस्य तीरे उपविश्य मत्स्यादयो जन्तवः इमे मां दृष्ट्वा त्रस्ता मा अपगुरिति उद्देशेन तानुवाच 'सर्वे यूयं मां दृष्ट्वा बकजातेर्भक्ष्यानस्मानयं भक्षयेदिति बुद्ध्या मदुपसर्पणात् भीताः अन्यत्र अपसरथ। नाहमत्र युष्मान् जिघत्सुरागतोऽस्मि। अद्यावधि मज्जातीयैः पक्षिभिः सम्भूय बह्वीं जीवहिंसां कृतवानस्मि। इदानीमहं वृद्धः संवृत्तः इतः परं जीवहिंसा न कार्या इति मम वैराग्यं सञ्जातम्। अतः इदं सरः प्राप्य तपः तप्ये। मत्तो युष्माकं किञ्चिदपि भयं नास्ति निःशङ्कमटत' इति। एतादृशानि बहूनि वचांसि विश्वासं जनयितुं स बक उवाच। ते च तानि प्रतीयुः। बकः समीपमागतानपि तानबाधमानः उदासीनतया तस्थौ। एवं कतिपयेषु दिनेषु गतेषु एकदा स बकः



नितरां चिन्ताक्रान्त आस्त। तदा ते मत्स्यास्तमुपेत्य 'भो बक किमित्यस्मिन्दिने त्वमतीव चिन्ताक्रान्तो वर्तसे। तत्र को हेतु' रिति पप्रच्छुः। बकोऽवदत् 'किं ब्रवीमि। इतःपरं द्वादशवार्षिकं दुर्भिक्षमनावृष्टिश्च भविष्यतः तदा एतदशेषं सरः शोक्ष्यति। एतदहं ज्ञानदृष्ट्या परिज्ञातवानस्मि। यूयं सर्वे मम मित्राणि। अस्मिन्सरसि जले शोषिते यूयं सर्वे मरिष्यथेति विषादाकुलो वर्ते' इति बकस्य वचनं श्रुत्वा 'अस्मास्वस्य महती प्रीतिरस्ति' इति अतीव सन्तुष्टाः मत्स्याः 'तथा यद्यनावृष्टिरापतेत् तदा यथा वयं जीवेम तथा कमप्युपायं कृत्वा अस्मान् त्वमेव रक्षितुमर्हसि' इति तं प्रार्थयामासुः। बकोऽवदत् 'इतश्चतुर्योजने दूरे कश्चिद्ध्रदो वर्तते। तत्र प्रभूतम् जलमस्ति। न कदापि तच्छोक्ष्यति। तत्र भवतां सौख्यं भवेत्' इति मत्स्यास्तं प्रार्थयन्त 'तत्रास्मान्नेतुमर्हसि' इति। तथेति प्रतिश्रुत्य मत्स्यानेकैकशो नीत्वा कस्यांचित् शिलायां शोषयित्वा तेषां प्रत्यहमात्मनोऽपेक्षितान् जघास। अतः शत्रोर्वचनानि विश्वासजनकान्यपि न श्रद्दधीत ॥

**कथा ५९.**

पुरा दक्षिणे देशे अनावृष्टिरभवत्। ततो जलाशयेषु नदीषु उपनदीषु च जलं न बभूव। तस्मिन् देशे विद्यमाना गजाः पातुं जलमलभमानास्तृषार्त्ताः 'जलेन समृद्धं स्थलमन्विष्याम' इति प्रस्थाय गच्छन्तः मार्गे चन्द्रपुष्करिणीं नाम सरः

आसेदुः । तत्र जलस्य प्रभूततया सर्वे सरसि तृषामपनीय 'यावदितः परं सुवृष्ट्या देशे सर्वत्र सुभिक्षं भवेत् तावदत्रैवाऽवतिष्ठामहे' इति निश्चित्य तस्य सरसः समीपस्थायामटव्यां वसतिं परिकल्प्य प्रत्यहं तत् सर आगत्य जलमपिबन् । एभिर्गजैर्गम्यमाने मार्गे बहवः शशा आसन् । तेषु केचन गजानां पादाभ्यन्तरेषु पतिताः मृदिता मम्रुः । ततः सर्वे शशाः समेत्य मंत्रयाञ्चक्रुः । 'इमे गजाः अत्रावस्थिताः प्रतिदिनमेतत्सरो जलार्थमागच्छन्ति । गच्छतां तेषां पादमध्ये गृहीता वयं मृदिता म्रियामहे । अतः किमत्र करवाम' इति। तदा तेष्वेकतमः इतरान् संबोध्य 'भोः किमर्थमेवं विषीदथ । अहं केनचिदुपायेन इमान् गजानितः प्रस्थाप्य युष्माकं भयं निवर्तयामि' इति उक्त्वा नक्तं चन्द्रिकायां प्रकाशमानायां सरसस्तीरस्थं गिरिशिखरमारुह्य तत्र उपविष्टो गजान् प्रति उच्चैरवदत् । 'रे रे गजाः अस्य सरसः स्वामी चन्द्रः सन्देशमिममुक्त्वा मामत्र प्राहैषीत्! शृणुत सः बहोः कालादारभ्य एतत्सरः खात्वा आत्मीयमिति सर्वेभ्यः ख्यापयितुं अस्य चन्द्रपुष्करिणी इति नाम कृत्वा प्रत्यहं रात्रावप्सरोभिः सह अत्राऽऽगत्य जलक्रीडामनुभवन्नवर्तिष्ट । गतेषु केषुचिदहस्सु सर्वे यूयमत्राऽऽगत्य जलं सर्वं कलुषयित्वा महान्तम् क्षोभमुत्पादितवन्तः । अनेन अत्र तस्याऽऽगमनं विहतमस्ति स युष्मभ्यमतीव कुपितो वर्तते । अस्मिन्नेव क्षणे स्थानमेतद्विहाय अन्यत्र यदि नापेयात स सर्वान् युष्मान् रात्या-



मस्यामेव जिघांसति इति मया युष्मानावेदयति स कुपित इति यदि जिज्ञास्यते तर्हि पश्यत पुष्करिणीमिमां अस्यां स प्रत्यक्षं दृश्यते' एतच्छ्रुत्वा सर्वे गजा अत्यन्तम् विस्मिताः सरसि जले चन्द्रस्य प्रतिबिम्बं वायुना कम्पितमालोक्य 'सत्यमस्मभ्यं भगवांश्चन्द्रः कुपित' इति मन्वानाः चन्द्रं नमस्कृत्य अब्रुवन् । 'एतत्सरो भवदीयमित्यजानन्त एव अत्राऽऽगताः स्मः अस्माकमपराधं क्षन्तुमर्हसि । इतःपरमत्र न स्थास्यामः' इति । एवमुक्त्वा एतत्सर्वं भगवते चन्द्राय निवेद्य यथा सोऽस्मभ्यं न कुप्येत्तथाकर्तुमर्हसि इति शशं प्रार्थ्य ते तस्मात् सरस्तीरात् प्रस्थाय स्थानान्तरम् प्रापुः । ततःप्रभृति शशास्तत्र सुखेन न्यवसन् । एवमुपायेन चिकीर्षितम् सर्वं साध्यते ॥

**कथा ६०.**

अनन्तपुरे नाम नगरे कुन्तिभोजो नाम राजा राज्यमकरोत् । स एकदा मन्त्रिणा पुरोहितेन अन्यैश्च प्रकृतिजनैः परिवृतः सभामध्ये सिंहासनमध्यासीनोऽवर्तत । तदा कश्चित् क्षत्रिय आयुधपाणिस्तत्राऽऽगत्य राजानं प्रणम्य न्यवेदयत् 'भो महाराज अहं धनुर्विद्यायां नितान्तमभ्यासं कृतवानस्मि वृत्तिं विना अतीव अवसीदामि अतो भवदन्तिकमागतोऽस्मि' इति । राजा तस्य प्रत्यहं रूप्यशतकं वेतनं परिकल्प्य आत्मनः अन्तिके तं स्थापयामास । तदाप्रभृति स रात्रिन्दिवं राजभवनस्य अन्तिक एव अवतस्थे । एकदा रात्र्यां निशीथसमये प्रासादस्य उपरितन्यां

भूमिकायां शयानः राजा कस्याश्चित् स्त्रिया इव आक्रन्दितम् श्रुत्वा उत्थाय सेवकं क्षत्रियमाहूय 'इदानीमाक्रन्दितमश्रौषं किमेतत्' इति पप्रच्छ। सोऽवदत् 'महाराज गताद्दिनदशका-दारभ्य इदमाक्रन्दितम् शृण्वन्नास्मि न ज्ञायते किमेतदिति। देवश्चेदादिशति अहमेनं विषयं विचार्य आगच्छानि' इति। राजा 'साधु गच्छ ज्ञात्वा निवर्त्तस्व' इति तं प्रस्थाप्य 'क्व गच्छत्येषः पश्यान्यहम्' इति अभिप्रायेण आत्मानं कम्बलेनावगुण्ठय तेना-विदितस्तमनुययौ। स च सेवको नगरान्निर्गत्य काञ्चन स्त्रियं स्रस्तकेशीं दुर्गालयस्य समीपे उपविश्य रुदतीं दृष्ट्वा 'काऽसि किमर्थं रोदिषि' इति तां पप्रच्छ। साऽवदत् 'अहं कुन्तिभोजस्य राजलक्ष्मीः अयं राजा अद्यारभ्य त्र्यहेण मरिष्यति मृते तस्मिन् कमहं गच्छामि को मां त्रास्यति इति विह्वला रोदिमि' इति। 'राजानं रक्षितुं किमुपाय एव नास्ति' इति क्षत्रियेण पृष्टा सा पुनरवदत्। 'यदि त्वमात्मनः कुमारमस्यै दुर्गायै बलिमुपहरेः राजाऽयं चिराय जीवेत्' इति। 'साधु अहं गृहं गत्वा कुमार-मानीय दुर्गायै तथैव बलिं कल्पयामि' इत्युक्त्वा गृहमेत्य कुमा-राय सर्वमिमं वृत्तान्तमकथयत्। तच्छ्रुत्वा कुमारः पितरमवदत् 'तात अस्मिन्नेव क्षणे मां दुर्गालयं नीत्वा देव्यै उपहारीकृत्य राज्ञः प्राणान् रक्ष स यदि जीवेत् तमाश्रित्य बहवो जीवेयुः' इति। ततः स कुमारं दुर्गालयं नीत्वा खड्गमाकृष्य कुमारस्य शिरो यावच्चिच्छित्सति तावद्दुर्गादेवी तस्य प्रत्यक्षीभूय तस्य हस्तं



निरुध्य 'तुष्टास्मि ते साहसेनाऽनेन कुमारं मा वधीः अभीष्टं वरं वृणीष्व दास्यामि' इत्यवदत्। स देवीं प्रार्थयत 'अस्य पत्तनस्य राज्ञः कुन्तिभोजस्य आसन्नोपमृत्युर्निवर्त्ततां राज्यं चिराय परि पालयन् राजा कुन्तिभोजः सुखेन वर्धतां भगवति इमं मे वरं देहि' इति। 'तथैव राजा सुखेन चिराय वर्त्स्यति' इति वरं दत्त्वा देव्यन्तर्धानमयात्। ततः भृशं सन्तुष्टः सेवकः कुमारं गृहं प्रस्थाप्य राजभवनं ययौ। अनेन निर्वर्तितम् सर्वं दृष्ट्वा राजा तेनाऽदृष्ट एव स्वभवनं निवृत्य प्रासादे उपविवेश। ततः स सेवकः प्रासादमागत्य राजानमुवाच 'देव काचन स्त्री पत्या कलहायिता रुदती आजगाम। तां सान्त्वयित्वा गृहं याहीति प्रस्थाप्य आगतोऽस्मि' इति। राजा तस्य महता उपकारेण तुष्टः तं सेनापतिमकरोत्। एवमार्याः सेवकाः स्वामिन आपतिता आपदः प्रतिविधित्सन्तः आत्मनः प्राणानपि न गणयन्ति॥

## कथा ६१.

कस्याश्चिन्नद्या गभीरे ह्रदे त्रयो मत्स्या न्यवसन्। तेषा-मेकः प्राज्ञः नद्यास्तदात्वे स्थितिं निरूप्य आयत्यां ह्रदे जलं न तिष्ठेदिति बुद्ध्वा इतरौ मत्स्यावाहूय 'इतः परं घर्मकाले अस्मिन् ह्रदे जलं क्षीयेत तस्मिन् समये दाशा आगत्य जालं प्रसार्य अस्मान् गृहीत्वा हन्युः। अतो वयमधुनैव अनेन प्रवाहेण सह शनैः शनैः समुद्रं अन्यं वा ह्रदं गच्छेम चेज्जीवेम। अत्रैव चे-द्वर्तेमहि महत् कष्टमस्माकं सम्भवेत्' इति उदैरयत्। एतद्वचः

श्रुत्वा तौ मत्स्यौ तमपाहसताम् । अतः स एक एव ह्रदं विहाय त प्रवाहमनुगम्य स्थानान्तरमवजगाहे । ततः केनचित् कालेन घर्मे उपस्थिते ह्रदस्य जलमक्षीयत । तदा कश्चिद्धीवरस्तत्रागत्य जालं प्रसार्य तौ मत्स्यौ गृहीत्वा तीरे न्यवेशयत् । द्वयोस्तयोरेकः कश्चिदुपायं कृत्वा आत्मानं मृतवत् दर्शयन् निश्चलोऽवर्तत । द्वितीयो निश्चलतामनालम्ब्य मुहुर्मुहुरुदपतत् । ततः स दाशः तं भूमावास्फाल्य पद्भ्यामवमृद्य मारयामास । इतरस्तु मत्स्यः दाशे किञ्चिद्दूरं गते शनैर्दाशेनादृष्ट एव ह्रदस्यान्तिकं चलित्वा झटित्युत्प्लुत्य ह्रदं प्रविष्टः क्षेममवाप । अतः अनागतामापदं प्रतिविधित्सुः सुखी भवति । आपतितायाश्च बुद्धिबलेन अनु-रूपैरुपायैः प्रतिविधाता प्रायेण सुखं लभते । अनभिज्ञो दैवपरो विनश्यत्येव ॥

### कथा ६२.

निषधेषु शिबिचक्रवर्ती नाम परमधार्मिकः प्रजासु वत्स-लः प्राणैरपि शरणागतानां त्राता राजा बभूव । तस्मिन् राज्यं शासति तस्य गुणान् देवलोके गन्धर्वैर्गीयमानान् श्रुत्वा देवेन्द्रः तस्य गुणान् परीक्षितुमिच्छन् श्येनस्य रूपं धृत्वा सखायमग्निं कपोतरूपमास्थाप्य श्येनरूपेण कपोतरूपं तमनुधावन् भूमिम-वातरत् । तदा स कपोतः शिबिचक्रवर्तिनः समीपमेत्य 'भो महाराज पश्य तं गृध्रं स मां जिघांसति त्रायस्व मां तस्मात्') इति वदन् शरणमयाचत । ततः श्येनोऽपि राजानमुपेत्य 'भो



महाराज मम भक्ष्यमिमं यदि त्वं त्रातुमध्यवस्येः नूनमहं म्रि-येय अतो मह्यमेनं समर्पय' इत्ययाचत। ततो राजा श्येनमवदत् 'कपोतसमं मांसं मम देहादुत्कृत्य तुभ्यं प्रदास्ये जहीह्येनं' इति तच्छ्रुत्वा श्येनोऽवदत् 'तर्हि कपोतेन समं मांसं घटे उत्तोल्य मह्यं देहि' इति । तथेति प्रतिज्ञाय राजा तुलामानाय्य तत्र एक-स्मिन् घटे कपोतम् निवेश्य इतरस्मिन् घटे स्वमांसमुत्कृत्य न्य-क्षिपत् । असकृदुत्कृत्य निवेशितमपि स्वमांसं यदा कपोतेन समभारं नाभवत् तदा राजा स्वयमेव घटमध्यास्त ततो घटद्वयं सममभवत् । ततो राज्ञो गुणैः प्रीतौ अग्निरिन्द्रश्च स्वं स्वं रूप-मास्थाय पुरत आविर्भूय राजानं प्रशस्य तस्मै अभीष्टान् वरान् दत्त्वा स्वीयं लोकं ययतुः । एवं महात्मानः आश्रितानां रक्षणाय प्राणेष्वप्यास्थां न कुर्वते ॥

### कथा ६३.

कृष्णातीरे एकस्मिन् शाल्मलीवृक्षे कश्चिद्बको निवसन्ना-सीत् । कश्चिद्धंसः तेन मार्गेण गच्छन्तम् दृष्ट्वा बक आहूय पप्रच्छ 'तव शरीरं मच्छरीरवच्छ्वेतम् वर्तते चरणौ चंचुश्च केवलं रक्ताः सन्ति त्वादृशं पक्षिणं अद्यावधि नाहं दृष्टवान् । कस्त्वं कुत आगच्छसि' इति । हंस उवाच 'अहं ब्रह्मदेवस्य हंसः मानससरसि वसामि तत एव आगच्छामि' इति । बकः पुनर पृच्छत् 'तत्रकानि वस्तूनि सन्ति कस्तवाऽहार' इति । हंसश्चः-एवं प्रत्यब्रवीत् 'तत्रत्यानि सर्वाणि वस्तूनि देवैर्निर्मितानि अत-

स्तेषां शोभा वर्णयितुं न शक्यते मुख्यानि कानिचिद्वस्तूनि कीर्तयामि शृणु। तत्र लोके सर्वा काञ्चनी भूमिः अमृतसमानि जलानि हैमानि कमलानि मुक्तामयानि च पुलिनानि ईप्सित-दायी कल्पवृक्षः अन्यानि च अनेकानि विचित्राणि वस्तूनि दृश्यानि सन्ति अहं हैमानां कमलानां नालानभ्यवहरामि ' इति। एतच्छ्रुत्वा बकः 'शम्बूकाः किं तत्र सन्ति उत न' इति भूयोऽपि पप्रच्छ। नेति हंसे प्रतिब्रुवति बकः उच्चैर्विहस्य ' मानससरो नाम अतिरमणीयः प्रदेशः इति किल स्तौषि शम्बूकैर्विहीनस्य देशस्य का वा रमणीयता स्यात् त्वं तु तदनभिज्ञतया तत्रत्यानि वस्तून्युदाराणीति जल्पसि ' इति तमवाक्षिपत्। अतः सर्वोऽपि आत्मन इष्टानि वस्तूनि हीनान्यपि उदाराणि वदति। आत्म-नोऽनभिमतानि वस्तूनि महान्त्यपि हीनानि मन्यते ॥

### कथा ६४.

पुरा हिरण्यकशिपुर्नाम दैत्यः भुवं शासदासीत्। सः अमृतत्वं लिप्सुः ब्रह्माणमुद्दिश्य अनेकानि वत्सराणां सहस्राणि तपः तेपे। तेन तपसा प्रसन्नो ब्रह्मा 'तव को वर ईप्सितः' इति तं दैत्यं पप्रच्छ। स दैत्यः प्रार्थयत 'भगवन् देवानां मृगाणां मानुषाणाञ्च वध्यो मा भूवं मामेवमनुग्रहीतुमर्हसि ' इति। ' यथा प्रार्थयसे भवितुं तथैव भूयाः' इति प्रसन्न आशास्य ब्रह्मा स्वं लोकं ययौ। ततः स दैत्यः स्वराज्ये वर्तमानाः सर्वाः प्रजा आहूय मदते न कोऽप्यन्यो युष्माभिः पूजनीयः' इत्यादिश्य ताभिः



प्रत्यहं पूज्यमानः देवान् ब्राह्मणांश्च हिंसन् विष्णुभक्तांश्च वि-शेषतः पीडयन्नवर्तत। एतस्मिन् काले तस्य चत्वारः पुत्रा सम-जायन्त। तेषामेकतमः प्रह्लादः नक्तन्दिवं विष्णुमर्चयन् आसीत्। स दैत्यः पुत्रमन्तिकमानाय्य ' मम वैरिणं विष्णुं माऽर्चय ' इति मृदुभिः कटुभिश्च वचनैः अबोधयत्। एवमसकृत् पित्रा निर्ब-द्धोऽपि तद्वचनमप्रतिपद्य ' लोकेश्वरं विष्णुमेव पूजयेयं नान्यम् ' इति प्रह्लाद उदैरयत्। तच्छ्रुत्वा अतीव क्रुद्धः दैत्यः ' अरे तव इमां धियमुत्पादितवान् विष्णुः क्वास्ते दर्शय तमस्मिन्नेव क्षणे गृहीत्वा हन्याम् ' इति वदन् भीषणमट्टहासमकरोत्। प्रह्लादोऽ-वदत् ' तात विष्णुदेवस्य निवासस्थलमेतदिति कथं विवरीतुं शक्यते। स खलु सर्वत्र वर्तते ' इति। ततः स दैत्यः सभायां मध्ये स्थितं नवरत्नैः खचितं स्तम्भं प्रदर्श्य 'किमत्र विष्णुरस्ति, इति पप्रच्छ। 'अस्ति' इति प्रह्लादे उदीरितवति हिरण्यकशिपु-रतीव संरब्धः अरुणितलोचनः दन्तान् कटकटापयन् तं स्तम्भं हस्ततलेन आजघान। तमेव स्तम्भं भित्त्वा विष्णुः सिंहमुखं मनुष्यशरीरञ्चाऽऽस्थाय अरीणां भयावहयाऽऽकृत्या आविर्भूय दैत्यं गृहीत्वा उरो विदार्य रक्तमखिलं पीत्वा तं दैत्यं संहृत्य भक्तं प्रह्लादं ररक्ष। एवं विष्णुमाश्रितानां न किमप्यरिष्टं भवति ॥

### कथा ६५.

कस्यचित् सरसः तीरे कश्चिच्चिञ्चावृक्ष आसीत्। तस्मि-न्नेको बक उवास। स- अतिवृद्धः तस्मात् स्थानात् स्थानान्तरं

गत्वा आहारं सम्पादयितुमक्षमः तत्र सरसि स्थितान् मत्स्यान् भक्षयन् तस्मिन्नेव तरौ स्थित्वा प्रत्यहं तेन मार्गेणाऽऽगतान् पक्षिण आमन्त्र्य 'एतद्दिनमत्रावस्थाय मया सह सरसि लभ्यान् मत्स्यानशित्वा श्वो गच्छत' इत्यादरेण महता प्रार्थयत । ते पक्षिणः तमवलोक्य 'त्वमतिवृद्धोऽसि यदि वयमत्रावस्थाय सरसि विद्यमानान् मत्स्यादीनभ्यवहृत्य गच्छेम परेद्यवि त्वमाहारस्याऽनुपलम्भात् मरिष्यसि अतो वयमत्र न तिष्ठामः' इत्युक्त्वा अपागच्छन् । एवं स्थिते दैवात् भूम्यां महत् दुर्भिक्षमभवत् । एकैकत्राऽपि जलस्य नष्टतया विहङ्गमाः सर्वे महतीं चिन्तामापन्नाः 'उदकेन समृद्धं किञ्चित् स्थलं प्राप्य तत्र दुर्भिक्षमेतदतिवाहयाम' इति सम्मन्त्र्य श्रेणीभूय महता कोलाहलेन शरवत् अकुटिलं डयमानाः सर्वासु दिक्षु वृन्दशः असङ्ख्येयतया युगपत् संहताः वृद्धबकेनाऽध्युषितम् वृक्षमुपेत्य तमूचुः । 'अधुना दुर्भिक्षमागतं अस्मिन् सरसि जलं वत्सरेणैकेन शुष्येत् ततः परं त्वमाहाराऽभावेन मरिष्यसि तदद्यैव यद्यस्माननुयायाः क्षेमं लभेथाः तदेहि' इति । 'सम्यक् डयितुमशक्तोऽहं कथं युष्माभिः सह प्रयायाम्' इत्युक्त्वा 'यूयमत्र मम गृहे एकं दिनमुषित्वा परस्मिन्नहनि प्रतिष्ठध्वम्' इति स बकस्तानत्यर्थं प्रार्थयत । ते ऊचुः । 'यदि वयमत्राऽवतिष्ठेमहि एकेनैवाह्ना सरस्यस्मिन् विद्यमानाः सर्वे जलजन्तवः क्षप्येरन् ततः स्थविरस्त्वं स्थलान्तरं गन्तुमक्षमः आहाराभावादत्र म्रियेथाः । अतो वयं गच्छाम'



इति । एवं बोधितोऽपि स बकः तान् पक्षिणः पुनः पुनः दिनमेकमत्र वसत' इति निर्बन्धः । ततस्ते सर्वे तत्रावस्थाय सरः प्रविश्य सर्वान् जलजन्तूनभ्यवहृत्य वृद्धं बकमापृच्छ्य प्रययुः । तस्मिंश्च जलाशयेऽल्पीभवज्जलं पक्षिणां पादाहतिभिरालोडितम् द्वित्रैरेव दिनैः शोषमयात् । ततः स बकः तस्मात् स्थानात् स्थानान्तरं गन्तुमक्षमः आहाराभावेन अम्रियत । अतो न कोऽप्यतिव्ययं कर्तुमर्हति ॥

## कथा ६६.

विशालपुरे नाम नगरे कश्चित्पार्थिवो धर्मादनपयन् संविदमनुल्लङ्घयन् राज्यमकरोत् । तस्य शत्रुः कश्चित् तेन युयुत्सुः तन्नगरमवारुणत् । स शत्रुणा युद्धा पराजितः स्वनगरं हित्वा मन्त्रिणैकेनैवानुगतः प्रस्थाय अटवीं प्राप । तत्रापि शत्रुभयात् न क्वापि चिरं तिष्ठासुः कण्टकेष्वश्मसु च नग्नपादतया सञ्चरितुमक्षमः क्षुधया पिपासया चार्दितः इतिकर्तव्यतामजानन् चिन्ताक्रान्तः कस्यचित्तटाकस्य तीरे कञ्चित्कालमुपविश्य अस्यामपि घोरायामापदि आत्मानमविहायाऽनुगतं मन्त्रिणमालोक्य अश्रूणि मुञ्चन् अशोचत् । 'भोः मन्त्रिन् मम राज्यं नष्टं न मे अश्वा गजा रथाः शिबिका वा सन्ति । महत् कष्टमापतितं नातः परं जीवितुमुत्सहे। अगाधं जलमवगाहे । भृगोर्वा पतानि । प्रदीप्तमग्निं वा प्रविशानि । वरं मे मरणमिदानीं एषामन्यतमेन प्रकारेण' इति । एवं विलपन्तं राजानं श्रुत्वा सः

अमात्यवर्यः सान्त्वयन्नब्रवीत् । 'देव कालवशादस्माकं राज्यं विनष्टं पश्यामि न किमपि प्रयोजनं अनेन मरणे अध्यवसायेन । ये अस्माकं शत्रवो राजानः तेषामपि वैरिणः सन्ति । एतैः सख्यं विधाय सेनां सन्नाह्य युद्धे शत्रून्निपात्य राज्यं पुनर्वशीकरवाम। नष्टं राज्यं न पुनर्लप्स्यत इति कोऽत्र निश्चयः । अमावास्यायां चन्द्रः सर्वाभिः कलाभिर्विहीनः क्षीयते । स एव चन्द्रः पुनश्च शुक्लपक्षे वृद्धिं किं न प्राप्नोति। एवमेव अस्माकमभ्युदयकाले सम्प्राप्ते देवस्य प्रसादेन सर्वेऽपि मनोरथाः सेत्स्यन्ति' इति। अनेन वचनेन सान्त्वितः चिन्तां हित्वा राजा धृतिमवाप । अनुरूपेण च उद्यमेन प्रभूतं बलं सन्नाह्य पुनश्च शत्रुभिर्युद्ध्वा तान्विद्राव्य राज्यं वशीकृत्य तत्राभिषिक्तः मन्त्रिणा सह तत्सुखेन चिरं शशास। अतो राज्ञां समीपे धीमद्भिर्मन्त्रिभिर्भाव्यम् । ते ह्युपस्थिताः सर्वा अप्यापदः उचितैरुपायैर्वारयितुं शक्नुवन्ति ॥

## कथा ६७.

सुभद्रपुरे नाम पत्तने त्रीणि शतानि गृहाणि बभूवुः । तेषु वसन्तः सर्वेऽपि भाग्यवन्त आसन्। ते बहुभूमिकान् प्रासादान् निर्माप्य तत्रातिथीन् पूजयन्तः सुखेनावर्तन्त । तेषां प्रतिवेशी असल्लोष्टो नाम ब्राह्मणो बभूव। अतिदरिद्रस्य तस्य बहवः पुत्राः स्नुषाः पौत्राः पुत्र्यश्च अवर्तन्त। स प्रत्यहं तानि त्रीणि शतानि गृहाणि गत्वा भिक्षां गृहीत्वा तृतीये यामे स्वगृहमागत्य अभ्यवहरति । एवं स्थिते एकदा पार्वती परमेश्वरश्च आकाशपथे



सञ्चरन्तौ तस्य ग्रामस्य उपरिष्टादागच्छताम् । तत्र विमानं स्थापयित्वा तत्र त्रिषु शतेषु गृहेषु जनान् भाग्यवतः एकस्मिन् केवलं गृहे ब्राह्मणं दरिद्रं अशितव्यस्य वसितव्यस्य च कृते उपायेन केनापि विना स्थितं वीक्ष्य पार्वती देवी 'ब्राह्मणायास्मै भाग्यं किञ्चिद्देयम्' इति परमेश्वरमवदत् । तच्छ्रुत्वा हसन् परमेश्वर उवाच 'एष विप्रो दुष्टाशयः यद्यस्मै भाग्यं दीयते नायं तेन सन्तुष्येत्। अत्रत्यानां जनानां सर्वेषां हिंसैव केवलं अनेन उत्पाद्येत' इति। 'यत् किञ्चिद्भागधेयमस्मै दीयताम्' इति देव्या निर्बद्धयोक्तः तथेति प्रतिश्रुत्य परमेश्वरो देव्या सह यावद्भूमिमवातरत् तावदयं ब्राह्मणः तत्र तत्र भिक्षां गृहीत्वा तण्डुलान् मुद्गान् माषान् आढकीः लवणं बृहन्मरीचानि अम्लं मरीचानि सर्षपान् जीरकान् मेथिकाः शाकांश्च वस्त्राञ्चले तत्र तत्र पिनह्य ग्रन्थीन् कृत्वा कक्षे निवेश्य मध्याह्नस्याऽऽतपे प्लुष्टचरणः महता खेदपूरेण आप्लावितः श्रमेण निःश्वसन्नागच्छत् । तदा तमाहूय परमेश्वर उवाच। 'भोः किमिति एवं कष्टमनुभवसि । अहं तुभ्यमेकं रत्नं प्रयच्छामि तत् त्वया पूजितं तुभ्यमीप्सितम् दद्यात् । त्वत्तोऽपि द्विगुणं तव प्रतिवेशिभ्यः त्रिषुः शतेषु गृहेषु वसद्भ्यः च प्रयच्छेत्' इति एतावदुक्त्वा ब्राह्मणाय रत्नं दत्वा भगवानन्तर्दधे । स ब्राह्मणस्तद्रत्नं गृहीत्वा गृहमेत्य स्नात्वा रत्नं पूजयित्वा 'मम धान्यस्य शतं कुम्भाः मुद्गस्य दश कुम्भाः शतं गावः हैमः एकः सौधश्च भवन्तु' इति प्रार्थयत ।

प्रतिवेशिनां तु द्विगुण-

एकयैव रात्र्या प्रार्थितं सर्वमासिध्यत् । प्रतिवेशिनां तु द्विगुणमेतदभवत् । एतद्दृष्ट्वा आत्मना भाग्यमुपमनतमिति ब्राह्मणस्य सन्तोषो नैव बभूव । प्रतिवेशिनः पूर्वतोऽपि आढ्यतराः संवृत्ता इतीर्ष्यया स दह्यमान एवासीत् । ततः स रत्नं पुनः पूजयित्वा 'मया पूर्वस्मिन्दिने लब्धं सर्वं नश्यतु' इति प्रार्थयत । तथैव सर्वं तदीयमनश्यत् । प्रतिवेशिनां तु न केवलं सौधादिकमनश्यत् । तद्गताः सर्वेऽपि जना अम्रियन्त । अनेन प्रातिवेशिनामुच्छेदेन ब्राह्मणस्य ईर्ष्या शशाम । अथ कदाचित् पार्वतीपरमेश्वरौ तं देशमागत्य तेन ब्राह्मणेन उत्पादितं प्रजानां कष्टं ज्ञात्वा तस्माद्रत्नमपनीय तत्रत्यान् उज्जीव्य पूर्ववत् भाग्यवतः कृत्वा निववृताते । स ब्राह्मणो यथापूर्वं भिक्षामटन्नासीत् । एवमितरेषामृद्धिमसहमानस्य किमपि न ऋध्यति ॥

### कथा ६८.

विन्ध्यपर्वते कस्मिंश्चिन्न्यग्रोधपादपे शुकदम्पती न्यवसताम् । तयो रामो लक्ष्मण इति द्वौ शावकौ अभवताम् । व्याधः कश्चिदेकदा जालं प्रसार्य तौ शावकौ गृहीत्वा गोदावर्याः तीरे ब्राह्मणाय कस्मैचिद्रामं सौनिकाय कस्मैचिल्लक्ष्मणञ्च व्यक्रीणीत । तावुभावपि क्रेतारौ शुकशावकौ स्वं स्वं गृहं नीत्वा तावालापयन्तौ महता प्रेम्णा अवर्धयताम् । अत्रान्तरे शावकयोः पितरौ वृद्धौ शुकौ पुत्रयोरदर्शनेन दुःखितौ किङ्कर्तव्यमित्यजानन्तौ कतिचिद्दिनानि यापयित्वा पश्चात् 'पुत्रावन्विष्याव' इति



निवासवृक्षात् प्रस्थाय गिरिषु वृक्षेषु तटाकेषु ग्रामेषु कूपेषु वापीषु नदीषु आरामेषु कुञ्जेषु गृहेषु गोष्ठेषु देवालयेषु सौधेषु प्रासादभूमिकासु तत्र तत्र च नक्तन्दिवं मृगयमाणौ केनचित्कालेन गोदावर्यास्तीरमागत्य तत्र ब्राह्मणस्य गृहे सौनिकस्य गृहे च मधुरमधुरं जल्पन्तौ पञ्जरस्थौ पुत्रौ दृष्ट्वा आनन्दितेन हृदयेन ब्राह्मणस्य समीपमागत्य तस्य पादौ प्रणम्य तौ शावकावात्मनः पुत्राविति तस्मै न्यवेदयताम् । स ब्राह्मणस्तौ वृद्धशुकावादरस्य आत्मानः समीप एव कञ्चित्कालमवस्थाप्य आत्मना वर्धितं रामं नाम शुकं सौनिकात् केनचिन्मूल्येन गृहीतं लक्ष्मणं नाम शुकमपि पितृभ्यां समयोजयत् । ततः तौ वृद्धौ शुकौ पुत्रौ गृहीत्वा स्वीयं स्थानमासाद्य कञ्चित् कालं सन्तुष्टौ नीत्वा शरीरमत्यजताम् । ततः परं रामशुकस्य लक्ष्मणशुकस्य च एकत्र सह वस्तुमशक्यतया तयोः प्रथमः तस्मात् स्थानात् योजने कस्यचिदाम्रतरोः शाखायां नीडं विरचय्य निवासमकरोत् । तस्मिन् काले ब्राह्मणः कश्चित् गङ्गायां सिष्णासुर्गच्छन् आतपेन क्लान्तः लक्ष्मणशुकेनाध्युषितस्य वृक्षस्य छायायां विश्रमितुकाम आगच्छत् । तं दृष्ट्वा लक्ष्मणशुकः अन्यान् पक्षिण आहूय 'इह पश्यत मानुषसङ्काशः कश्चिदायाति तस्य चक्षुषी विदारयत गलं भित्त्वा अश्नाम' इति विचुक्रोश । तं विक्रोशरवं श्रुत्वा ब्राह्मणः त्रस्तः तत्रातिष्ठन् पलाय्य यावद्रामशुकेन अध्युषितं तरुमभ्यागच्छति तावत्तं दृष्ट्वा शुकोऽयं अन्यान् शुकान् प्रति

'कोऽपि ब्राह्मणः श्रान्तः अभ्यागतः। तरुणपल्लवान् भूमौ संस्तृणीत यत्राऽयं सुखेन उपविशेत् फलान्याहृत्य अवक्षिपत अभ्यवहरतु तान्यतिथिरयम्' इति तारमवदत्। एतच्छ्रुत्वा प्रीतः ब्राह्मणः पप्रच्छ। 'प्रथमं कश्चित् शुकः मारयतेति रौति त्वं तु एवं रौषि किमेतत्' इति। एवं पृष्टः शुकः प्रत्यवदत् 'आवां भ्रातरौ स्वः। अहं ब्राह्मणस्य गृहे वर्धितोऽभूवं तत्र सर्वदा ब्राह्मणमतिथीनुपचरन्तं दृष्टवानहम्। अतो मे बुद्धिरेवं प्रवर्त्तते। स च शुकः सौनिकस्य गृहे पोषितः अजान् मेषान् गाश्च हन्यमानान् दृष्टवान्। अतस्तस्य बुद्धिस्तथा प्रवर्त्तते इति। एवं दुःशीलाः पूर्वे वयसि यां दुर्बुद्धिमधिगच्छन्ति सा सदैवताननुवर्त्तते। वृद्धानामपि तेषां दुर्बुद्धिर्नापैति। सुबुद्धिश्च नावतरति॥

## कथा ६९

महिलापुरे नाम पत्तने कश्चित् वणिक् बभूव। तस्य चन्द्रमुखी नाम भार्या आसीत्। तयोश्च पुत्रः सुमतिर्नाम अजायत। तस्मिन् कुमारे पञ्चवर्ष एव स वणिक् पञ्चत्वं प्राप। तस्य भार्यायाः पुत्रस्य च रक्षिता न कोऽप्यासीत्। अतः सा पुत्रमादाय पत्युः सखायमन्यं वणिजमुपेत्य तस्मै सर्वमात्मवृत्तान्तम् न्यवेदयत्। स तावदस्य आत्मनो गृहे वासयित्वा अन्नवस्त्रे ददद्रक्ष। स बालः कतिपयैरेव दिनैः वाचने लेखने गणने च पटुः समवर्त्तत। तदा तस्य माता तं सम्बोध्यावदत्। 'त्वमिदानीं विद्यासु समर्थोऽसि इतः परं यां काञ्चित् वृत्तिमाश्रित्य जीवितु-



मर्हसि अस्य वणिजो गृहे क्नतुं न युज्यते। अस्माकं पूर्वपुरुषाः चिराय वाणिज्येन वृत्तिमकुर्वन् त्वमपि यदि तद्वदाचरेः शोभनं भवेत्। एतदर्थं त्वया यत् कर्तव्यं तद्वच्मि श्रृणु। अस्य नगरस्य समीपे कुण्डिनपुरं नाम पत्तनं वर्त्तते। तत्र धर्मपालो नाम वणिगास्ति स सजातीयं यं कञ्चिदात्मनः सकाशमागतमादृत्य तस्मै वाणिज्यार्थमपेक्षितम धनं ददाति ततस्त्वं तस्यान्तिकं गत्वा यदि तमाश्रयेः सुखं प्राप्स्यसि' इति। ततः स कुमारः मातरमापृच्छ्य प्रस्थाय अस्य वणिजो गृहमेयाय। तदा स वणिक् पूर्वमात्मनः सकाशात् बहुकृत्वो धनमादाय निःशेषं क्षपयित्वा पुनश्च धनं किञ्चिद्याचितुमागतं कञ्चित् वैश्यं संबोध्य 'भोः अद्यावधि याचमानाय तुभ्यं धनमदिषि। त्वमल्पमप्यायमनर्जन् सर्वं धनं क्षपयित्वा पुनश्च धनं याचितुमागतोऽसि। बुद्धिमान् जनः मृतमूषिकमपि मूलधनं कृत्वा तस्य प्रयोगेण भाग्यमधिगन्तुं किं न शक्नोति। त्वमनर्होऽसि अतो न दित्सामि भूयः किञ्चिदपि तुभ्यम्' इति तं उपालभमान आसीत्। स कुमारकः सर्वं तद्वचनमाकर्ण्य वणिजमभ्येत्य ययाचे 'तं मृतं मूषिकं मह्यं दातुमर्हसि' इति। स वणिक् 'मां परिहसितुमयमागतः' इति कुपितः तस्मा एवं मृतं मूषिकं दत्वा 'गम्यताम्' इत्युवाच। ततः स कुमारः तं मृतं मूषिकं गृहीत्वा आपणे तं क्रय्यतया प्रकाश्य यावत् प्रतैक्षत तावत् कश्चित् पुरुषः आत्मना वर्ध्यमानस्य बिडालशिशोराहारस्यकृते तं मृतमूषिकं ईषत्क-

थितानां चणकानां मुष्टिना चिक्राय। ततः स बालः तं चणक-मुष्टिमादाय पानीयं चाहृत्य कस्यचित् ग्रामस्य समीपे रूढस्य तरोः छायायामुपविश्य तेन मार्गेण गच्छद्भयः श्रान्तेभ्यः काष्ठभारिभ्यः चणकमुष्टेः किञ्चित् पानीयात् किञ्चिच्च ददद्वर्तत। ते च काष्ठभारिणः अर्धक्वथितांस्तांश्चणकान् जग्ध्वा पानीयञ्च पीत्वा तृषामपनीय प्रस्थास्यमानास्तस्मै एकैकं काष्ठं स्वभारेभ्यो निष्कृष्य ददुः। तस्मिन्दिने आत्मने वितीर्णानि काष्ठानि विक्रीय लब्धेन धनेन अर्धक्वथितांश्चणकान् क्रीत्वा तस्यैव तरोस्तले उपविश्य पुनश्च काष्ठभारिभ्यश्चणकान् ददद्वर्तत। ते च तस्मै एकैकस्माद्भारात् एकैकं काष्ठमाकृष्य ददत आसन्। एवं केन-चित् कालेन स महान्तं काष्ठनिचयमधिगम्य तद्विक्रयाल्लब्धेन धनेन तत्रानीतान् सर्वान् काष्ठभारान् क्रीत्वा स्वगृहमनयत्। तस्माद्दिनादारभ्य अष्टौ दिनानि यावत् अनारता वृष्टिरभवत्। तेन तस्मिन् पत्तने सर्वत्र इन्धनमसुलभमभवत्। ततः अयं बालकः सङ्गृहीतान् काष्ठभारान् महता मूल्येन विक्रीय प्रभूतं धनं लब्ध्वा सुखेन अवसत्। अतो बुद्धिमान् जनः यथा कथञ्चित् सुखं लभते॥

## कथा ७०.

वीरमहेन्द्रो नाम कश्चिद्राजा बभूव। तस्य समीपे बहवो विद्वांसोऽवर्त्तन्त। तेषु भर्जुः तर्के व्याकरणे शास्त्रेष्वन्येषु च विशारद आसीत्। परन्तु लौकिके व्यवहारे अत्यर्थमकुशलो



बभूव। इतरे सर्वेऽपि विद्वांसः शास्त्रेष्वनिष्णाता अपि लौकिकं व्यवहारं सम्यगजानन्। अतः शास्त्रज्ञवदेव राज्ञा सह सर्वदा भाषमाणा अभवन्। भर्जुः अतीव सात्त्विकः राज्ञा पृष्टस्य केवलं प्रतिवचनमददात्। वृथा न किञ्चिदप्यभाषत। सर्वेषु शास्त्रेषु निष्णाततया भर्जुः सर्वेषां विदुषां महिष्ठ इति विदित्वा तस्मिन् राजा महतीं प्रीतिमदर्शयत्। एतामर्हणां दृष्ट्वा असहिष्णुतया इतरे विद्वांसः राज्ञः समक्षमेव भर्जुमधिकृत्य परीवादान् कर्त्तु-मारेभिरे। अभिज्ञस्तु राजा तैः कृतान् परीवादाननादृत्य भर्जौ महता गौरवेण व्यवाहरत्। ततस्ते विद्वांसः एकत्र मिलित्वा सम्मन्त्र्य राजगृहस्य द्वाःस्थमुत्कोचैरावर्ज्य तेन राजगृहस्य अन्तर्भर्जोः प्रवेशं न्यवारयन्। एवं चतुःपञ्चेषु दिवसेषु गतेषु राजा विदुषः सम्बोध्य 'भर्जुः केन निमित्तेन चतुः पञ्चानि दि-नानि नायातः इति पप्रच्छ। 'वयं एतन्न जानीमः श्वः अवधार्य निवेदयामः' इति विद्वांसः प्रत्युच्य परेद्यवि राजानमेत्य 'देव भर्जोः शरीरं सुस्थं न वर्त्तते ज्वरस्तमर्दयति' इत्यावेदयन्। ततो राजा आत्मनः पार्श्वस्थान् भिषज आहूय 'ज्वरार्तं भर्जुं दृष्ट्वा औषधं दत्वा निवर्त्तध्वम्' इत्यादिश्य प्रास्थापयत्। भिषजस्ता-नपि विद्वांसस्ते उत्कोचेन वशीचक्रुः। ततस्ते भिषजः प्रत्यहं राज्ञो निकटमेत्य 'भर्जोः शरीरमेकस्मिन्दिने सुस्थं वर्त्तते परस्मि-न्दिने अस्वस्थं भवति अन्यस्मिन्दिने रोगः प्रबलः संवर्त्तते' इति विज्ञापयन्त आसन्। एवं बहुषु दिनेषु गतेषु एकदा राजा भर्जुं

प्रातिष्ठत । तदा विद्वत्स्वेकः दृष्ट्वा निवर्त्स्यामीति शिबिकामारुह्य प्रातिष्ठत । तदा विद्वत्स्वेकः अतिदुःखितो राजान्तिकमागत्य 'देव भर्जुरद्यैव अमृत' इत्यावेदयत् । तच्छ्रुत्वा राजा भृशं दुःखितः 'मृतमपि वा भर्जुं दृष्ट्वा निवर्त्स्यामि' इत्युक्त्वा निराजिगमिषत् । ततो विद्वांसः राज्यस्य पालयिता देवो मृतं न द्रष्टुमर्हतीत्यवदन् । तद्वचनं निरसितुमक्षमो राजा स्वगृहं निवृत्य भर्जुमरणं भृशमशोचत् । ततः ते विद्वांसः शनैः शनैः राज्ञो मनोगतं शोकमपानुदन् । भर्जुस्तु विद्वद्भिरात्मानं प्रति आचरितानि छलानि ज्ञात्वा एकदा राज्ञो नगरान्निर्गमनसमयं प्रतीक्ष्य केनाप्यदृष्टः मार्गस्थं कश्चिदश्वत्थमारूढः समीपमागतं राजानं सम्बोध्य 'भो महाराज इमे विद्वांसः सर्वे मां द्विषन्तः मम त्वदन्तिके आगमनं निवार्य अहं मृत इति मिथ्या आवीविदन् । महाराजो मां रक्षितुं अर्हति,' इत्युच्चैरक्रोशत् । एतस्मिन्काले विद्वांसस्ते सर्वेऽपि समीप एवासन् । तस्य वचांसि राजा माश्रौषीदिति राज्ञ आशिषं प्रयुञ्जाना इव उच्चैर्मन्त्रानुदीरयितुमारेभिरे । तानि भर्जोर्वचनानि श्रुत्वा 'इमानि भर्जोर्वचनानीव भान्ति । तदीयानि वा नवा' इति विमृशन्तं राजानं संबोध्य पुनर्भर्जुरात्मनो वृत्तान्तमावेदयितुं आरभत । तदा ते विद्वांसः राजानं प्रति 'भो महाराज मृतो भर्जुः पिशाचीभूय अश्वत्थमिममधितिष्ठति तस्य वचांसि न श्रोतव्यानि' इत्युक्त्वा पिशाचसंभाषणेन उत्पत्स्यमानां पीडां परिहर्तुकामा विभूतिमभिमन्त्र्य राज्ञे ददुः । ततः परं भर्जुः राज्ञा सह संभाषितुं



अवकाशं नैवालभत । एवं राज्ञः समीपे किञ्चिज्ज्ञा विद्वांसः यदि स्युः ते राजानमितरैः समर्थैर्विद्वद्भिः न संयोजयन्ति ॥

## कथा ७१.

कश्चिद्गृहपतिः आत्मीयपाचकस्य हस्ते आम्रद्वयं न्यस्य 'अस्मिन् दिने मदीयः सुहृत् कश्चिदायास्यति । त्वचमपनीय फले शकलीकुरु । सुहृद्यदाऽऽगच्छति तदा शकलान्यावयोर्विभजे' त्यादिशत् । पाचकोऽपि तथैव शकलीकृत्य कथं स्वदेत पश्यामीति शकलमेकमास्ये निक्षिप्य पर्यैक्षत । तदतिस्वादु उपलभ्य ज्ञातास्वादो बिडाल इव कर्तव्याकर्तव्यमनालोच्य शिष्टानि अपि फलशकलानि स्वयं अभक्षयत् । ततः कतिपयैरेव निमेषैः गृहस्वाम्यागत्य 'फले किं शकलीकृते' इत्यपृच्छत् । स पाचकः 'निस्त्वचीकरणेऽपि नोपकरोतीयं छुरी' इति कुण्ठितधारां छुरीं स्वामिनो हस्ते न्यवेशयत् । तामादाय गृहपतिः क्ष्णवितुमारेभे । एवं व्यापृते स्वामिनि पाचकः गृहस्य बहिर्द्वारमागत्य सद्य एव उपस्थितं स्वामिनः सुहृदं वीक्ष्य 'आर्य न वेद्मि त्वामहं किमित्यविमृश्येहाऽऽगतोऽसि । केनापि कारणेन तुभ्यं क्रुद्धो मत्स्वामी तव कर्णौ कर्तितुं त्वामत्राकारितवान्' इत्युक्त्वा कवाटविवरस्य द्वारा छुरीं क्ष्णुवन्तं गृहस्वामिनमदर्शयत् । तद्दृष्ट्वा पाचकस्य वचःश्रद्दधानः स सुहृत् पलायितुमारभत । तदा पाचकः गृहपतिं प्रति 'त्वत्सुहृत् फले द्वे गृहीत्वा इतः पलायते' इत्युच्चैरशब्दयत् । स च गृहस्वामी गृहान्निर्गत्य छुरीमुद्यम्य प्रदर्श्य

'फलमेकमर्पय' इति विवक्षन् तं सखायं तारस्वरेण आमन्त्र्य 'एकं एकमात्रं एकमेव' इति क्रोशन् अन्वधावत्। एकमेव कर्णं छेत्तुमिच्छतीति मत्वा स द्रुततरं पलायत। गृहस्वामी किञ्चिद्दु-रमनुधाव्य सखायमासादयितुमक्षमः गृहं प्रति निववृते। पाचक आत्मनो धूर्ततां स्मृत्वा स्मृत्वा भृशमाननन्द ॥

कथा ७२.

कस्मिंश्चित् स्तेने गृहं किञ्चित् लुण्ठति गृहजनः प्रबुध्य 'स्तेनः स्तेनः' इत्युच्चैः शब्दमकरोत्। तदा स्तेनः पलायत। प्रातिवेशिनः सर्वेऽप्युत्थिताः स्तेनमद्रावयन्। उपायमन्यमपश्यन् 'केनापि गृह्येय' इति भयात् महता वेगेन पलाय्य मार्गमध्ये शयानं कञ्चिद्व्याघ्रमासाद्य तं हस्ताभ्यामालम्ब्य तत्पृष्ठमधिरूढः पद्भ्यामाहत्य तं व्यद्रावयत्। व्याघ्रोऽपि सहसा प्रबुध्य 'घोरः कश्चिद्वेतालो मामारुक्षत्। यदीदानीं न पलायेय स मामसंशयं हन्यात्' इति त्रस्तः तीव्रेण वेगेन स्तेनं वहन्नधावत्। तदधि-रूढः स्तेनः बहिर्ज्योतिषां प्रकाशेन आत्मनो वाहनं व्याघ्र इति बुद्ध्वा 'कुत्राऽपि मां विदितमात्रं व्याघ्रोऽयं हन्यात्' इति त्रासात् पुनः पुनस्तं पद्भ्यामाघ्नन् विद्राव्य मार्गे शिरस उपरिष्टाल्लब्धां तरुशाखामवलम्ब्य वृक्षमारुरोह। पृष्ठगतो वेतालोऽपक्रान्त इति ज्ञात्वाऽपि तेन पुनरप्यास्कन्दनं सम्भवेदिति बलवदाशङ्क्य तीव्रतरेण वेगेन पलायमानो व्याघ्रः जम्बुकेन केनचिदभिमुखमागतेन अपृच्छ्यत। 'आर्य व्याघ्र प्राणानायम्य तीव्रेण वेगेन



धावन्निव लक्ष्यसे किमत्र कारणं भवेत्' इति। 'भोः भ्रातर्जम्बुक किं ब्रवीम्यद्भुतम्। प्रभातात् पूर्वं रात्र्याश्चतुर्थे यामे शयित्वा निद्राणं मां वेतालः कश्चिदधिरुह्य तदा प्रभृति इमं क्षणं यावत् आत्मानं मया अविरतमवीवहत्। तस्य पादाघातैः मम उभे अपि पार्श्वे कियदुदश्वतां पश्य। अनारतेन पलायनेन मे पादा अवसन्ना रुजायमाणाः समवृतन् स धार्मिक इति वच्मि। यन्मामनिगीर्य सजीवमत्याक्षीत्। एतदेव मे भाग्यम्' इत्युक्त्वा व्यरमत्। तच्छ्रुत्वा जम्बुकः 'कथमियांस्ते मतिभ्रमः सञ्जातः किमदृष्टचरमश्रुतपूर्वमभिनवसृष्टं वेतालमद्यावापः? कृतं कृतम-नेन चित्तविभ्रमेण कश्चिन्मायावी मानुषस्त्वामृजुं बुद्ध्वा एवमु-पद्रुतवानिति मन्ये। अहं गत्वा निपुणं निरीक्ष्य तं वञ्चकं गृहीत्वा तव हस्ते समर्पयामि पश्य मे बुद्धिकौशलं' इति उक्त्वा तेन वेतालेनाधिरूढस्य वृक्षस्य लक्षणानि अवधार्य तत्र जगाम। इतःपूर्वमेव स स्तेनः वृक्षादवरुह्य आसन्नं जीर्णदेवालयं प्रविश्य द्वारं पिदधे। जम्बुको मनुष्यमनुपलभ्य कदाचिन् देवालये निलीनः स्यादिति मत्वा कपाटमपसारयितुं प्रायतत। तदा कपाटः अश्मवद्दृढः उद्घाटयितुमशक्योऽभवत्। तदा पाश्चात्य-चरणाभ्यां कपाटं किञ्चिदुत्थाप्य जनितेन विवरेण वालमन्तः प्रवेश्य तेन कपाटस्यार्गलमपवोढुं व्यवास्यत्। तदा अन्तः निलीनः स्तेनः 'मायावी जम्बुक आगतः इतः परं हत एवास्मि' इति भीतभीतः जम्बुकस्य वालं हस्तेन दृढं गृहीत्वा बलवदाच-

स्तेनेन बहिश्च जम्बुकेन बलादाकृष्यमाणो कर्ष । देवालयस्यान्तः वालः समूल उदपाट्यत । तदा रुधिरप्रवाहेण प्रस्रवता घोरं त्रास्यमानो जम्बुकः पलाय्य व्याघ्रमुपेत्य ‘ आर्य व्याघ्र न स वेतालः परं तु वालच्छेद्येव पश्येतः ’ इत्यात्मनो वालच्छेदं दर्शयित्वा सर्वमात्मवृत्तान्तं व्याचष्ट । तच्छ्रुत्वा व्याघ्रः ‘ भाग्यवशादहमापदो मुक्तोऽद्य जीवामि ’ इति मुदितः सुखेन शिश्ये ॥

## कथा ७३.

तर्कविद्यायामनल्पं नैपुणमधिगतवान् पण्डितः कश्चित् चक्रं तिलैरापूर्य प्रवर्त्तयतः तैलिकस्य कस्यचिद्गृहं तैलं क्रेतुं ययौ । तैलमुन्माय पात्र्यां निषिञ्चन्तं तैलिकं सम्बोध्य ‘ भद्र चक्रमाकर्षतः अनडुहः ग्रीवायां किमर्थं घण्टां आभान्त्सीः ’ इति तार्किकः पप्रच्छ । तैलिकोऽवदत् ‘ आर्य असकृद्गृहाभ्यन्तरमेत्य कर्म कुर्वन्नपि चक्रं प्रवर्त्तयन्नेवास्मि । यदा घण्टाया ध्वनिः श्रूयमाणो भवति तदा अनड्वान् चक्रं पर्येतीति ज्ञायते ध्वनौ विरते अनड्वानगच्छंस्तिष्ठतीति विदित्वा तं चोदयामि ’ इति । तार्किको भूयोऽपि पर्यपृच्छत् । ‘ अनड्वान् यदि तिष्ठन्नेव मुखं चालयेत् किं घण्टाध्वनिर्न श्रूयेत । तदा चक्रस्य गमनमगमनं वा कथं ज्ञायेत ’ इति । ‘ तावतीं तर्कविद्यां अस्मदीयोऽनड्वान् नाद्याप्यभ्यस्तवान् ’ इति तैलिके प्रत्यूचाने पण्डितः लज्जया शिरः अवनमय्य गृहं निववृते ॥



## कथा ७४

कश्चिद्वणिक् विदेशान्निवर्त्तमानः मार्गस्य मध्ये कस्याश्चिदटव्यां अवतीर्य अश्वं कस्मिंश्चित्तरौ बद्ध्वा अन्तिके सरसि स्नानमकरोत् । तस्मिन्नेव काले कश्चित्तुरुष्कः तदेव सर आगत्य आत्मीयं क्षाममश्वं तस्मिन्नेव तरौ बन्धयन् अगच्छत् । ‘ भोः मदीयोऽश्वो दुष्टो दुर्दमश्च तस्मिन्नेव तरौ बध्यमानं तवाश्वं पद्भ्यामाहत्य दंष्ट्वा मारयेत् । ततोऽन्यस्मिंस्तरावश्वं बधान ’ इति तुरुष्कं प्रति वणिगुच्चैरशब्दयत् । ‘अपेहि रे श्रेष्ठिन् किमयं वृक्षः त्वत्पितामहेन वर्धितः वृथा माक्रोशीः’ इति वदन् तस्मिन्नेव वृक्षे स्वीयमश्वं बद्ध्वा स तुरुष्कः सरोऽवतीर्य जलस्य समीपे पाथेयं भुञ्जान आसीत् । गतमात्र एव तुरुष्के तदीयः अश्वः पाश्चात्यखुराभ्यां भूमिं विदार्य वणिगश्वमपि रजः उद्भावितुं प्रावर्त्तत । तद्दृष्ट्वा हसन् तुरुष्कः स्वीयस्य अश्वस्य कौशलं मनसा श्लाघमानः पाथेयस्य भक्षणे व्यापृतो यावन्न पुनर्निववृते तावदेव उभावप्यश्वौ परस्परमास्कन्द्य आहत्य दंष्ट्वा अयुध्येताम् । युद्धे च तुरुष्कस्य अश्वो मृत पपात । एतदवलोक्य ‘ मम अश्वं प्रत्यर्पय ’ इति वदन् तुरुष्को वणिजा कलहमकरोत् । ‘ नैव प्रत्यर्पयामि प्रत्यर्पणे न कोऽपि हेतुरुपलभ्यते ’ इति वणिक् स्पष्टमवदत् । तुरुष्कः समीपस्थं नगरं प्राप्य प्राड्विवाकाय आत्मीयस्य अश्वस्य वणिजोऽश्वेन वधमावेदयत् । प्राड्विवाको वणिजमानाय्य ‘ तुरुष्कस्य अश्वं स्वीयेन अश्वेन किमित्यमारयः ’ इति पप्रच्छ ।

आवेदयिष्यमाणमर्थं इमे सभ्या न प्रतीयुः
वणिक् तु 'मया
साक्षी च न विद्यते किं करवाणि' इति चिन्ताकुलः किमपि
प्रतिवक्तव्यमप्रतिपद्यमानः स्तब्धजिह्वस्तूष्णीं तस्थौ। तद्दृष्ट्वा
धर्माधिकरणिकः 'मूकवदयं किमप्यब्रुवन् वर्त्तते अवागिव प्रति-
भाति' इत्यवदत्। तदा तुरुष्कः "आर्य एषः अधुना छलमेवा
चरति सम्यक् वक्तुं क्षमते। तदा सरसः तीरस्थे वृक्षे अश्वं
मयि भन्त्स्यति "भो मदीयोऽश्वो दुष्टो दुर्दमोऽतिसाहसी च
त्वदीयमश्वमन्यास्मिंस्तरौ बधान' इति योजनस्थोऽपि यथा शृ-
णुयात् तथा उच्चैः कर्णभेदिनमाक्रोशमकरोत्" इति यथावृत्तं
स्वयमेवाकथयत्। एतच्छ्रुत्वा प्राड्विवाकः अर्थिनैव प्रत्यर्थिनः पक्षे
साक्ष्यमुच्यमानं बुद्ध्वा तुरुष्कमवदत्। "'मा बधान' 'मा बधान'
इति वणिक् त्वां न्यषेधत् किल। तत्त्वमात्मवचनेनैव ऊरीकरोषि
इतः परं वणिजि न कोऽपि दोषः पातयितुं शक्यते निषिद्धोऽ-
पि तत्रैव तरावश्वमबध्नाः खलु। अतः त्वमेव आत्मना कारितं
नाशं सोढुमर्हसि" इति। एवं न्याये निर्णीते तुरुष्कः शिरोऽवन-
मय्य लज्जितः विवर्णमुखः कुञ्चिताङ्गः शनैः शनैः स्वगृहं ययौ॥

## कथा ७५.

नासिकापुरे चत्वारस्तूलविक्रायिका आसन्। ते गृहमेकं
परिक्रीय तत्र क्रीतांस्तूलभारान्निक्षिप्य सम्भूय वाणिज्यमकुर्वन्।
तस्मिन् गृहे उन्दुरवो बहुलीभूय तूलभारान्दष्टुमारभन्त। तेषा-
मुपद्रवमसहमानास्ते सर्वे संयुज्य बिडालमेकं क्रीत्वा तस्मिन्



गृहे अवधेयन्। तेषामेकैकोऽपि तस्मिन् बिडाले आत्मनो वा-
त्सल्यं प्रदर्शयितुं बिडालचरणेष्वेकमेकमात्मीयं परिकल्प्य तं
कठकादिभिरलङ्कारैरभूषयत्। केनचित् कालेन भूषणानां घर्षणेन
बिडालस्य एकश्चरणो व्रणितोऽभवत्। व्रणितस्य चरणस्य अभि-
मानी वणिक् व्रणं विरोपयितुं चरणाद्भूषणान्यपनीय तं स्नेहा-
क्तेन वस्त्रखण्डेन अवेष्टयत्। अथ एकदा रात्र्यां स बिडालः
दीपस्य पृष्ठतो निगूढोऽवस्थाय पुरतः क्रीडन्तमुन्दुरुं सहसा
आस्कन्द्य अजिघृक्षत्। तदा बिडालस्य चरणे वेष्टितं खण्डवस्त्रं
दीपज्वालया सङ्क्रम्य दीपितमभवत्। बिडालश्च वेष्टनमवधावितुं
कमप्युपायं नापश्यत्। ततश्च यथा यथा दाहोऽत्यरिच्यत तथा
तथा अतिमात्रं त्रस्तो बिडालः गृहे कोणात्कोणमुत्प्लुत्य 'म्या'
'म्या' इति अविरतं क्रन्दन् कुत्राऽपि निर्वृतिमलभमानो विह्वला-
ङ्गस्तूलभारैराचितं गृहभागमाधावत्। ततः अल्पेनैव कालेन
तूलभारेषु प्रज्वलितेषु सर्वं तद्गृहमग्निना व्याप्तं क्षिप्रमेव भस्म-
सात्समपद्यत। परे द्यवि तद्दृष्ट्वा शिष्टास्त्रयोऽपि समवेताः 'अ-
स्माकं नष्टं धनं प्रत्यर्पय' इति व्रणविरोपणाय बिडालस्य चरणे
वस्त्रखण्डं वेष्टितवन्तं वणिजं उपारुन्धन्। स तु उद्विग्नः म्ला-
नवदनः किमपि प्रतिवचनमप्रतिपद्यमानः मोहितस्तस्थौ। ततस्ते
त्रयः राज्ञ आस्थानं गत्वा नष्टं स्वीयं धनं अंशिना तेन वणिजा
प्रतिपादनीयमिति व्यवहारं प्रावर्त्तयन्। राजा सर्वं वृत्तं विस्तरेण
विचार्य तानवदत्। 'तदीयः बिडालचरणः विकलः किल आ

सीत् । विकलेन च चरणेन कथं गन्तुं शक्यते । अतः तूलभारेषु उत्प्लुत्योत्प्लुत्य बिडालस्य धावनेन जनिते गृहस्य दाहे युष्मदीयमेव बिडालचरणानां त्रयं निमित्तमासीत् इत्यत्र संशयलवोऽपि नास्ति । अतः त्रयोऽपि यूयं सम्भूय गृहं यथापूर्वं निर्माप्य तत्स्वामिने अर्पयत । यश्च युष्माभिः सहांशी चतुर्थः तस्य नष्टं धनमपि यूयमेव त्रयो निष्कर्त्तुमर्हथ ' इति ॥

**कथा ७६.**

कश्चिद्वैश्यः स्वगृहे आभ्युदयिकानि कर्माणि कर्तुं मुहूर्तान् निश्चित्य अन्तिकस्थं नगरं गत्वा सम्भारान् क्रीत्वा स्वग्रामं प्रति निवर्त्तमानः आतपस्य तीव्रतया अध्वक्लममपनिनीषुः आत्मनो भारमवतार्य मार्गस्थस्य विटपिनः छायायामुपाविशत् । विश्रम्य च शिष्टमध्वानं जिगमिषुः तस्मात् स्थानाद्यावदुदतिष्ठत् तावत् प्रमादात् रूप्यशतं धारयन्तीं आत्मनो भस्त्रिकां वृक्षस्य तले विस्मृत्य विहाय प्रातिष्ठत । तां च दरिद्रः कश्चित् ब्राह्मणः अधिगम्य यथास्थितामेव तां गृहं नीत्वा प्रतिमास्थाने निधाय अगोपायत् । ' यो नष्टां रूप्यभस्त्रिकां मह्यं प्रत्यर्पयेत् तस्मै रूप्यदशकं पारितोषिकं दद्याम् ' इति वैश्यो ग्रामे सर्वत्र घोषणामकारयत् । तदा ब्राह्मण आत्मनाधिगतां भस्त्रिकामादाय वैश्यनिकटं गत्वा तस्मै तां प्रत्यर्प्य 'पारितोषिकं देहि' इत्ययाचत । ततः परं यद्वृत्तं तदग्रे वक्ष्यते तदवतारणायैव किञ्चिदत्र कथनीयं भवति । इह खलु नष्टधनाः प्रायेण नष्टं धनं द्वित्राणि दिनानि इतस्ततः



अन्विष्य अलभमानाः आर्द्रकाणि आशिताः कपय इव करनखैर्मस्तकं कण्डूयन्तः शून्यदृष्टयः ध्यानपराः किंकर्तव्यमित्यजानन्तः यान्यान् पश्यन्ति तांस्तानावेदयन्ति 'नष्टं धनं यदि पुनरवाप्यते तस्य तुरीयमंशं प्रत्यर्पयित्रे दास्यामः तावानंशो नालमिति यदि मन्यते अर्धांशेन वा प्रत्यर्पयितारं योजयिष्यामः' इति । एषा च उक्तिर्यावन्नष्टस्य द्रव्यस्य पुनरधिगमः तावदेव वर्त्तते । अधिगते तु नष्टधने ताम्रनाणकमप्यदित्सन्तः प्रत्यर्पयित्रा विवदन्ते । अस्माकं कथायां वर्ण्यमानस्य श्रेष्ठिनोऽपि शीलमेतादृशमेवासीत् । यावन्नष्टां रूप्यभस्त्रिकां पुनरध्यगच्छत् तावत् ब्राह्मणाय किमप्यदित्सन् तं सम्बोध्य 'भोः अस्यां भस्त्रिकायां दशादिकं रूप्यशतकं न्यवेशयत । इदानीं गणनायां क्रियमाणायां शतमेव रूप्याणामुपलभ्यते । शिष्टं रूप्यदशकं पारितोषिकस्य कृते गृहीतवानसीति मन्ये । एवं खलु वृत्तम् । कामं तत् गृह्यताम् । तेन क्षीरं दधि च क्रीत्वा सुखेन वर्तस्व ' इत्यवदत् । तच्छ्रुत्वा ब्राह्मणः ' अहह किमेतत् श्रेष्ठिन् नाहं भस्त्रिकाया ग्रन्थिमपि व्यश्रथयं तस्य तरोः तले यथादृष्टां यथास्थितां ग्रन्थिमतीं सरूप्यामेव भस्त्रिकां गृहं नीत्वा देवतायतने न्यक्षिपं किं मे परस्वेन प्रयोजनं 'अयमस्याः स्वामीति यदाऽवधार्यते तदेमां तस्मै प्रत्यर्पयिष्यामि' इति सङ्कल्प्य तां गृहेऽगोपायम् । श्रूयतामेतत् । शपेऽहमनेन यज्ञोपवीतेन भस्त्रिकाया अभ्यन्तरो भागः श्वेतो वा रक्तो वा इति न वेद्मि । ब्राह्मणे मिथ्या अयशो मा पातय । प्रतिश्रुतं पारितोषिकं

देहि' इति मन्दधीः बहुकृत्वः श्रेष्ठिनमयाचत । श्रेष्ठी तु ब्राह्म-
णस्य वचोऽनादृत्य 'भोः ब्राह्मणः सन् अनृतं मा वादीः । नि-
र्दिष्टं रूप्यदशकं गृहीतवानसि किल किं तन्नालम् । कस्त्वदन्यः
तदग्रहीष्यत् विप्राणां गर्द्धोऽतिमहानिति सुभाषितं सत्यीकरोषि ।
गच्छ गच्छ रूप्यदशकेन सन्तुष्टः' इति केवलमवदत् । न तु
किमपि ब्राह्मणाय अददात् । यदा ब्राह्मणः अदित्सन्तमपि तं
पुनःपुनर्निर्बन्धुमारभत तदा श्रेष्ठी तस्य गले हस्तं निवेश्य तं
गृहान्निरकाशयत् । ततो ब्राह्मणः विप्राः पश्चिमबुद्धय इति सुभा-
षितं स्मृत्वा आत्मनो मौढ्यं निन्दन् महता दुःखेन अभिभूतः
प्राड्विवाकं गत्वा आत्मनो दुःखहेतुं विस्तरेण आवेदयत् । प्राड्वि-
वाकेन आनाय्य पृष्टः श्रेष्ठी न्यवेदयत् । आर्य दशाधिकं रूप्यशतं
धारयन्तीं भस्त्रिकामहापयम् । अयं ब्राह्मणस्तामधिगम्य ततो
रूप्यदशकमादाय शिष्टं मह्यं प्रत्यार्पयत्' । इति । ततः ब्राह्मणोऽ-
वदत् । 'नाहं भस्त्रिकाया ग्रन्थिं व्यश्रथयम् । यथास्थितेन ग्र-
न्थिना सह तां अस्मै प्रत्यार्पयम्' इति । अथ प्राड्विवाकः श्रेष्ठिनं
सम्बोध्य 'भोः श्रेष्ठिन् तव भस्त्रिकायां दशाधिकं किल रूप्यश-
तकमासीत् । अस्यां तु भस्त्रिकायां रूप्यशतकमेवास्ति अत एषा
त्वदीया न भवितुमर्हति । यदा च दशाधिकं रूप्यशतं धारयन्ती
भस्त्रिका आसाद्यते तदा सा तुभ्यं दापयिष्यते, इति ब्रुवन् तां
भस्त्रिकां ब्राह्मणाय दत्वा श्रेष्ठिनं यथागतं प्रास्थापयत् ॥



## कथा ७७

एकस्तुरुष्कः कस्यचित् श्रेष्ठिन आपणं गत्वा 'तण्डुलान्
चिक्रीषामि तान्मे देहि' इत्ययाचत । 'तूर्णं ददामि क्षणं प्रतीक्ष-
स्व' इत्युक्त्वा श्रेष्ठी तुरुष्कात् पूर्वमागताय ब्राह्मणाय दत्तानां
पण्यानां मूल्यं गणयन् आसीत् । त्वरितः तुरुष्कः शीघ्रकोपी
तावन्तं विलम्बमसहमानः 'रे गर्दभ किमेवं विलम्बसे' इति प-
रुषमुच्छृङ्खलश्चाक्रुश्य आत्मनः पादादुपानहमाकृष्य हस्तधृतया
तया श्रेष्ठिनं मस्तके तीव्रं प्राहरत् । प्रकृत्या क्षमी कलहविवादेषु
धनव्ययमनिच्छन्नपि श्रेष्ठी ब्राह्मणेन उत्तेजितः धर्माधिकरणमेत्य
तुरुष्कं वाक्पारुष्येण दण्डपारुष्येण च अभियुयुजे । धर्मस्थः प्रा-
ड्विवाकः तुरुष्कमानाय्य यथाविधि वृत्तं पप्रच्छ । 'त्वरितोऽहं
विलम्बमसहमानः श्रेष्ठिनं मस्तके प्राहरं एतत् सत्यम्' इति
तुरुष्कोऽपि आत्मनो दोषमङ्गीचकार । प्राड्विवाकस्तुरुष्कस्य
रूप्यार्धं दण्डं विधाय तं श्रेष्ठिने देहीत्यादिशत् । तुरुष्कश्च रूप्य-
मादित्सुः कोशे हस्तं प्रवेश्य त्वरितमुपसृत्य श्रेष्ठिनं प्राड्विवाकस्य
पुरतो बलादाकृष्य उपानहा तं पुनः प्रहृत्य तस्य हस्ते रूप्यमेकं
ददौ । तदा 'किमिति प्राहार्षीरिति' प्राड्विवाकेन पृष्टः 'मम कोशे
रूप्याण्येव सन्ति न पुनरवरनाणकानि । एकस्य उपानहा प्रहारस्य
मूल्यं रूप्यार्धमिति भवानेव निरणैषीत् । रूप्यमेकमदामिति
द्वितीयमपि प्रहारं प्राहार्षं' इति उक्त्वा सभायामतिष्ठन् अपस-
सार । तुरुष्कस्य मदोत्सेकाच्चकितः प्राड्विवाकः तामवज्ञां सह-

मानस्तूष्णीमवर्तत। एवमपराधिषु अनलं दण्डं विदधतः अधिकारिणः अवहेलनमनुभवन्ति ॥

**कथा ७८.**

काश्याः प्रस्थाय सकुटुम्बः सपरिवारः यात्रार्थं रामेश्वरं गच्छन् कश्चिदध्वगः मार्गे अन्यायपत्तनं नाम नगरं प्राप्य आनीताया भोजनसामग्र्या निःशेषीभूततया तण्डुलान् क्रेतुं तस्य नगरस्य पण्यवीथिकां जगाम। तत्र एकः आपणिकः रूप्यैणैकेन तण्डुलानां द्रोणमेकं न्यमित्सत। अन्यो द्रोणद्वयं अपरो द्रोणचतुष्टयं एवमापणादापणं गत्वा विचारयन् यात्रिकः यावदन्तिममापणं प्राप्नोत् तावत्तत्रत्यः श्रेष्ठी 'द्रोणदशकमेकस्मात् रूप्यात् प्रतियच्छामि' इत्युवाच। तत्र तण्डुलान् जिघृक्षन्तं यात्रिकं दृष्ट्वा अभिमुखे आपणे विद्यमानः पण्याजीवः 'इत एहि द्रोणद्वादशकमहं रूप्यैणैकेन निमित्से' इति ब्रुवन्नाजुहाव। तत्र आपणे तण्डुलाः सुलभतरा इति तत्रैव अध्वशेषं यावत् कुटुम्बरक्षणाय पर्याप्तांस्तण्डुलान् चिक्रीषन् यात्रिकः रूप्यदशकं श्रेष्ठिनो हस्ते निवेश्य 'तण्डुलान् मिमीष्व' इत्युवाच। पण्यग्रहणात् प्रागेव क्रेत्रा दत्तं धनं भाण्डे निवेश्य कीलयित्व तण्डुलगोणीं विवृत्य न्यक्कृतेन द्रोणेन श्रेष्ठी मातुमारभत। अदृष्टचरं तन्मानं दृष्ट्वा 'किमिदं प्रारब्धम्' इति सक्रोधं यात्रिकोऽपृच्छत्। 'एतदेवाऽत्र मानम्' इति श्रेष्ठी प्रत्युवाच। 'तथाचेत्तण्डुलान् न जिघृक्षामि प्रत्यर्प्यतां मदीयं रूप्यदशकं' इति ब्रुवन् यात्रिको धनं पुनरादित्सत।



'धनं न प्रत्यर्पयिष्यामि यदि रोचते तण्डुलानादाय याहि रूप्यकथां मा कृथाः' इति श्रेष्ठी हठवादमकरोत्। ततो यात्रिको धर्माधिकरणं गत्वा अन्यायमेतमावेदयत्। धर्मस्थास्तण्डुलविक्रयिकमानाय्य व्यचारयन्। 'अस्माकमापणे एष एव पितृपैतामहः सम्प्रदायः' इति श्रेष्ठी न्यवेदयत्। ततः प्राड्विवाका यात्रिकमपृच्छन्। 'क्रयस्य निर्धारणसमये उत्तानेन द्रोणेन मातव्यमिति किं व्यवस्थाऽक्रियत' इति। 'उत्तानेन द्रोणेन मानस्य सर्वत्र उपलम्भात् तस्य तण्डुलक्रयवत् क्रेतृविक्रेतृभ्यां पूर्वाभ्युपगम्यतामजानानः तदधिकृत्य नापृच्छम्' इति यात्रिकोवदत्। तच्छ्रुत्वा धर्मस्था व्यमृशन्। 'उत्तानेन द्रोणेन मानं प्रत्यर्थी नेच्छति। अधोमुखेन द्रोणेन मानमर्थी नाभ्युपगच्छति। तन्मध्यस्थैरस्माभिर्न्याय्यो निर्णयः कार्यः। कथं निर्णयामः' इति। एवं चिराय विमृश्य 'तिरश्चा द्रोणेन मानं न्याय्यं मन्यामहे। एष निर्णय उभाभ्यामर्थिप्रत्यर्थिभ्यामादरणीय आचरणीयश्च' इति आदिशन्। एतच्छ्रुत्वा यात्रिकोऽचिन्तयत् 'यद्यहं श्रेष्ठिनो मानमेव अनाक्षिपन् अभ्युपागमिष्यं कतिपयेऽपि वा तण्डुला मया अलप्स्यन्त धर्माधिकरणमागतेन मया तेऽपि हापिताः। इतः परमस्मिन् अन्यायपत्तने क्षणमात्रमपि न वस्तव्यम्' इति। अनया चिन्तया निर्विण्णः रिक्तहस्तः स्वमावसथं प्राप्य नगरात्तस्मादविलंबितं यात्रिकः प्रातिष्ठत ॥

### कथा ७९.

कदाचित् नासिकायाश्चक्षुषोश्च सुलोचने स्वाम्यं प्रति दुर्वारो विवादः समभवत्। एतं विवादं यथायथं विचार्य निर्णेतुं तानि बहुश्रुतौ कर्णौ प्राड्विवाकौ वृत्वा वादचतुरां वाग्मिनीं जिह्वां अधिवक्त्रीमकल्पयन्।

न्यायवादिनी जिह्वा प्रथमं नासिकायाः पक्षे एवं वादमकरोत् 'नैतदविदितमार्याणां धर्माधिकरणिकानां यन्नासैव सुलोचनं सर्वदा धारयतीति अतोऽस्य विषयस्य विस्तरेण उपन्यासो नापेक्ष्यते। प्रपञ्चसृष्टेरारभ्य सुलोचनं नासयैव अनुभूयते। अतो नासाया एव चिरन्तनभुक्त्या सुलोचने स्वाम्यं सिध्यतीति सभ्यानां चित्ते निःसंशयं प्रतीतिर्जायते। आर्यमिश्रा यदि क्षणं मुखमुन्नमय्य प्रेक्षेरन् तदा मया प्रतिपाद्यमानो विषयः स्फुटं प्रतिभायात्' इत्युक्त्वा सुलोचनमुत्क्षिप्य दर्शयित्वा पुनरवदत् 'अश्वस्य अनुरूपतया पल्याणं यथा स्यूतं भवति तथा सुलोचनमपि नासादण्डमनुविधायैव रचितमस्ति। अधिकारिणः अन्यदेतच्च विमृष्टुमर्हन्ति न खलु विप्रा जातु सुलोचनं धारयन्ति। एतदेव ज्ञापयति सुलोचनानि नासार्थमेव असंशयमभिप्रेतानि नासादण्डश्च ब्रह्मणा सुलोचनार्थमेव कल्पितः इति'।

ततः कञ्चित् कालं विलम्ब्य नेत्रयोः पक्षमाश्रित्य व्यवहरन्ती जिह्वा न्यवेदयत्—'प्रभवः सावधानं श्रोतुमर्हन्ति। उपनयनं, उपनेत्रं, सुलोचनं, इति नामानि विमृशन् बालकोऽपि



चक्षुषोरेव सुलोचने स्वाम्यं नान्यस्य अवयवस्य इति स्फुटमवगच्छति। यदि नासिकाया अत्र स्वाम्यमभविष्यत् तर्हि सुनासिका, उपनासिका, उपघ्राणं, इति खलु नामानि प्रावर्त्स्यन् न तु सुलोचनादीनि नामानि। अनादिपरम्परया सुलोचनधारणं नासिकाया एव नियतं तत उत्पद्यमानः सुखानुभवस्तु चक्षुषोरेव नियतः अतो नासा सुलोचनस्य दासी चक्षुषी तु तस्य मित्रे इति वक्तुं युज्यते। न च सुलोचनमन्यैर्ध्रियमाणं यदाकदाऽपि दृष्टचरम्। अथवा नासिकायां सुलोचनं धृत्वा चक्षुषी निमीलयतः किं रूपग्रहणं भवति। यदि न भवति तदा लोचनार्थमेव सुलोचनमिति सिध्यति'।

एवं न्यायवादिन्यां जिह्वायां पर्यायेण पक्षद्वयमाश्रित्य भूयो भूयो व्यवहृत्य विरतायां स्थेयौ कर्णौ अन्योन्यमब्रूतां—'अस्मिन् व्यवहारे पक्षद्वयमप्यधिकृत्य एकरीत्या व्यवहरन्ती न्यायवादिनी आत्मनो वावदूकतां प्राचीकटत्। पक्षद्वयेऽप्युपन्यस्तं साकल्येन न न्याय्यं प्रतिभाति' इति चिराय विमृश्य प्रकटं निर्णयं प्राख्यापयतां। अहरालोके वा दीपालोके वा यदा यदा नासा सुलोचनं धारयेत्तदा तदा चक्षुषी स्वीयौ पुटौ निमालयितुमर्हतः' इति॥

### कथा ८०.

कस्यांचित् रात्रौ गाढे तमसि काचदीपिकां करे धृत्वा कश्चिदन्धः स्थानात् स्थानं गच्छन् आसीत्। तदा प्रेक्षकाः सर्वेऽपि

आकुञ्चिता अंगुलीः स्वस्वकपोलयोर्निवेश्य स्फोटयन्तः तमन्धकमामन्त्रय 'रे काणगर्दभ किं ते कमनीयं रूपं काचावृतया करदीपिकया विना न शोभेत? दिवाऽपि द्रष्टुमशक्तस्य रात्रौ करदीपिकया किमपि प्रयोजनं न पश्यामः' इति ब्रुवन्तः करास्फाल्य तमुच्चैरवाहसन्। तेषां वचनं श्रुत्वा अन्धकः तान् सम्बोध्य 'कोऽर्थस्तेषां सद्वयामपि चक्षुर्भ्यां ये मत्या विनाभूता अन्धा एव भवन्ति। मद्धृतया करदीपिकया निष्पाद्यमान उपकार इयानिति द्रष्टुं युष्माकं बुद्ध्याख्यं चक्षुर्न विद्यते किल बाह्यचक्षुषा युक्ता अपि अन्तश्चक्षुषा हीना भो मूढाः शृणुत वच्मि दीपिकावहने हेतुम्। नाहमात्मार्थमिमं दीपं नयामि। दीपो यदि मम हस्ते नाऽभविष्यत्। युष्माकं चक्षूंषि तमस्यन्धान्यभविष्यन् तदा अभिमुखमापतन्तो यूयं मामभिहत्य अमर्दिष्यत। इदानीं तु दीपस्य विद्यमानतया अनभिघ्नन्तः परिहृत्य मां पार्श्व एकस्मिन् गच्छथ। अल्पोऽप्ययमर्थः युष्माभिरधिगन्तुं नाशक्यत धिक् युष्मान्' इति परिहासवचः प्रयुञ्जान एव प्रायात्॥

## कथा ८१.

काकपल्वलाख्ये अधिष्ठाने भिक्षुर्नाम कश्चिद्ब्राह्मण आसीत्। स सर्वान् शववाहकान् ब्राह्मणान् एकत्र समवाय्य तान् आत्मनि आयत्तान् कृत्वा तेषामधिष्ठाता भूत्वा ब्राह्मणानां गृहेषु कदा मरणं भविष्यतीति अनिशं प्रतीक्षमाणो वर्तते। यत्र कुत्रचित् मरणमासीदिति वार्तां श्रुत्वा तत् स्थानं गत्वा सर्वस्मिन्



गृहजने अशरणे क्रन्दति कमप्यनुक्रोशं विना स वदति 'इमं शवं वोढुं चत्वारो नाऽलं तत्र तत्र स्कन्धपरिवर्तनाय चत्वारोऽन्ये भवितुमर्हन्ति। वाहकाश्च प्रत्येकं रूप्यचतुष्टयं वेतनं विना वोढुं नाभ्युपगच्छेयुः तथापि तेषामभिप्रायं ज्ञात्वा निवर्तिष्ये' इति। ततो वाहकानुपसृत्य 'भोः इदं धनवत् गृहं यूयं बहु प्रार्थिता अपि रूप्यचतुष्टयं यदि न दीयते न केनाप्यस्मासु वोढुमिष्यते एष नो निश्चयः। अष्टभिर्वाहकैर्भवितव्यम्। चतुर्भिरेव एष शवो वोढुं न शक्यते इति ऐकमत्येन ब्रूत' इति तानुपजप्य पुनरन्तः—शवस्य गृहस्य स्वामिनमेत्य 'भोः अहं सहस्रधा सामवचांसि प्रायुक्षि ते तु वाहकाः मद्वचो न गृह्णन्ति अजानां गवाञ्च निहन्तृषु सौनिकेष्वपि दयालवो दृश्येरन्। एषु तु नृशंसेषु दया दाक्षिण्यं वा सर्षपमात्रमपि नाऽस्ति एषा वृत्तिर्मम कष्टायैव कल्पते न सुखाय अस्मिन् शववाहने विषये वृथा विचारो मा क्रियतां बृहदिदं शवस्य शरीरम्। तस्य वहनं कष्टमिति विदितमेव भवताम्। वयमपि विद्म। अतो विशिष्य कथनं मास्तु। वाहकस्य एकैकस्य वेतनं रूप्यचतुष्टयं इति आचारः सम्प्रवृत्तः। ये चत्वारो वाहकाः तैः सह अन्यौ द्वौ संयोज्य षण्णां वेतनं रूप्याणां चतुर्विंशतिर्दीयताम्। अष्टौ वा वहन्तु चत्वारो वा एक एव वा वहतु अयं विचारो युष्माकं न भविष्यति शवो गन्तव्यं स्थानं प्राप्यते' इत्युक्त्वा रूप्याणां चतुर्विंशतिं गृहीत्वा त्रिभिरेव वाहकैः शवं वाहयित्वा तेषु रूप्याणां द्वादशकं विभज्य शिष्टेन द्वादशकेन

वृत्तिं कुर्वन् 'शववाहको भिक्षुः' इति नाम्ना भुवि प्रथितोऽभवत्।
एकदा तस्मिन् नगरे न्यायाधिपतेर्ब्राह्मणस्य माता कालधर्मं जगाम। स भिक्षुमानाय्य 'शववाहकान् सन्निधापय' इत्यादिशत्। भिक्षुः प्रत्युवाच 'दशभ्यो वाहकेभ्योऽवरे शवयानमेतद्वोढुं न शक्ष्यन्ति। एकैकस्य रूप्यदशकेन वेतनेन भवितव्यं नान्यथा कार्यमेतत्साधयिष्यते' इति। न्यायाधिपतिः पर्यपृच्छत् 'इतरेभ्यो जनेभ्यो रूप्याणां त्रितयं चतुष्टयं वा गृहीत्वा मत्तः केवलं रूप्यदशकं किमिति आदित्ससे' इति। तदा भिक्षुः प्रत्यवदत्। 'आर्य इतः पूर्वं पत्तनेऽस्मिन् भिषजो दशाऽऽसन्। तेषां पुण्येन प्रत्यहं द्वित्राण्याकारणान्यासन्। अधुना ते भिषजा मृताः द्वावेव भिषजौ वर्तेते। प्रत्यहमेकोऽपि शवो दुर्लभः संवृत्तः। अतः अनया वृत्त्या आयः अस्माकं अश्वविषाणायते। तत्राऽपि भवद्भिः सह व्यवहारः अद्यैव प्रथमः प्रारभ्यते। यदि भूयोऽपि भवतामस्माभिरर्थो भवेत् तदा वेतनं केनचिदंशेन हापयामः। अस्मिन् अवसरे तु याचितं वेतनं दत्त' इति।

एतच्छ्रुत्वा न्यायाधिपतिः दुःखसमयेऽपि किञ्चित् स्मयमानः 'अस्मद्गृहे ईदृश्यो घटना भूयो मा भूवन् युष्माभिः सह व्यवहारश्च भूयो मा भूत्' इत्युक्त्वा याचितां धनमात्रां दत्वा शवमवाहयत्॥



कथा ८२.

तञ्जनगरस्य नातिदूरे पञ्चनदक्षेत्रे वास्तव्यो गुरुमूर्तिशास्त्री मध्यार्जुनस्थस्य त्यागराजसोमयाजिनः पुत्राय स्वदुहितरं प्रदाय तस्यास्तेन विवाहं निर्वर्तयामास। सरस्वती नाम सा प्राप्तयौवना ऋतुशान्तेरनन्तरं श्वश्वा गृहं गता गृहव्यापारेषु प्रत्यग्रप्रवर्तिता आसीत्। एकदा नक्तं पाकादिकं निर्वर्त्य परिवेषयन्त्यां तस्यां अभ्यागत एको भुञ्जानः सूपे लवणमपर्याप्तमुपलभ्य लवणपर्यायस्य द्राविडशब्दस्य रात्रौ श्रोत्रियपङ्क्तावनुच्चार्यतामालोच्य 'भद्रे लवणं किञ्चिदानीय परिवेषय' इति तां ययाचे। ततस्त्वरया पाकशालां गच्छन्तीं स्नुषामामन्त्र्य 'स्नुषे किं लवणं जानासि' इति श्वशुरोऽन्वयुङ्क्त। तच्छ्रुत्वा सा सुन्दरी 'अहो चित्रं पृच्छ्यते शास्त्रिणो दुहिता जनित्वा सोमयाजिनश्च स्नुषा भूत्वा कथमहं लवणस्य अनभिज्ञा भवेयम्' इति उदीरयन्ती सहसा गत्वा गोमयमानीय अभ्यागतस्य पात्रे पर्यवेषयत्। ततः तत्रत्येषु जनेषु उत्कटो हासः प्रववृते। येन तेषामुदरं विदीर्यमाणमिवासीत्॥

कथा ८३.

गोपालपुरे नाम ग्रामे अवनतं शिरः अनुन्नमय्य एकताननतया अनारतं लिखन्तौ द्वौ लेखकावास्ताम्। तयोर्भार्ये उभे अपि तस्मिन्नेव ग्रामे एकदा महाभागस्य विश्वनाथपण्डितस्य गृहं तद्दुहितुर्वलयारोपणं स्नगारोपणञ्च निमित्तीकृत्य सुवासिनी-

पूजार्थमामन्त्रिते अगच्छताम्। तत्र मिलिताभिः सुमङ्गलीभिः स्वीयानां भर्तॄणां गुणान् वर्ण्यमानान् श्रुत्वा तयोरेकतरा 'मम भर्ता लेखने अतीव चतुरः तत्र तेन समो न कोऽपि विद्यते। तेन हि लिखितं नान्यो वाचयितुं क्षमते' इति ब्रुवाणा भर्त्तारं तुष्टाव। एतदाक्षिप्य इतरा 'सदृशो नास्तीति किमुच्यते तव भर्त्तुरपि चतुरतरो वर्त्तत इति जानीहि मम हि भर्त्ता त्वद्भर्त्तुरपि चतुर इति जना वदन्ति। यतः सः स्वलिखितं स्वयमेव वाचयितुं न शक्नोति' इति ब्रुवती आत्मनो भर्त्तुः श्रेष्ठतां प्रख्यापयामास। अनयोरुभयोरपि मौर्ख्यं दृष्ट्वा सर्वास्तत्र ललना अतिवेलं प्राहसन्॥

### कथा ८४.

उत्तमदानपुरे कश्चन लेखक आसीत्। तद्ग्रामीण एकैकोऽपि दूरस्थान् बन्धून् स्वीयं वृत्तान्तं बुबोधयिषुः तेन लेखकेन लेखं लेखयित्वा प्रहिण्वान आसीत्। इमं सम्प्रदायमनुरुध्य एकस्मिन् दिने कश्चन श्रोत्रियः आगत्य 'मम कृते कञ्चन लेखं लेखितुमर्हसि' इति लेखकं प्रार्थयामास। तदा सः 'भो श्रोत्रिय चरणौ मे रुजतः गन्तुमहं न शक्नोमि अतो लेखस्य लेखनं कष्टावहं भवति' इति प्रत्यवदत्। ततः श्रोत्रियः 'मदर्थे लेखस्य लेखनमनिच्छन् अयमेवं ब्रवीति' इति मत्वा न जाने कथमहमपराधं लेखकाय येनायं मह्यमेवं कुप्यति' इत्युदैरयत्। तच्छ्रुत्वा लेखकः "अहह श्रोत्रियवर्य एवं न मन्तुमर्हसि मम हि तत्रभवति प्रीतिरादरश्च नैव परिहीयते स्वप्नेऽप्यहं न कुप्यामि भूतार्थस्त्वयम्। मया लिख्यमाना लेखा मयैव वाचयितव्या भवन्ति। अतो भवल्लेखस्य प्रतिग्रहीतारः 'लेखस्य वाचनाय लेखक एव प्रेष्यताम्' इति सन्दिशेयुः। तेषामन्तिकञ्च मया गन्तव्यं स्यात्। इतः पादहोरायाः पूर्वमेव लेखस्य वाचनाय योजनं गत्वा प्रतिनिवृत्तस्य मे पादावतीव रुजतः। अद्यैव पुनरपि तावद्दूरं गन्तुमक्षमः एवमवादिषम्। इतोऽन्यत्र किञ्चिदत्र कारणमप्यस्ति कश्चिदावयोर्भेदः? अनन्यौ खल्वावाम्। नान्यथा विकल्पयितुमर्हति भवान् त्वत्कृते अलिखन्नन्यस्य कस्य कृते लिखितुमर्हामि? श्वः प्रभातात् पूर्वस्मिन् एव यामे आगच्छतु भवान् असंशयं लेखं लेखितास्मि यदि लेखस्य प्रतिग्रहीतारमुपेत्य मया वाचयितव्यमपि स्यात् तदपि निराक्षेपं कर्त्तास्मि" इत्युक्त्वा श्रोत्रियं प्रास्थापयत्॥



### कथा ८५.

सुहृदे लेखं कश्चिल्लिखन् आसीत्। तदा अन्यः कश्चन चिरपरिचितस्तस्य गृहमेत्य लिखतः पार्श्वे निषद्य लेखमवेक्षमाणोऽवर्त्तत। तत् ज्ञात्वा लेखकः 'मम लेखं कश्चित् बुद्धिहीनो मूर्खबालेयोऽवेक्षते अतो रहस्यं किञ्चिदपि न लिखामि उत्तरस्मिन् पत्रे अगूहन् अखिलं वृत्तं लेखितास्मि' इति लेखे लिलेख। तदा अवेक्षमाणः पुरुषः अतीव क्रुद्धा 'रे तव लेखः कियान् त्वञ्च कियान् तव लेखञ्च पेठिवान् गर्दभः कः न खल्वहं तथा

परेण लिख्यमानं लेखं पश्येयं बुद्धिहीनोऽस्मि यथा अननुज्ञातः परेण लिख्यमानं लेखं पश्येयं सुहृदा सविलासं कश्चित् कालमालप्य गच्छेयमित्यागतं मां किं युज्यते उपालब्धुम्?' इति सामर्षं पप्रच्छ। 'ओष्ठावप्यनाहि, चीचलं कदा त्वामहमुपालप्सि' इति लेखकस्तमन्वयुङ्क्त। कं-मिदानीं तत्रालेखीः' इति आगन्तुः पप्रच्छ। 'यदि लेखं नाद्राक्षीः कथं तत्र लिखितमवागमः' इति पृच्छति लेखके स उत्तरं किमप्यप्रतिपद्य ह्रिया अवनतमुखो निर्जगाम॥

## कथा ८६.

व्यवहारशास्त्रे परि निष्ठिततया व्यवहारपरीक्षायां एम् एल् इति उपपदमधिजग्मिवानधिवक्ता कश्चित् राजकार्यस्य चिराय कृतं निर्वहणं निमित्तीकृत्य वृत्या सह विश्रामं तदात्व एव लम्भितस्य मान्यस्य कस्यचित् साक्षिणः विचारणे प्रवृत्य तं संबोध्य 'भोः अतीव खलु जीनो लक्ष्यसे कथं त्वया दशभ्यो वर्षेभ्यः प्राग्वृत्तं इदानीं स्मर्तुं शक्यते' इति पप्रच्छ। तदा साक्षी (विरताधिकारतया वृत्या सह विश्राममनुभवन्) स राजपुरुष 'आर्य न केवलं वर्षाणां दशकात् प्रागतं स्मर्यते परं तु वर्षाणां विंशतेः प्राग्वृत्तमपि इदानीं मनसि ध्रियते' इति प्रत्यब्रवीत्। 'तर्हि तादृशं किञ्चिदुदाह्रियतां तव स्मृतेः दार्ढ्यं पश्याम' इति पुनश्च तमधिवक्ताऽपृच्छत्। तदा वृद्धः स साक्षी अवदत्। 'आर्य पञ्चदशभ्यो वर्षेभ्यः प्राक् त्वं परीक्षार्थं पठन्नासीः कि-मेतत् स्मर्यते' इति। 'सत्यमहं पठन् आसं भूतार्थ एवायम्' इति



अधिवक्ता वृद्धस्य उक्तिमुररीचकार। ततो वृद्धः साक्षी पुनर-भ्यवदत्। तस्मिन् वर्षे सेप्टेम्बर् मासि विंशे दिवसे नक्तं नवम्यां होरायां तव पिता मामुपेत्य तव आसन्नायां परीक्षायां प्रवेशार्थं दक्षिणा दातव्येति रूप्याणां विंशतं मत्त ऋणमगृह्णात् तदृणमद्यावधि न निरयाति' इति। एतच्छ्रुत्वा अधिवक्ता ह्रिया शिरोऽवानामयत्। सर्वेऽपि धर्माधिकरणे वर्त्तमानाः करैः करानास्फाल्य प्राहसन्॥

## कथा ८७

धर्माधिकरणे कस्यचित् बालस्य कृते न्यायमुदीरयन् अधिवक्ता सभ्यान् सम्बोध्य 'आर्यमिश्राः पश्यतेमं बालकं अ-विवृतनयनः शावकोऽयं पितरावस्य प्रमीतौ गतिः काप्यस्य नास्ति अजातपक्षः शकुन्त इव निरुपायो वर्त्तते। यदि न्याय-विचारिणः अनुकम्पामस्मिन् न कुर्युः अयमचिरेणैव अकिञ्चि-त्करो मूर्खः संवर्त्तेत। अस्य तु पितरौ पराहिताय देशक्षेमाय च बहून् वत्सरान् श्राम्यन्तौ प्रामीयेताम्' इति कथयित्वा तं शि-शुमुत्क्षिप्य प्रेक्षकेभ्यो दर्शयित्वा तेष्वनुकम्पां जनयन् बहून् न्यायानुदाहृत्य करुणं व्यवहारमकरोत्। तदा तत्करस्थितो बालकः उच्चैः क्रोशन् रुरोद। तत् दृष्ट्वा दयमानः प्राड्विवाकः उदश्रुरालोचयंस्तस्थौ। तदातनं संविधानं ज्ञात्वा प्रत्यर्थिनः अधिवक्ता उत्थाय बालकं सम्बोध्य 'वत्स किमर्थमेवमुच्चैरोदिषि

इत्यपृच्छत्। तदा बालकः 'मम पृष्ठे स्थितः कश्चित् मदूरू नखाग्राभ्यां प्रपीडयति' इत्युक्त्वा प्ररुदन्नेवावर्त्तत ॥

कथा ८८

जानपदे एकस्मिन्देशभागे क्षेत्राजीवः कश्चिदवर्त्तत। स एकदा बीजानि चिक्रीषुरन्तिकं नगरमागच्छत्। तत्र च धर्माधिकरणे व्यवहारवशात् बहुभ्यो ग्रामेभ्यो बहवो जना आगता आसन्। ते सर्वे गूढान् धर्मविधीन् विचार्याविबुध्य स्वीयेषु व्यवहारेषु सिद्ध्यर्थमनुष्ठेयानुपायानुपलब्धुं व्यवहारविशारदतया विश्रुतं कञ्चिदधिवक्तारमुपसरन्तोऽवर्त्तन्त। तान् दृष्ट्वा अयमपि कृषीवलः तैः सह अधिवक्तुः सकाशं गत्वा 'आर्य भवता निरूप्यमाणां दक्षिणामविकलामविलम्बितमतिसृजामि। भवान् प्रसद्य मामभ्युपदेशेनानुग्रहीतुमर्हतीत्यभ्यर्थयामास। इतरवदनेनापि कस्यचिद्व्यवहारस्य कृते आगतेन भाव्यमिति मत्वा न्यायवादी कस्ते वृत्तान्त इति तमन्वयुङ्क्त। आर्य भवत उपदेशमभ्यर्थयितुमागतोऽस्मीति कृषीवलः प्रत्यवदत्।

न्यायवादी—किं युष्माकं भ्रातॄणां ज्यायसां कनीयसाञ्च परस्परेण सङ्घर्षः कलहो वा वृत्तः?

कृषीवलः—आर्य मम पित्रोरहमेक एव पुत्रोऽजाये।

न्यायवादी—किं दायादा युष्माकं क्षेत्राण्यन्यायेन गृहीतवन्तः?



कृषीवलः—मम पितरि जीवत्येव दायादानामस्माकञ्च अंशा विभक्ता अभवन्। अतस्तन्मूलो न कोऽप्युपद्रव इदानीं विद्यते।

न्यायवादी—किं कृषिकर्मणि त्वया सह सम्भूय व्यवस्यन्तः केचित् त्वदीयमंशमददतः अन्यायं कृतवन्तः?

कृषीवलः—ते सर्वेऽपि मम विधेया वर्त्तन्ते न कोऽपि तेषु मम वचनमतिवर्तते।

न्यायवादी—किं तव उत्तमर्णेषु ये केऽपि ऋणमस्मदीयमशेषमधुना दीयतामिति निर्बध्य याचन्ते?

कृषिवलः—अद्यावधि क्वापि कुतश्चिदपि जनात् ताम्रनाणकमेकमपि ऋणमात्तं न जाने।

न्यायवादी—यद्यप्यन्यतस्त्वया ऋणं नोपात्तं तथापि त्वत्त ऋणमात्तवन्तः तदप्रतियातमानाः प्रत्याचक्षाणाः किं छलयितुमिच्छन्ति?

कृषीवलः—ते मम अनुकूला एव वर्त्तन्ते। न कोऽपि तेषां प्रतीपो मे लक्ष्यते।

एतच्छ्रुत्वा अधिवक्ताऽमन्यत नूनं मूर्खो मत्तो जडो हतबुद्धिर्वा अयं कृषीवलः यदात्मीयं धनं प्रयोजनं विना मह्यं दित्सन्नागत इति। ततस्तमामन्त्र्य 'रे वराहाणां दशकादवार्यै दक्षिणायै मया उपदेशो न दीयते निरर्थकं मह्यं दददात्मीयं धनं नाशयिष्यसि' इत्यवदत्।

आर्य, तथा मा वोचः एतावतां जनानामुपकारकः ते उपदेशः कथं मम एकस्य कृते केवलं मोघः स्यात् युष्माभिरुप-याचितान् दश वराहानधुनैव ददे प्रशस्तेनोपदेशेन मामनुग्रही-तुमर्हसि' इति निर्बध्य कृषीवलः प्रार्थयत। तदा अयमुपदेशम-गृहीत्वा न मां विस्रक्ष्यतीति बुद्ध्वा अधिवक्ता पत्रमेकमादाय तस्मिन् 'यदा यत् कर्तुं कालः प्राप्यते तदैव तत् करणीयं श्वो भवतु परश्वो भवत्विति न विलम्बयितव्यम्' इति लिखित्वा तत् पत्रं कोशे कस्मिंश्चिदन्तर्धाय कोशमुखञ्च पिधाय लेखगर्भं कोशं कृषीवलस्य हस्ते निक्षिप्य 'एतन्निरपायं नीत्वा पेटायां निधाय रक्ष प्राप्तेष्ववसरेषु लेखं पठित्वा तदनुरोधेनाचर्यताम् श्रेयस्ते भविष्यति' इत्युक्त्वा तस्माद्वराहाणां दशकं प्रतिगृह्य कृषीवलं प्रस्थापयामास। स च गृहमागतः दशभिर्वराहैरधिव-क्तुरहमुपदेशमात्तवानस्मीति ग्रामीणानसकृदावेद्य मोदमानोऽवर्त्त-त। एवं गच्छति काले कदाचित् खले धान्यं पूत्वा राशीकृत्य पलालैः प्राव्रियमाणमासीत्। समन्ततः सर्वे क्षेत्रपतयः एकस्या रात्र्या व्यवधानेन न कथञ्चिदस्माकं कर्म परिहीयेत। श्वः प्रा-तरेव शकटानानाय्य धान्यं गृहं प्रापयामः अद्य रात्र्यां केवलं सर्वे वयमत्र धान्यं रक्षन्तः शयीमहि इति निरचिन्वन्। अयं तु कृषीवलः संशयानः अधिवक्तुरधिगतं लेखमादाय खले भिक्षा-र्थमागतेन केनचित् दीनेन ब्राह्मणेन तं वाचयित्वा सन्देहं परिहृत्य 'अहो धिक् किमित्यद्य करणीयं कर्म श्वः प्रभातं यावत्



विलम्बयेयं किमिति वा अधिवक्त्रे दत्तं वराहाणां दशकं विफ-लीकुर्याम्' इत्युदीर्य भूयसश्चतुरः शकटान् परिक्रीय आत्मीयम-शेषं धान्यमादिमेनैव यामद्वयेन गृहं प्रापयामास। ततः तस्या रात्र्यास्तृतीये यामे दैवादभ्रितं नभ आसीत्। सप्तभिरपि मेघैः संहत्य वृष्टेव अतिमहती वृष्टिस्तथा अनारता अपतत् यथा खलस्था अन्ये सर्वेऽपि कर्षकाः जलाभिप्लुताः कृच्छ्रेण निःश्व-सन्तः आत्मीयान् धान्यराशीन् वेगवता जलौघेन उह्यमानान् रक्षितुमपारयन्तः तादृशं कृषीवलस्यास्य भाग्योदयमालोक्य महान्तं विस्मयमापेदिरे॥

### कथा ८१.

कस्मिंश्चिद्देशे बहूनि वर्षाणि पर्जन्यो न ववर्ष। घोरेणाने-नावग्रहेण महद्दुर्भिक्षमभवत्। वृष्टिमानाययितुं केचिद्वरुणजप-मकुर्वन्। केचित् ब्राह्मणान् समभोजयन्। केचिदविच्छिन्नया धारया स्रावितेन घटोदकेन शिवलिङ्गान्यभ्यषिञ्चन्। अन्ये केचिदनेकविधानि दानानि धर्मान् जपान् तपांसि मन्त्रपाठान् अन्यानि च वृष्ट्यावर्जकतया आत्मना अभिप्रेतानि कर्माणि प्रावर्त्तयन्। एतत् सर्वं दृष्टवान् अध्यापकः कश्चित् आत्मनः पाठशालायामधीयानान् बालकान् नगरात् बहिःस्थितं अनावृतं कञ्चित् प्रवातोद्देशं नयन्नासीत्। पौरेषु केचन तद्दृष्ट्वा विस्मिताः अध्यापकम् सम्बोध्य 'भो उपाध्याय किमर्थमेमेवमेतानद्य नग-रात् बहिर्नयसि' इति पप्रच्छुः। तच्छ्रुत्वा उपाध्यायस्तान्

अवदत् । 'आर्याः बाला ऋजुबुद्धयः नैतेषु छलं माया कैतवं वा किञ्चिदस्ति । बाला देवैः समाना इति खलु जना वदन्ति । अत एतैराराधितो वरुणः दयमानो जातु वृष्टिं प्रेरयेदिति मन्वानः एतान् नगरात् बहिः अनावृतं देशं नयामि' इति। तदा पौरेष्वेक उवाच 'स्रष्टा यदि बालकानां मनोरथान् निरवर्त्तयिष्यत् बहोः कालात् प्रागेव हि नरकलोकाः सर्वेऽपि उपाध्यायैरध्युषिता अभविष्यन्' इति एतत् सोल्लुण्ठनं वचःश्रुत्वा अध्यापकः हसन् शिष्यान् पाठशालां प्रति न्यवर्त्तयत् ॥

### कथा १०.

कस्मिंश्चित् नगरे द्वौ युवानौ बाल्यादारभ्य सखायौ एकस्मिन्नेव पात्रे आशितौ एकस्मिन्नेव कटे शायितौ एकस्यामेव पाठशालायामध्यापितौ अन्योन्यस्मिन्ननुरक्तौ च आस्ताम् । तयोरेकः अभिनिविश्य विद्यामगृह्णात् । अन्यः स्वैरी भूत्वा व्यसनेष्वासज्य दुष्टैः संसृज्य दुर्विनीतानां धौरेयः असभ्यानामग्रणीश्च अभवत् । कालेन उभावपि कुटुम्बभरणाय अनुरूपां वयोऽवस्थामवातरताम् । तदा अधीतविद्यः महति राज्याधिकारे आस्पदमलभत इतरस्तु कष्टां दशां आपन्नः दारिद्र्येण अतीव अवासीदत् । तदा सः अधिकृतं सखायं स्मृत्वा पूर्वपरिचयमवेक्ष्य अयं यत्किञ्चित् साहाय्यं मह्यं कुर्यादित्याशया तदन्तिकमगच्छत् । अधिकृतस्तु अपरिचितवदाचरन् तं 'कोऽसि किं ते मदुपसर्पणस्य प्रयोजनम्' इति पप्रच्छ । तच्छ्रुत्वा भग्नाशः



अभ्यागतः 'रे अहं ते पुराणः सखा तव चक्षुषी अन्धीभूते इति श्रुत्वा तयोरवस्था अधुना कीदृशी इति जिज्ञासमान आगाम्' इत्युक्त्वा यथागतं गृहं स्वं निववृते ॥

### कथा ११.

एकदा निशामुखे अस्तमयस्य घटिकार्धे अवशिष्टे रामेश्वरक्षेत्रे तीर्थयात्रामुद्दिश्य आगताः केचन वैदेशिकाः समुद्रतीरे उपविश्य संलपन्त आसन् । तदा कश्चिद्बटुः उच्छ्वसन् सृक्कणोः फेनायमानः धावन् आगच्छत् 'बटो किमेवं सम्भ्रान्त आयासि' इति तैः पृष्टः सः उच्छ्वसन्नेव 'योधानां शतं द्रावयित्वा आगच्छामि' इत्यब्रवीत् । अहो एक एवाऽयं योधशतं द्रावितवान्' इति विस्मितेषु तेषु एकतमः बटोर्वाचमश्रद्दधानः 'वत्स कथमद्रावयः' इति तं पप्रच्छ । तदा बटुरुवाच 'विंशतिशः व्यूढासु पञ्चसु श्रेणीषु स्थिताः योधाः धावन्तः तिष्ठन्तः प्रासान् प्रास्यन्त इव असिभिः छिन्दन्त इव आग्नेयनाडीभिः गुलिकाः लक्ष्येषु प्रक्षिपन्त इव विडम्बनां कृत्वा शस्त्रविद्यां शिक्षमाणा आसन् । तेषां शस्त्राभ्यासं काञ्चित् कालं निरूप्य अन्ते तेषु कञ्चिदश्मखण्डं प्राक्षिपं । तद्दृष्ट्वा तेषां शिक्षकः 'गृह्यतां गृह्यतामयम्' इति उच्चैरवदत् 'अगृहीतमेव प्रधावितं मां जिघृक्षन्तः ते शतं योधा अनुधाव्य आगच्छन्ति' इति तच्छ्रुत्वा ते सर्वे तत्र स्थिताः उच्चैरुद्धलमहसन् तेन च हासेन तेषामुदराण्यपुस्फुटिषन् ॥

### कथा ९२.

कस्मिंश्चित् ग्रामे बहवो जनाः कुत्रचित्स्थाने कदाचित् संहता अभवन्। तान् वटुरेकः सहर्षमुपधाव्य 'राजा मामालपत् राजा मामालपत्' इति उच्चैर्नदन् उरः हस्तेन आस्फाल्य आत्मन उत्कर्षं प्रख्यापयामास। 'किमालपद्राजा' इति तैः पृष्टः "अहं राज्ञा गन्तव्ये मार्गे अतिष्ठं सपरिवार आगच्छन् राजा तथा स्थितं मां दृष्ट्वा 'धिक् त्वां जाल्म अपेहि मार्गात्' इति मामालपत्" इत्यावेदयत्। 'अहो तथा त्वामालपत किल किमितः परं तव परिहीयते? धन्योऽसि' इति वदन्तः सर्वे तमवाहसन्॥

### कथा ९३.

कश्चिदधिकारी कस्यचित् वस्त्रविक्रेतुरापणं गत्वा उज्ज्वलाञ्चलं वस्त्रमेकं निरूप्यादाय 'कियदस्य मूल्यम्' इत्यापणिकमपृच्छत्। किमपि किमपि मनसि चिन्तयन्नवस्थित आपणिक 'इहाहमागतोऽस्मि क्षणमेकमपेक्ष्यताम्' इति प्रत्युवाच। यदा बहून् क्षणान् प्रतीक्षितोऽपि आपणिको ग्राहकं नोपातिष्ठत तदा ग्राहकः 'किं भोः किमद्यापि ते आलोचना नाऽवसिता' इत्यपृच्छत्। 'अर्धमवसितं अर्धमवशिष्यते' इति वणिक् प्रत्यवदत्। 'किं नाम तत् गुरु कार्यं यदेवमालोच्यते' इत्यागन्तुः पप्रच्छ। वणिगकथयत्। 'आर्य निवेदयामि कतिपयेभ्यो दिनेभ्यः प्राक् नगराध्यक्षस्य पुत्रीमपश्यं तदा प्रभृति स्त्रीरत्नं तदुपयन्तुं अनारतं प्रयतमानोऽस्मि। अद्य अभीष्टस्य अर्धं निवृत्तं यन्मम च



मद्बान्धवानाञ्च अस्मिन् सम्बन्धेऽद्य पूर्णोऽभिनिवेशो विवृतोऽभूत्। यदि कन्याया बन्धवोऽपि एतामस्मदभ्यर्थनामनुमोदेरन् असंशयं मे मनोरथः सिध्येत्' इति। एतच्छ्रुत्वा अधिकारी झगिति विहस्य 'शिष्टमध्यवसितस्याऽर्धं समापय' इत्युक्त्वा आपणान्तरमयात्॥

### कथा ९४.

कश्चिदाढ्यः काशीयात्रां कृत्वा गृहं निवृत्तः ब्राह्मणानां सन्तर्पणमकरोत्। तत्र भोजनाय ब्राह्मणाः सहस्रशः अगच्छन्। भोजनान्ते वेदाध्यायी कश्चन ब्राह्मणः गृहं प्रतिनिविवृत्सुः अन्नस्य अतिसुहिततया स्वयमेवावनम्य पादुके विचेतुमक्षमः शिष्यं प्रति शब्दयित्वा 'रे शिष्य उपानहौ विचित्योपस्थापय' इत्यादिशत्। शिष्यस्तु भोजने गुरुमप्यतिशयितः आत्मनः शिरः उच्छ्रितमेवाऽवस्थापयन् 'भो गुरूत्तम इत आरभ्य नक्षत्रमण्डलं यावत् वर्त्तमाने अवकाशे भवत्पादुके नोपलभ्येते' इति प्रत्यब्रवीत्। 'धिक् भ्रष्ट! किमाकाशे उपानहौ विचेयौ? शिरोऽवनमय्य भूमौ विचिनु' इति सकोपं गुरुस्तं पुनरादिदेश 'आर्य भवतोऽप्यल्पीयसीं अन्नमात्रां जग्धवान् को वा मूर्खोऽत्र वर्त्तते येन शिरोऽवनमय्य वीक्षितुं शक्येत' इति पुनः शिष्यः प्रत्यभाषत। एवं गुरुशिष्ययोः संलापमाकर्ण्य प्रहसितः गृहस्य द्वाःस्थः कश्चित् महाकायस्य तस्य ब्राह्मणस्य पादुके अन्विष्य आदाय 'भो घनपाठिन् इह

न्यदधात्। ते स्तस्ते पादुके इति ब्रुवन् उपानहौ तस्य पादमूले न्यदधात्। ते शनैर्विधाय पादयोरासज्य तुन्दिलतया महता प्रयत्नेन पदमनुपदं प्रचलितुमुपचक्रमे। तयोः मध्ये ब्राह्मणः शिष्येण सह वीथ्यां प्रचलितुमुपचक्रमे। तयोः मध्ये मार्गे कस्मिंश्चित् गृहालिन्दे शयित्वा तुन्दं परिमृजन्तं दीर्घनिःश्वासिनं कञ्चित् ब्राह्मणं गृहाभ्यन्तरात् काचित् विधवा उपेत्य 'भोः सोमयाजिन् किमजमोदातीर्थं स्वल्पमानयेयम्' इत्यपृच्छत् तत्र 'भद्रे यदि जलबिन्दोरपि कुक्षाववकाशोऽभविष्यत् किमहं तत्र पोलिकाद्वयं वटकयुगलञ्च न प्रावेशयिष्यम्'? इति ब्राह्मणस्तां प्रत्यवदत्। तच्छ्रुत्वा 'साधूक्तं भो ब्राह्मण' इति तस्य वचनं श्लाघमानौ गुरुशिष्यौ स्वीयमावसथं प्राप्नुताम् ॥

### कथा ९५.

हिमाद्रेः रामेश्वरं प्रति यान्तः केचन यात्रिकाः रामेश्वराद्धिमाद्रिं गच्छन्तः अन्ये च केचित् राजमहेन्द्रपुरे वैदेशिकानामावासाय कल्पिते सदने कदाचित् समागच्छन्। तत्र एकैकोऽपि आत्मना दृष्टान्यद्भुतानि कथयितुमारेभे। रामेश्वरादागतेष्वेकः 'अस्माकं मार्गे शाकस्थाने नाम ग्रामे वर्धितानां शाककाण्डानामेकैकस्यापि परिमण्डलं हस्तशतकं प्रायेण भवेत् तस्य च उच्छ्रायस्तादृशो वर्तते। यथा तस्य पार्श्वे वर्तमानास्तालाः नवाङ्कुरा इव लक्ष्यन्ते। एकैकस्य काण्डस्य छायायां ब्राह्मणानां सहस्रस्य वनभोजनं कर्तुं शक्यते' इति अत्युक्तिमकरोत्। तच्छ्रुत्वा हिमाद्रेरागतेष्वेकः अस्माकं मार्गे कटाहमण्डपे



नाम नगरे एकदा न्यविशामहि। तत्र कश्चित् कुलालः अम्बरीषमेकं निर्मिमाण आसीत्। 'अहो कथं तदद्भुतं वर्णयितुं क्षमेय तस्याम्बरीषस्याधस्तलं परिणाहे योजनपञ्चाशतो नैव परिहीयते' इत्युवाच। 'किमर्थं तदम्बरीषं क्रियते' इति प्रथमेन पृष्टः 'नूनं त्वद्दृष्टस्य शाककाण्डस्य पचनार्थमेव कल्पितं स्यात्' इति द्वितीयः प्रत्यब्रवीत् ॥

### कथा ९६.

व्याधैरनुस्रियमाणः कश्चित् वन्यो वराहः पलाय्य निलयनमन्विष्यन् सद्यो वल्मीकात् शिरः प्रोच्छ्रित्य वातमापिबता केनचित् नागराजेन 'भो वराह इत एत्य कञ्चित्कालमस्मत्सदने आत्मानं गोपायेः' इति आहूय अभिदधे। तेन वचसा अतीव हृष्टो वनवराहः वल्मीकं प्रविश्य निलिल्ये। व्याधा भूयो भूयोऽन्विष्यन्तोऽपि वराहमनुपलभमाना निराशा निववृतिरे। तदाप्रभृति तत्र तत्र वनस्थलीषु पर्यट्य फलमूलानि जग्ध्वा पुनःप्रतिनिवृत्य वराहो वल्मीक एव संविशति। एवं शयानस्य तस्य शललीभिः प्रोताः वल्मीकगाः पन्नगाः सर्वेऽपि आर्ता आत्मीयं सङ्कटमुरगराजमावेदयामासुः। सर्पराजोऽपि 'मा भैष्ट' इति तानाश्वास्य वराहमुपसृत्य 'भो वराहवर अतीता किल ते आपत्। पुनश्च तस्याः सम्भवे युष्माकमत्राऽऽगमनमप्रतिहतमेव भविष्यति। अधुना भवतः अन्तिके अवस्थानेन सर्पाणामुपद्रवो भवतीति विज्ञायते। अतो यावत् पुनरागमनस्य निमित्तमुद्भवेत्

तावत् भवान् स्वगृहं गत्वा तत्र सुखेन वस्तुमर्हति' इति वराह मभ्यार्थयत। तदा श्रीमान् वराहाधिपः 'ममात्र कष्टं किञ्चिदपि न विद्यते। अत एतत् स्थानं हित्वा अन्यतो गन्तुं निमित्तं किमपि न पश्यामि। यदि युष्माकमत्र वासः कष्टमावहेत् उपपन्नतरो देशः अन्विष्य आसेव्यताम्। न तत्र विघ्नं कमपि चिकीर्षामि' इति प्रत्यब्रवीत्। साधु चेदमुच्यते—'प्रभोः पादग्रहस्तावत् यावदर्थो न साध्यते। गलग्रहः साधितेऽर्थे पामरैः क्रियतेऽर्थिभिः' इति ॥

## कथा ९७.

एकदा मार्दङ्गिकः कश्चित् कुत्रचित् देवालये सेवामाश्रुत्य मृदङ्गवादनाय गच्छन् मार्गे तृषया शोषितजिह्वः किञ्चित् गृहमेत्य देहलीस्थस्य उलूखलस्य उपरि मृदङ्गं निधाय अन्तः प्रविश्य पानीयं पिबन् आसीत्। तदा उलूखलः मर्दलमब्रवीत्। 'भ्रातर्मर्दल मम कष्टं किमित्यहं वर्णयामि प्रभातादारभ्य तण्डुलान् फलीकरवाम हरिद्रां चूर्णयाम सक्तून् पिनषाम क्षोदं क्षुणदाम गुण्डिकां गुण्डयाम मरीचान्यवहनाम लिकुचजम्बीराणां पत्राणि मृद्नाम' इति वदद्भिः 'तेषु तेषु कर्मसु प्रवृत्तैर्जनैरानिशीथं अनिर्वाच्यानां दुःखानामास्पदीक्रिये अधुनैव विश्रामोऽल्पः अलम्भि अधुनैव च अपूर्णं मे दुःखं पूरयितुं त्वमागत्याऽत्रोपाविक्षः किमितस्ते पुण्यं भविष्यति इति' आत्मनो दुःखान्युलूखलेनोदीरितानि श्रुत्वा मर्दलः प्रत्युवाच। 'भ्रातरुलूखल त्वदुक्तं त्वमेवाऽनुरूपं मन्यसे। ममाऽपि वृत्तान्तमीषच्छृणु। पश्चाद्यदि ते वक्तव्यं यत्



किञ्चित् स्यात् तत् कामं कथ्यतां सर्वस्मिन् अपि शरीरे पिपीलिकाया अपि अवकाशमन्तरेण मेदसा व्याप्तः चक्रमुसल इव सुदृढः बहुविधैः प्रहारैरभिघातैरपि अनभिभूतः कांस्यरथवत् अचलतया स्थातुं क्षमः त्वमपि एकस्मिन् एव पार्श्वे आघातानामसहिष्णुः यद्येवं परिदेव्य प्रलेपः अहं मम दुःखं कस्याऽग्रतः कथयेयं के वा सन्ति पुण्यात्मानः ये दयार्द्रा मदुदन्तमाकर्ण्य मामाश्वास्यानन्दयेयुः। उच्चैरुदीरणेन अर्धमपैति दुःखभारस्येति हि वदन्ति। अतो मद्वचनं श्रूयताम्। मम तावत् शरीरमतिकोमलं किञ्चिद्बलेनाऽपि पुरुषेण दृढग्रहणमसहमानेषु भङ्गुरेषु वेत्रदलेष्वानद्धेन शुनो मूषिकस्य वा दंशादपि विदारिणा शुष्कचर्मणा रचितमस्ति। एतादृशं निःश्वासेनाप्यपवाह्यं अल्पप्राणं मां ईषदप्यननुकम्पमानाः मल्लयात्रासु यष्टिक्रीडासु अस्त्रशिक्षासु उत्सवेषु देवाराधनेषु भागवतश्रवणेषु मेलेषु सङ्गीतगोष्ठीषु कथासु विनोदेषु नृत्येषु नाट्येषु च नीत्वा कालव्यवस्थामन्तरेण अनारतं दिवा नक्तञ्च उभयोरपि पार्श्वयोः आमृजन्ति आघट्टयन्ति आस्फालयन्ति आघ्नन्ति च। कस्मै मद्दुःखं निवेदयानि। इदानीन्तन्यास्तृपाया महिम्ना मार्दङ्गिकः मां त्वदुपरि निवेश्य क्षणमात्रं व्यशिश्रमत्। अन्यथा इतः प्रागेव पार्श्वद्वयेऽपि प्रहाराननुभूय रुवन् पर्यदेविष्ये। यथा बिडालस्योत्सवो मूषकाणां प्राणापहारको भवति तथा मदीयो मधुरस्वनः श्रोतॄणां सुखावहोऽपि प्रह्रियमाणस्य मम खेदमेव जनयति। हा कष्टं पश्य तत्रागच्छति मा

मधिष्ठितः अष्टमः शनिः मज्जिघांसया । भ्रातः मम नाशकाल उपस्थितः आमन्त्रयामि भवन्तम्' इति वदन्तमेव मर्दलं तृषामपनीय निवृत्तो मार्दङ्गिको गृहीत्वा कण्ठे आसज्ज्य देवालयमभिप्रतस्थे ॥

कथा ९८.

कश्चिदधिकारी मासिकेन वेतनेन शिबिकावाहकान् परिक्रीय तया अभीष्टानि स्थानानि गच्छन् आसीत् । एकदा तस्य गोर्वत्सः कुत्रचित् पलाय्य नष्टोऽभवत् । तदा स शिबिकावाहकान् 'वत्समन्विष्यानयत' इत्यादिशत् । तेऽब्रुवन् । 'आर्य वयं शिबिकावाहनमेव प्रतिज्ञातवन्तः न तु वत्सस्यान्वेषणं नापि वत्सस्याहरणम्' इति । तच्छ्रुत्वा 'किं युष्माकमहन्ता ईदृशी ! इति मनसि चिन्तयन् 'शिबिकामानयत' इत्यादिश्य आनीतायां तस्यामुपविश्य वाहकैः कण्टकाचितेषु अश्मावृतेषु च प्रदेशेषु शिबिकां वाहयित्वा वत्समन्वियेष । ततः कण्टकविद्धैः क्षतैः सवेदनैश्चरणैः परिक्रमितुमक्षमाः शिबिकावाहकाः स्वीयस्य अविनयस्य फलमेतदिति परिज्ञाय 'आर्य वयमेव वत्समन्विष्य आनयामः स्वामी प्रसन्नो भूत्वा गृह एव वर्त्तताम्' इति निर्बन्धेन अभ्यर्थयामासुः । तदा सोऽधिकारी 'धिक् जाल्माः अस्माकं समयस्तु न तथा वत्सान्वेषणं मया करणीयं शिबिकायां मम वाहनं तु युष्माभिः' इति तैः पूर्वमुक्तमेव वचः पुनरुदाहरत् । ततस्ते तस्य पादयोः पतित्वा तं प्रसाद्य गृहेऽवतार्य वत्समन्विष्याऽऽनीय तस्मा अर्पयामासुः ॥



कथा ९९.

कस्मिंश्चित् पत्तने चत्वारः अन्धा अवर्त्तन्त । ते गजं दिदृक्षवः आत्मना सम्भाषमाणान् सर्वानपि जनान् गजं दर्शयतेति असकृत् निर्बद्धय अभ्यार्थयन्त । एवं वर्त्तमाने कश्चिद्धस्तिपकः तेषामभिलाषं ज्ञात्वा कथमिमे जात्यन्धा गजं द्रष्टुं शक्नुयुरि ति कुतूहलेन आविष्टः 'मम गजमानयामि स निकामं दृश्यतां' इत्युक्त्वा आत्मनो गजमानीय तेषामग्रे अवास्थापयत । तदा अन्धेष्वेकतमः गजस्य चरणमामूलमाग्रञ्च हस्तेन परामृशत् । अपरः गजस्य कर्णं स्पृष्ट्वा पर्यैक्षत । तृतीयश्च शुण्डां हस्तेन गृहीत्वा गजस्य स्वरूपमभावयत् । चतुर्थः बालमालम्ब्य गज एतादृश इति निरचिनोत् । तथा ते भिन्नभिन्नानवयवान् परीक्ष्य अस्माभिर्गजस्य स्वरूपमवधारितमिति हर्षेण आवेदयन् । गजस्य स्वरूपं कीदृशं युष्माभिर्निर्धारितमिति हस्तिपकस्तानपृच्छत् । 'उलूखलसदृशो गज' इति पादपरामर्शकोऽब्रवीत् । मुसलसदृशो हस्तीति शुण्डापरीक्षक उवाच । एतावुभावप्यपोह्य शूर्पाकारो गज इति कर्णालम्भकः कथयामास । त्रयाणामप्येषां वचांसि सामर्षं प्रत्यादिश्य मार्जनीसदृशो गज इति बालग्राही विशदतया व्याहरत् । हस्तिपकस्तेषां मौढ्यमवेक्ष्य प्रहसितः गजेन सह निर्ययौ । एवमेव अनक्षराः पामराः पण्डितायमानाः हासास्पदानि भवन्ति ॥

## कथा १००.

एकदा राजा कश्चित् स्वसदनान्निर्गच्छन् द्वारि कञ्चिच्छूद्रं कुक्कुटं हस्ते धृत्वा उपस्थितमपश्यत् 'कोऽसि किमर्थञ्च द्वारि तिष्ठसि' इति राज्ञा पृष्टः स शूद्रः प्रभो अहं देवस्य नाम्ना कुक्कुटपणं कृत्वा कुक्कुटमिममजैषं अत एनं देवपादयोरर्पयितुमागतोऽस्मि इत्यवदत् । 'तथा चेदन्तर्दत्वा याहि' इति राजा तमादिशत् । सोऽपि तथैव चकार । अन्यदा उरभ्रं कंचिदादाय पुनः पूर्ववदुपस्थितं शूद्रं किमेतदिति राजा पप्रच्छ । 'अयमपि प्रभोर्नाम्ना जितः' इति शूद्र आवेदयत् । पूर्ववदेव राज्ञा अनुमतः मेषं गृहस्याभ्यन्तरे विसृज्य शूद्रो न्यवर्तत । पुनरपि तृतीयं द्वारि पणकैः कैश्चित् सहागतं तमेव शूद्रं वीक्ष्य 'किमित्यद्य किमपि विना आगतोऽसि' इति राजा पप्रच्छ । तदा सः 'अधीश नाहं किमपि विना आगतोऽस्मि देवस्य नाम्ना वराहाणां द्वे सहस्रे पणित्वा पराजयं प्राप्नवं तं पणं देहीति विर्बभ्रन्त इमे निर्दया मां निजिगीर्षन्ति । अतो देवस्य सन्निधिं तानानैषं' इति न्यवेदयत् । तदा राजा सहस्रद्वयं वराहाणां कोशात्तस्मै दापयित्वा इतःपरं मन्नाम्ना पणनं मा कृथा इति आदिश्य तं व्यसृजत् ॥

—समाप्तं कथाशतकम्—

---

श्रीगणेशायनमः

# ॥ भारतीश्लोकत्रिशती ॥

पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद्गुणसंयुक्तः प्राप्नुयाच्च महद्यशः ॥ १

प्लवन्ते धर्मलघवो लोकेऽम्भसि यथा प्लवाः ।
मज्जन्ति पापगुरवः शस्त्रं स्कन्नमिवोदके ॥ २

यथा मृत्पिण्डतः कर्त्ता कुरुते यद्यदिच्छति ।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ ३

अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति ।
नान्यस्तस्यापरो धर्म इति प्राहुर्मनीषिणः ॥ ४

पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
बुद्धिरात्मा मनः कालो दिशश्चैव गुणा दश ॥ ५

नित्यमेव हि पश्यन्ति देहिनां देहमाश्रिताः ।
सुकृतं दुष्कृतं वाऽपि कर्म धर्मभृतां वर ॥ ६

अतिथिः पूजितो यद्धि ध्यायते मनसा शुभम् ।
न तत् क्रतुशतेनापि तुल्यमाहुर्मनीषिणः ॥ ७

पात्रं त्वतिथिमासाद्य शीलाढ्यं यो न पूजयेत् ।
स दत्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ८
नाबीजं जायते किंञ्चित् न बीजेन विना फलम् ।
बीजाद्बीजं प्रभवति बीजादेव फलं स्मृतम् ॥ ९
यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ॥ १०
कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ॥ ११
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् ॥ १२
कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम् ।
अकृती लभते भ्रष्टः क्षते क्षारावसेचनम् ॥ १३
तपसा रूपसौभाग्यं रत्नानि विविधानि च ।
प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना ॥ १४
तथा स्वर्गश्च भोगाश्च निष्ठा या च मनीषिता ।
सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ॥ १५
ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः ।
सर्वे पुरुषकारेण मानुष्याद्देवतां गताः ॥ १६
अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम्
श्रीश्चापि दुर्लभा भोक्तुं तथैवाऽकृतकर्मभिः ॥ १७
शौचेन लभते विप्रः क्षत्रियो विक्रमेण तु ।



वैश्यः पुरुषकारेण शूद्रः शुश्रूषया श्रियम् ॥ १८
नाऽदातारं भजन्त्यर्था न क्लीबं नापि निष्क्रियम् ।
नाकर्मशीलं नाशूरं तथा नैवाऽतपस्विनम् ॥ १९
येन लोकास्त्रयः सृष्टा दैत्याः सर्वाश्च देवताः ।
स एव भगवान् विष्णुः समुद्रे तप्यते तपः ॥ २०
स्वच्चेत् कर्मफलं न स्यात् सर्वमेवाऽफलं भवेत् ।
लोको दैवं समालक्ष्य उदासीनो भवेन्ननु ॥ २१
अकृत्वा मानुषं कर्म यो दैवमनुवर्त्तते ।
वृथा श्राम्यति सम्प्राप्य पतिं क्लीबमिवाङ्गना ॥ २२
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनः साक्षी कृतस्यापकृतस्य च ॥ २३
देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते ।
पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति ॥ १४ ॥
पुरा ययातिर्विभ्रष्टः च्यावितः पतितः क्षितौ ।
पुनरारोपितः स्वर्गं दौहित्रैः पुण्यकर्मभिः ॥ १५
पुरूरवाश्च राजर्षिर्द्विजैरभिहितः पुरा ।
ऐल इत्यभिविख्यातः स्वर्गं प्राप्तो महीपतिः ॥ २६
अश्वमेधादिभिर्यज्ञैः संस्कृतः कोसलाधिपः ।
महर्षिशापात्सौदासः पुरुषादत्वमागतः ॥ २७
अश्वत्थामा च रामश्च मुनिपुत्रौ धनुर्धरौ ।
न गच्छतः स्वर्गलोकं स्वकृतेनेह कर्मणा ॥ २८

वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः ।
मिथ्याभिधानेनैकेन रसातलतलं गतः ॥ २९
बलिर्वैरोचनिर्बद्धः धर्मपाशेन दैवतैः ।
विष्णोः पुरुषकारेण पातालसदनः कृतः ॥ ३०
पाण्डवानां हृतं राज्यं धार्त्तराष्ट्रैर्महाबलैः ।
पुनः प्रत्याहृतश्चैव न दैवाद्भुजसंश्रयात् ॥ ३१
यथाग्निः पवतोद्भूतः सुसूक्ष्मोपि महान् भवेत् ।
तथा कर्मसमायुक्तं दैवं साधु विवर्धते ॥ ३२
यथा तैलक्षयाद्दीपः प्रह्रासमुपगच्छति ।
तथा कर्मक्षयाद्दैवं प्रह्रासमुपगच्छति ॥ ३३
विपुलमपि धनौघं प्राप्य भोगान् स्त्रियो वा
पुरुष इह न शक्तः कर्महीनो विभोक्तुम् ।
सुनिहितमपि चार्थं दैवतै रक्ष्यमाणं
पुरुष इह महात्मा प्राप्नुते नित्ययुक्तः ॥ ३४
येन येन शरीरेण यद्यत् कर्म करोति यः ।
तेन तेन शरीरेण तत्तत् फलमुपाश्नुते ॥ ३५
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि ॥ ३६
न नश्यति कृतं कर्म सदा पञ्चेन्द्रियैरिह ।
ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च ॥ ३७



चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ३८
यो दद्यादपरि क्लिष्टमन्नमध्वनि वर्त्तते ।
श्रान्तायाऽदृष्टपूर्वाय तस्य पुण्यफलं महत् ॥ ३९
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥ ४०
अधीत्य सर्ववेदान् वै तद्यो दुःखाद्विमुच्यते ।
मानसं हि चरन्धर्मं स्वर्गलोकमुपाश्नुते ॥ ४१
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्रणान्तिको रोगस्तान्तृष्णां त्यजतः सुखम् ॥ ४२
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
एवं पूर्वकृतं कर्म कर्त्तारमनुगच्छति ॥ ४३
अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्त्तन्ते तथा कर्म पुरा कृतम् ॥ ४४
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
जीर्यतश्चक्षुषी श्रोत्रे तृष्णैका तु न जीर्यति ॥ ४५
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ॥ ४६
येन प्रीणात्युपाध्यायं तेन स्यात् ब्रह्म पूजितम् ।
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफला क्रियाः ॥ ४७

यो न दद्यात् प्रतिश्रुत्य स्वल्पं वा यदि वा बहु ।
आशास्तस्य हताः सर्वा क्लीबस्येव प्रजाफलम् ॥ ४८
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
सृगालस्य च संवादं वानरस्य च भारत ॥ ४९
तौ सखायौ पुरा ह्यास्तां मानुषत्वे परन्तप ।
अन्यां योनिं समापन्नौ सार्गालीं वानरीं तथा ॥ ५०
ततः परासून् खादन्तं सृगालं वानरोऽब्रवीत् ।
श्मशानमध्ये सम्प्रेक्ष्य पूर्वजातिमनुस्मरन् ॥ ५१
किं त्वया पातकं पूर्वं कृतं कर्म सुदारुणम् ।
यस्त्वं श्मशाने मृतकान् पूतिकानात्सि कुत्सितान् ॥ ५२
एवमुक्तः प्रत्युवाच सृगालो वानरं तदा ।
ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाहृतम् ॥ ५३
तत्कृते पापकीं योनिमापन्नोऽस्मि प्लवंगम ।
तस्मादेवंविधं भक्ष्यं भक्षयामि बुभुक्षितः ॥ ५४
सृगालो वानरं प्राह पुनरेव नरोत्तम ।
किं त्वया पातकं कर्म कृतं येनासि वानरः ॥ ५५

वानर उवाच—

सदा चाहं फलाहारो ब्राह्मणानां प्लवङ्गमः ।
तस्मान्न ब्राह्मणस्वं तु हर्त्तव्यं विदुषा सदा ॥ ५६
समं विवादो मोक्तव्यो दातव्यञ्च प्रतिश्रुतम् ।
न हर्त्तव्यं विप्रधनं क्षन्तव्यं तेषु नित्यशः ॥ ५७



बालाश्च नावमन्तव्या दरिद्राः कृपणा अपि ॥ ५८
तस्करेभ्यः परेभ्यो वा ये भयार्त्ता युधिष्ठिर ।
अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम् ॥ ५९
प्रपाणाञ्च सभानाञ्च सङ्क्रमाणाञ्च भारत ।
अगाराणाञ्च भेत्तारः नरा निरयगामिणः ॥ ६०
अनाथां प्रमदां बालां वृद्धां भीतां तपस्विनीम् ।
वञ्चयन्ति नरा ये च ते वै निरयगामिणः ॥ ६१
कृताशं कृतनिर्देशं कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यपकर्षन्ति ते वै निरयगामिणः ॥ ६२
शिलाभिः शङ्कुभिर्वाऽपि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमनुरुन्धन्ति ते वै निरयगामिणः ॥ ६३
उपाध्यायांश्च भृत्यांश्च भक्तांश्च भरतर्षभ ।
ये त्यजन्त्यविकारांस्त्रीन् ते वै निरयगामिणः ॥ ६४
बालानामथ वृद्धानां दासानाञ्चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिणः ॥ ६५
क्षान्तान् दान्तान् तथा प्राज्ञान् दीर्घकालं सहोषितान् ।
त्यजन्ति कृतकृत्या ये ते वै निरयगामिणः ॥ ६६
सर्वेष्वेव तु कार्येषु देवपूर्वेषु भारत ।
हन्ति पुत्रान् पशून् कृत्स्नान् ब्राह्मणातिक्रमः कृतः ॥ ६७
दानेन तपसा चैव सत्येन च युधिष्ठिर ।
ये धर्ममनुवर्त्तन्ते ते नराः स्वर्गगामिणः ॥ ६८

शुश्रूषाभिस्तपोभिश्च विद्यामादाय भारत ।
ये प्रतिग्रहनि.स्नेहास्ते नराः स्वर्गगामिणः ॥ ६९
भयात्पापात्तथा बाधाद्दारिद्र्याद्व्याधिधर्षणात् ।
यत्कृते प्रतिमुच्यन्ते ते नराः स्वर्गगामिणः ॥ ७०
निवृत्ता मधुमांसेभ्यः परदारेभ्य एव च ।
निवृत्ताश्चैव मद्येभ्यः ते नराः स्वर्गगामिणः ॥ ७१
आश्रमाणाञ्च कर्त्तारः कुलानाञ्चैव भारत ।
देशानां नगराणाञ्च ते नराः स्वर्गगामिणः ॥ ७२
सर्वहिंसानिवृत्ताश्च नराः सर्वंसहाश्च ये ।
सर्वस्याऽऽश्रयभूताश्च ते नराः स्वर्गगामिणः ॥ ७३
मातरं पितरञ्चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातृणाञ्चैव सस्नेहास्ते नराः स्वर्गगामिणः ॥ ७४
आढ्याश्च बलवन्तश्च यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास्ते नराः स्वर्गगामिणः ॥ ७५
सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां ते नराः स्वर्गगामिणः ॥ ७६
सुवर्णस्य च दातारो गावाञ्च भरतर्षभ ।
यानानां वाहनानाञ्च ते नराः स्वर्गगामिणः ॥ ७७
वैवाहिकानां द्रव्याणां प्रेष्याणाञ्च युधिष्ठिर ।
दातारो वाससाञ्चैव पुरुषाः स्वर्गगामिणः ॥ ७८



निवेशानानां क्षेत्राणां वसतीनाञ्च भारत ।
दातारः प्रार्थितानाञ्च ते नराः स्वर्गगामिनः ॥ ७९
रसानाञ्चाथ बीजानां धान्यानाञ्च युधिष्ठिर ।
स्वयमुत्पाद्य दातारः पुरुषाः स्वर्गगामिनः ॥ ८०
यस्मिंस्तस्मिन् कुले जाता बहुपुत्राः शतायुषः ।
सानुक्रोशा जितक्रोधाः पुरुषाः स्वर्गगामिनः ॥ ८१
भक्तानामनुरक्तानामाश्रितानाञ्च रक्षिता ।
दयावान् सर्वभूतेषु परत्र सुखमेधते ॥ ८२
दुर्ग्राह्यो मुष्टिना वायुर्दुस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी राजन् दुर्जया ब्राह्मणा भुवि ॥ ८३
ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ।
पितरः सर्वभूतानां नैतेभ्यो विद्यते परम् ॥ ८४
अशक्यं स्प्रष्टुमाकाशं अचाल्यो हिमवान् गिरिः ।
अधार्या सेतुना गङ्गा दुर्जया ब्राह्मणा भुवि ॥ ८५
न ब्राह्मणविरोधेन शक्या शास्तुं वसुन्धरा ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः ॥ ८६
तान् पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥ ८७
प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रहं ये नेच्छेयुस्तेभ्यो रक्ष्यं त्वया नृप ॥ ८८

भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानञ्चाप्ययोद्धारं ब्राह्मणञ्चाप्रवासिनम् ॥ ८९
अभिमानः श्रियं हन्ति पुरुषस्याल्पमेधसः ।
गर्भेण दूष्यते कन्या गृहवासेन च द्विजः ॥ ९०
अधिकारे यदनृतं यच्च राजसु पैशुनम् ।
गुरोश्चालीककरणं तुल्यं तद्ब्रह्महत्यया ॥ ९१
नाग्निं परित्यजेज्जातु न च देवान् परित्यजेत् ।
न च ब्राह्मणमाक्रोशेत्समं तद्ब्रह्महत्यया ॥ ९२
साङ्गांश्च चतुरो वेदान् अधीते यो द्विजर्षभः ।
षड्भ्यः प्रवृत्तः कर्मभ्यः तं पात्रमृषयो विदुः ॥ ९३
पूज्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप ।
स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवताः ॥ ९४
अपूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः ।
तदा चैतत् कुलं नास्ति यदा शोचन्ति जामयः ॥ ९५
यामी शप्तानि गेहानि निकृत्तानीव कृत्यया ।
नैव भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव ॥ ९६
श्रिय एताः स्त्रियो नाम सत्कार्या भूतिमिच्छता ।
पालिता निगृहीता च श्रीः स्त्री भवति भारत ॥ ९७
ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रञ्च धर्मज्ञं सद्वृत्तमपि पूजयेत् ॥ ९८



अनार्यत्वमनाचारः क्रूरत्वं निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ ९९
गावो लक्ष्म्याः सदा मूलं गोषु पाप्मा न विद्यते ।
अन्नमेव सदा गावो देवानां परमं हविः ॥ १००
अमृतं ह्यव्ययं दिव्यं क्षरन्ति च वहन्ति च ।
अमृतायतनञ्चैताः सर्वलोकनमस्कृता : ॥ १०१
तेजसा वपुषा चैव गावो वह्निसमा भुवि ।
गावो हि सुमहत्तेजः प्राणिनाञ्च सुखप्रदाः ॥ १०२
निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ।
विराजयति तं देशं पापञ्चास्यापकर्षति ॥ १०३
गावः स्वर्गस्य सोपानं गावः स्वर्गेऽपि पूजिताः ।
गावः कामदुहो देव्यः नान्यत् किञ्चित् परं स्मृतम ॥ १०४
पूष्पैः सुरगणान् वृक्षाः फलैश्चापि तथा पितॄन् ।
छायया चातिथिं तात पूजयन्ति महीरुहाः ॥ १०५
स कुलं तारयेत् सर्वं यस्य खाते जलाशये ।
गावः पिबन्ति सलिलं साधवश्च नराः सदा ॥ १०६
तटागकृद्वृक्षरोपी इष्टयज्ञश्च यो द्विजः ।
एते स्वर्गे महीयन्ते ये चान्ये सत्यवादिनः ॥ १०७
अमित्रमपि चेद्दीनं शरणैषिणमागतम् ।
व्यसने योऽनुगृह्णाति स वै पुरुषसत्तमः ॥ १०८

कृशाय कृतविद्याय वृत्तिक्षीणाय सीदते ।
अपहन्यात् क्षुधां यस्तु न तेन पुरुषः समः ॥ १०९

क्षत्रियो रक्षणधृतिर्ब्राह्मणोऽनर्थनाधृतिः ।
ब्राह्मणो धृतिमान् विद्वान् देवान् प्रीणाति तुष्टिमान् ॥ ११०

म्रियते याचमानो वै न जातु म्रियते ददत् ।
ददत्सञ्जीवयत्येनमात्मानञ्च युधिष्ठिर ॥ १११

आनृशंस्यं परो धर्मो याचते यत् प्रदीयते ।
अयाचतः सीदमानान् सर्वोपायैर्निमन्त्रयेत् ॥ ११२

धिक् तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति ।
द्विजोऽन्यो वा मनुष्योऽपि शिबिराह वचो यथा ॥ ११३

यस्य स्म विषये राज्ञः स्नातकः सीदति क्षुधा ।
अवृद्धिमेति तद्राष्ट्रं निन्द्यते सह राजकम् ॥ ११४

क्रोशन्त्यो यस्य वै राष्ट्रात् ह्रियन्ते तरसा स्त्रियः ।
क्रोशतां पतिपुत्राणां मृतोऽसौ न च जीवति ॥ ११५

अरक्षितारं हर्त्तारं विलोप्तारमनायकम् ।
तं वै राजकलिं हन्युः प्रजाः सन्नह्य निर्घृणम् ॥ ११६

अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥ ११७

यथा स्वपुत्रं जननी क्षीरेण भरते सदा ।
अनुगृह्णाति दातारं तथा सर्वरसैर्मही ॥ ११८



स कुलीनः स पुरुषः स बन्धुः स च पुण्यकृत् ।
स दाता स च विक्रान्तो यो ददाति वसुन्धराम् ॥ ११९

नास्ति भूमिसमं दानं नास्ति मातृसमो गुरुः ।
नास्ति सत्यसमो धर्मः नास्ति दानसमो निधिः ॥ १२०

युधिष्ठिर उवाच—

कानि दानानि लोकेऽस्मिन् दातुकामो महीपतिः ।
गुणाधिकेभ्यो विप्रेभ्यो दद्याद्भरतसत्तम ॥ १२१

केन तुष्यन्ति ते सद्यः किन्तुष्टाः प्रदिशन्ति च ।
शंस मे तन्महाबाहो फलं पुण्यकृतं महत् ॥ १२२

दत्तं किं फलवद्राजन् इहलोके परत्र च ।
भवतः श्रोतुमिच्छामि तन्मे विस्तरतो वद ॥ १२३

भीष्म उवाच—

इममर्थं पुरा पृष्टो नारदो देवदर्शनः ।
यदुक्तवानसौ वाक्यं तन्मे निगदतः शृणु ॥ १२४

नारद उवाच—

अन्नमेव प्रशंसन्ति देवा ऋषिगणास्तथा ।
लोकतन्त्रं हि संज्ञाश्च सर्वमन्ने प्रतिष्ठितम् ॥ १२५

अन्नेन सदृशं दानं न भूतं न भविष्यति ।
तस्मदन्नं विशेषेण दातुमिच्छन्ति मानवाः ॥ १२६

अन्नमूर्जस्करं लोके प्राणाश्चान्ने प्रतिष्ठिताः ।
अन्नेन धार्यते सर्वं विश्वं जगदिदं प्रभो ॥ १२७

अन्नाद्गृहस्था लोकेऽस्मिन् भिक्षवस्तापसास्तथा ।
अन्नाद्भवन्ति वै प्राणाः प्रत्यक्षं नात्र संशयः ॥ १२८
कुटुम्बं पीडयित्वा तु ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता ॥ १२९
ब्राह्मणायाऽभिरूपाय यो दद्यादन्नमर्थिने ।
विदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः ॥ १३०
श्रान्तमध्वनि वर्त्तन्तं वृद्धमर्हमुपस्थितम् ।
अर्चयेद्भूतिमन्विच्छन् गृहस्थो गृहमागतम् ॥ १३१
क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अन्नदः प्राप्नुते राजन् दिवि चेह च यत् सुखम् ॥ १३२
नावमन्येदभिगतं न प्रणुद्यात् कथञ्चन ।
अपि श्वपाके शुनि वा न दानं विप्रणश्यति ॥ १३३
यो दद्यादपरिक्लिष्टमन्नमध्वनिवर्त्तते ।
श्रान्तायाऽदृष्टपूर्वाय स महद्धर्ममाप्नुयात् ॥ १३४
पितृन्देवानृषीन् विप्रान् अतिथींश्च जनाधिप ।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् ॥ १३५
कृत्वाऽतिपातकं कर्म यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन मुह्यते ॥ १३६
ब्राह्मणेष्वक्षयं दानमन्नं शूद्रे महाफलम् ।
अन्नदानं हि शूद्रे च ब्राह्मणस्य विशिष्यते ॥ १३७



न पृच्छेद्गोत्रचरणं स्वाध्यायं देशमेव च ।
भिक्षितो ब्राह्मणेनेह दद्यादन्नं प्रयाचितः ॥ १३८
अन्नदस्यान्नवृक्षाश्च सर्वकामफलप्रदाः ।
भवन्ति चेह चामुत्र नृपते नात्र संशयः ॥ १३९
आशंसन्ते हि पितरः सुवृष्टिमिव कर्षकः ।
अस्माकमपि पुत्रो वा पौत्रो वाऽन्नं प्रदास्यति ॥ १४०
ब्राह्मणो हि महद्भूतं स्वयं देहीति याचति ।
अकामो वा सकामो वा दत्त्वा पुण्यमवाप्नुयात् ॥ १४१
ब्राह्मणः सर्वभूतानामतिथिः प्रसृताग्रभुक् ।
विप्रा यदधिगच्छन्ति भिक्षमाणा गृहं सदा ॥ १४२
सत्कृताश्च निवर्त्तन्ते तदतीव प्रवर्धते ।
महाभोगे कुले प्रेत्य जन्म चाप्नोति भारत ॥ १४३
दत्वा त्वन्नं नरो लोके यथास्थानमनुत्तमम् ।
नित्यं मृष्टान्नदायी तु स्वर्गे वसति सत्कृतः ॥ १४४
अन्नं प्राणा नराणां हि सर्वमन्ने प्रतिष्ठितम् ।
अन्नदः पशुमान् पुत्री धनवान् भोगवानपि ॥ १४५
प्राणवांश्चापि भवति रूपवांश्च तथा नृप ।
अन्नदः प्राणदो लोके सर्वदः प्रोच्यते तु सः ॥ १४६
अन्नं हि दत्त्वातिथये ब्राह्मणाय यथाविधि ।
प्रदाता सुखमाप्नोति दैवतैश्चापि पूज्यते ॥ १४७

ब्राह्मणो हि महद्भूतं क्षेत्रभूतं युधिष्ठिर ।
उप्यते तत्र यद्बीजं तद्धि पुण्यफलं महत् ॥ १४८

प्रत्यक्षं प्रीतिजननं भोक्तुर्दातुर्भवत्युत ।
सर्वाण्यन्यानि दानानि परोक्षफलवन्त्युत ॥ १४९

अन्नाद्धि प्रसवं यान्ति रतिरन्नाद्धि भारत ।
धर्मार्थावन्नतो विद्धि रोगनाशं तथाऽन्नतः ॥ १५०

अन्नं ह्यमृतमित्याह पुरा कल्पे प्रजापतिः ।
अन्नं भुवं दिवं खञ्च सर्वमन्ने प्रतिष्ठितम् ॥ १५१

अन्नप्रणाशे भिद्यन्ते शरीरे पञ्च धातवः ।
बलं बलवतोऽपीह प्रणश्यत्यन्नहानितः ॥ १५२

आवाहाश्च विवाहाश्च यज्ञाश्चान्नमृते तथा ।
निवर्त्तन्ते नरश्रेष्ठ ब्रह्म चात्र प्रलीयते ॥ १५३

अन्नतः सर्वमेतद्धि यत् किञ्चित् स्थाणु जङ्गमम् ।
त्रिषु लोकेषु धर्मार्थमन्नं देयमतो बुधैः ॥ १५४

अन्नदस्य मनुष्यस्य बलमोजो यशांसि च ।
कीर्तिश्च वर्धते शश्वत् त्रिषु लोकेषु पार्थिव ॥ १५५

मेघेषूर्ध्वं सन्निधत्ते प्राणानां पवनः पतिः ।
तच्च मेघगतं वारि शक्रो वर्षति भारत ॥१५६

आदत्ते च रसान् भौमानादित्यः स्वगभस्तिभिः ।
वायुरादित्यतस्तांश्च रसान्देवः प्रवर्षति ॥ १५७



तद्यदा मेघतो वारि पतितं भवति क्षितौ ।
तदा वसुमती देवी स्निग्धा भवति भारत ॥ १५८

ततः सस्यानि रोहन्ति येन वर्त्तयते जगत् ।
मांसमेदोऽस्थिशुक्राणां प्रादुर्भावस्ततः पुनः ॥ १५९

सम्भवन्ति ततः शुक्रात् प्राणिनः पृथिवीपते ।
अग्नीषोमौ हि तच्छुक्रं सृजतः पुष्यतश्च ह ॥ १६०

एवमन्नाद्धि सूर्यश्च पवनः शुक्रमेव च ।
एक एव स्मृतो राशिस्ततो भूतानि जज्ञिरे ॥ १६१

प्राणान्ददाति भूतानां तेजश्च भरतर्षभ ।
गृहमभ्यागतायाथ यो दद्यादन्नमर्थिने ॥ १६२

भीष्म उवाच—

नारदेनैवमुक्तोऽहमदामन्नं सदा नृप ।
अनसूयस्त्वमप्यन्नं तस्माद्देहि गतज्वरः ॥ १६३

दत्त्वाऽन्नं विधिवद्राजन् विप्रेभ्यस्त्वमिति प्रभो ।
यथावदनुरूपेभ्यस्ततः स्वर्गमवाप्स्यसि ॥ १६४

अन्नदानाद्धि ये लोकास्तांस्त्वं शृणु जनाधिप ।
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ॥ १६५

तारासंस्थानरूपाणि नानास्तंभान्वितानि च ।
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ॥ १६६

तरुणादित्यवर्णानि स्थावराणि चराणि च ।

अनेकशतभौमानि सान्तर्जलचराणि च ।
वैदूर्यार्कप्रकाशानि रौप्यरुक्ममयानि च ॥ १६७
सर्वकामफलाश्चापि वृक्षा भवनसंस्थिताः ।
वाप्यो वीथ्यः सभाः कूपा दीर्घिकाश्चैव सर्वशः ॥ १६८
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः ।
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च ॥ १६९
क्षीरं स्रवन्ति सरितस्तथा चैवान्नपर्वताः ।
प्रासादाः पाण्डुराभ्राभाः शय्याश्च कनकोज्ज्वलाः
तान्यन्नदाः प्रपद्यन्ते तस्मादन्नप्रदो भव ॥ १७०
एते लोकाः पुण्यकृतामन्नदानां महात्मनाम् ।
तस्मादन्नं प्रयत्नेन दातव्यं मानवैर्भुवि ॥ १७१
पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति ।
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥ १७२
अर्चयित्वा यथान्यायं देवेभ्योऽन्नं निवेदयेत् ।
यदन्ना हि नरा राजंस्तदन्नास्तस्य देवताः ॥ १७३
अहिंसकानि भूतानि दण्डेन विनिहन्ति यः ।
आत्मनः सुखमन्विच्छन् स प्रेत्य न सुखी भवेत् ॥ १७४
न तत् परस्य सन्दध्यात् प्रतिकूलं यदात्मनः ।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥ १७५
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ १७६



यथा परः प्रक्रमते परेषु तथा परे प्रक्रमन्ते परस्मिन् ।
तथैव तेषूपमा जीवलोके यथा धर्मो निपुणेनोपदिष्टः ॥ १७७
सर्वभूतेषु यो विद्वान् ददात्यभयदक्षिणाम् ।
दाता भवति लोके स प्राणानां नात्र संशयः ॥ १७८
एतं वै परमं धर्मं प्रशंसन्ति मनीषिणः ।
प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि वै तथा ॥ १७९
आत्मौपम्येन मन्तव्यं बुद्धिमद्भिः कृतात्मभिः ।
मृत्युतो भयमस्तीति विदुषां भूतिमिच्छताम् ॥ १८०
किं पुनर्हन्यमानानां तरसा जीवितार्थिनाम् ।
अरोगाणामपापानां पापैर्मांसोपजीविभिः ॥ १८१
तस्माद्विद्धि महाराज मांसस्य परिवर्जनम् ।
धर्मस्यायतनं श्रेष्ठं स्वर्गस्य च सुखस्य च ॥ १८२
अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः ।
अहिंसा परमं सत्यं यतो धर्मः प्रवर्तते ॥ १८३
न हि मांसं तृणात् काष्ठात् उपलाद्वाऽपि जायते ।
हत्वा जन्तुं ततो मांसं तस्माद्दोषस्तु भक्षणे ॥ १८४
कान्तारेष्वथ घोरेषु दुर्गेषु गहनेषु च ।
रात्रावहनि सन्ध्यासु चत्वरेषु सभासु च ॥ १८५
उद्यतेषु च शस्त्रेषु मृगव्यालभयेषु च ।
अमांसभक्षणे राजन् भयमन्यैर्न गच्छति ॥ १८६

शरण्यः सर्वभूतानां विश्वास्यः सर्वजन्तुषु ।
अनुद्वेगकरो लोके न चाप्युद्विजते सदा ॥ १८७
यदि चेत् खादको न स्यात् न तदा घातको भवेत् ।
घातकः खादकार्थाय यद्घातयति वै नरः ॥ १८८
अभक्ष्यमेतदिति वै इति हिंसा निवर्त्तते ।
खादकार्थमतो हिंसा मृगादीनां प्रवर्त्तते ॥ १८९
यस्माद्ग्रसति चैवायुर्हिंसकानां महाद्युते ।
तस्माद्विवर्जयेन्मांसं य इच्छेद्भूतिमात्मनः ॥ १९०
त्रातारं नाधिगच्छन्ति रौद्राः प्राणिविहिंसकाः ।
उद्वेजनीया भूतानां यथा व्यालमृगास्तथा ॥ १९१
धन्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ।
मांसस्याऽभक्षणं प्राहुर्नियताः परमर्षयः ॥ १९२
यो वै खादति मांसानि प्राणिनां जीवितैषिणाम् ।
हतानां वा मृतानां वा यथा हन्ता तथैव सः ॥ १९३
धनेन क्रयिको हन्ति खादकश्चोपभोगतः ।
घातको वधबन्धाभ्यां इत्येषु त्रिविधो वधः ॥ १९४
अधृष्यः सर्वभूतानामायुष्मान्नीरुजः सुखी ।
भवत्यभक्षयन्मांसं दयावान् प्राणिनामिह ॥ १९५
हिरण्यदानैर्गोदानैर्भूमिदानैश्च सर्वशः ।
मांसस्याभक्षणे धर्मो विशिष्ट इति नः श्रुतिः ॥ १९६



सर्वज्ञां सर्वतत्वज्ञां देवलोके मनस्विनीम् ।
कैकेयी सुमना नाम शाण्डिलीं पर्यपृच्छत ॥ १९७
केन वृत्तेन कल्याणि समाचारेण केन वा ।
विधूय सर्वपापानि देवलोकं त्वमागता ॥ १९८
हुताशनशिखेव त्वं ज्वलमाना स्वतेजसा ।
सुता ताराधिपस्येव प्रभया दिवमागता ॥ १९९
अरजांसि च वस्त्राणि धारयन्ती गतक्लमा ।
विमानस्था शुभे भासि सहस्रगुणमोजसा ॥ २००
न त्वमल्पेन तपसा दानेन नियमेन च ।
इमं लोकमनुप्राप्ता त्वं हि तत्त्वं वदस्व मे ॥ २०१
इति पृष्टा सुमनया मधुरं चारुहासिनीम् ।
शाण्डिली निभृतं वाक्यं सुमनामिदमब्रवीत् ॥ २०२
नाहं काषायवसना नापि वल्कलधारिणी ।
न च मुण्डा च जटिला भूत्वा देवत्वमागता ॥ २०३
अहितानि च वाक्यानि सर्वाणि परुषाणि च ।
अप्रमत्ता च भर्त्तारं कदाचिन्नाहमब्रवम् ॥ २०४
देवतानां पितॄणाञ्च ब्राह्मणानाञ्च पूजने ।
अप्रमत्ता सदा युक्ता श्वश्रूश्वशुरवर्त्तिनी ॥ २०५
पैशुन्ये न प्रवर्त्तामि न ममैतन्मनोगतम् ।
अद्वारि न च तिष्ठामि चिरं न कथयामि च ॥ २०६

असद्वा हसितं किञ्चित् अहितं वापि कर्मणा ।
रहस्यमरहस्यं वा न प्रवर्त्तामि सर्वथा ॥ २०७
कार्यार्थे निर्गतञ्चापि भर्त्तारं गृहमागतम् ।
आसनेनोपसंयोज्य पूजयामि समाहिता ॥ २०८
यदन्नं नाभिजानाति यद्भोज्यं नाभिनन्दति ।
भक्ष्यं वा यदि वा लेह्यं तत् सर्वं वर्जयाम्यहम् ॥ २०९
कुटुम्बार्थे समानीतं यत् किञ्चित् कार्यमेव तु ।
प्रातरुत्थाय तत्सर्वं कारयामि करोमि च ॥ २१०
प्रवासं यदि मे याति भर्त्ता कार्येण केनचित् ।
मङ्गलैर्बहुभिर्युक्ता भवामि नियता तदा ॥ २११
अञ्जनं रोचनं चैव स्नानं माल्यानुलेपनम् ।
प्रसाधनञ्च निष्क्रान्ते नाभिनन्दामि भर्त्तरि ॥ २१२
नोत्थापयामि भर्त्तारं सुखसुप्तमहं सदा ।
आन्तरेष्वपि कार्येषु तेन तुष्यति मे मनः ॥ २१३
नायासयामि भर्त्तारं कुटुम्बार्थेऽपि सर्वदा ।
गुप्तगुह्या सदा चास्मि सुसंहृष्टनिवेशया (ना) ॥ २१४
इमं धर्मपथं नारी पालयन्ती समाहिता ।
अरुन्धतीव नारीणां स्वर्गलोके महीयते ॥ २१५
एतदाख्याय सा देवी सुमनायै तपस्विनी ।
पतिधर्मं महाभागा जगामादर्शनं तदा ॥ २१६



न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा ।
स्पृहा यस्या यथा पत्यौ सा नारी धर्मभागिनी ॥ २१७
कल्योत्थानरतिर्नित्यं गृहशुश्रूषणे रता ।
सुसम्मृष्टक्षया चैव गोशकृत्कृततलेपना ॥ २१८
अग्निकार्यपरा नित्यं सदा पुष्पबलिप्रदा ।
देवतातिथिभृत्यानां निवाप्य पतिना सह ॥ २१९
शेषान्नमपि भुञ्जाना यथान्यायं यथाविधि ।
तुष्टपुष्टजना नित्यं नारी धर्मेण युज्यते ॥ २२०
पतिर्हि देवो नारीणां पतिर्बन्धुः पतिर्गतिः ।
पत्या गतिः समा नास्ति दैवतं वा यथा पतिः ॥ २२१

शिलवृत्तिरुवाच—

के देशाः के जनपदाः के श्रमाः के च पर्वताः ।
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यस्तदुच्यताम् ॥ २२२

सिद्ध उवाच—

ते देशास्ते जनपदास्ते श्रमास्ते च पर्वताः ।
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥ २२३
तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं तां लभते जन्तुर्गङ्गां संसेव्य यां लभेत् ॥ २२४
स्पृष्टानि येषां गांगेयैस्तोयैर्गात्राणि देहिनाम् ।
न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते ॥ २२५

सर्वाणि येषां गाङ्गेयैस्तोयैः कार्याणि देहिनाम् ।
गां त्यक्त्वा मानवा विप्र दिवि तिष्ठन्ति ते जनाः ॥ २२६
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चात् गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम् ॥ २२७
स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ २२८
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गे लोके महीयते ॥ २२९
अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथाऽपहत्य पाप्मानं भाति गङ्गाजलोक्षितः ॥ २३०
विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गङ्गाजलैः शिवैः ॥ २३१
वर्णाश्रमा यथा सर्वे धर्मज्ञानविवर्जिताः ।
क्रतवश्च यथाऽसोमास्तथा गङ्गां विना जगत् ॥२३२
यथा हीनं नभोऽर्केण भूः शैलैः खञ्च वायुना ।
तथा देशा दिशश्चैव गङ्गाहीना न संशयः ॥ २३३
त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परा तृप्तिं यान्ति गङ्गाजलैः शुभैः ॥ २३४
यस्तु सूर्येण निष्टप्तं गाङ्गेयं पिबते जलम् ।
गवां निर्हारनिर्मुक्तायावकात्तद्विशिष्यते ॥ २३५



इन्दुव्रतसहस्रन्तु यश्चरेत् कायशोधनम् ।
पिबेद्यश्चापि गङ्गाम्भः समौ स्यातां न वा समौ ॥
तिष्ठेद्युगसहस्रन्तु पादेनैकेन यः पुमान् ।
मासमेकन्तु गङ्गायां समौ स्यातां नवा समौ ॥
लम्बेतावाक्शिरा यस्तु युगानामयुतं पुमान् ।
तिष्ठेद्यथेष्टं यश्चापि गङ्गायां स विशिष्यते ॥
अग्नौ प्राप्तं प्रधूयेत यथा तूलं द्विजोत्तम ।
तथा गङ्गावगाढस्य सर्वपापं प्रधूयते ॥
भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
गतिमन्वेषमाणानां न गङ्गासदृशी गतिः ॥ २४०
भवन्ति निर्विषाः सर्पा तथा तार्क्ष्यस्य दर्शनात् ।
गङ्गाया दर्शनात्तद्वत् सर्वपापैः प्रमुच्यते ॥
अप्रतिष्ठाश्च ये केचिदशर्मशरणाश्च ये ।
तेषां प्रतिष्ठा गङ्गेह शरणं शर्म वर्म च ॥
प्रकृष्टैरशुभैर्ग्रस्तान् अनेकैः पुरुषाधमान् ।
पततो नरके गङ्गा संश्रितान् प्रेत्य तारयेत् ॥
ते संविभक्ता मुनिभिर्नूनं देवैः सवासवैः ।
येऽभिगच्छन्ति सततं गङ्गां गतिमतां वर ॥
विनयाचारहीनाश्च अशिवाश्च नराधमाः ।
ते भवन्ति शिवा विप्र ये वै गङ्गामुपाश्रिताः ॥

यथा सुराणाममृतं पितॄणाञ्च यथा स्वधा ।
सुधा यथा च नागानां तथा गङ्गाजलं नृणाम् ॥
उपासते यथा बाला मातरं क्षुत्तयाऽर्दिताः ।
श्रेयस्कामास्तथा गङ्गामुपासन्तीह देहिनः ॥
स्वायम्भुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते ।
स्नातानां सरितां श्रेष्ठा गङ्गा तद्वदिहोच्यते ॥
यथोपजीविनां धेनुः देवादीनां धरा स्मृता ।
तथोपजीविनां गङ्गा सर्वप्राणभृतामिह ॥ २५०
देवाः सोमार्कसंस्थानि तथा सत्रादिभिर्मखैः ।
अमृतान्युपजीवन्ति यथा गङ्गाजलं नराः ॥
जाह्नवीपुलिनोत्थाभिः सिकताभिः समुक्षितम् ।
आत्मानं मन्यते लोके दिविष्ठमिव शोभितम् ॥
जाह्नवीतीरसम्भूतां मृदं मूर्ध्ना बिभर्त्ति यः ।
बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय निर्मलम् ॥
गङ्गोर्मिभिरथो दिग्धः पुरुषं पवनो यदा ।
स्पृशते सोऽस्य पाप्मानं सद्य एवापकर्षति ॥
व्यसनैरभिततस्य नरस्य विनशिष्यतः ।
गङ्गादर्शनजा प्रीतिर्व्यसनान्यपकर्षति ॥
हंसारावैः कोकरवै रवैरन्यैश्च पक्षिणाम् ।
पस्पर्ध गङ्गा गन्धर्वान् पुलिनैश्च शिलोच्चयान् ॥



हंसादिभिः सुबहुभिः विविधैः पक्षिभिर्वृताम् ।
गङ्गां गोकुलसम्बाधां दृष्ट्वा स्वर्गोऽपि विस्मृतः ॥
न सा प्रीतिर्दिविष्ठस्य सर्वकामानुपासतः ।
सम्भवेद्या परा प्रीतिर्गङ्गायाः पुलिने नृणाम् ॥
वाङ्मनः कर्मजैर्ग्रस्तः पापैरपि पुमानिह ।
वीक्ष्य गङ्गां भवेत्पूतः अत्र मे नास्ति संशयः ॥
सप्तावरान् सप्त परान् पितॄंस्तेभ्यश्च ये परे ।
पुमांस्तारयते गङ्गां वीक्ष्य स्पृष्ट्वावगाह्य च ॥ २६०
श्रुताऽभिलषिता पीता स्पृष्टादृष्टाऽवगाहिता ।
गङ्गा तारयते नृणामुभौ वंशौ विशेषतः ॥ २६१
दर्शनात् स्पर्शनात् पानात् तथा गङ्गेति कीर्त्तनात् ।
पुनात्यपुण्यान् पुरुषान् शतशोऽथ सहस्रशः ॥ २६२
य इच्छेत् सफलं जन्म जीवितं श्रुतमेव च ।
स पितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा ॥ २६३
न सुतैर्न च वित्तेन कर्मणा न च तत् फलम् ।
प्राप्नुयात् पुरुषोऽत्यन्तं गङ्गां प्राप्य यदाप्नुयात् ॥ २६४
जात्यन्धैरिह तुल्यास्ते मृतैः पंगुभिरेव वा ।
समर्था ये न पश्यन्ति गङ्गां पुण्यजलां शिवाम् ॥ २६५
भूतभव्यभविष्यज्ञैर्महर्षिभिरुपस्थिताम् ।
देवैः सेन्द्रैश्च को गङ्गां नोपसेवेत मानवः ॥ २६६

वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्यावद्भिः श्रितां गङ्गां पुमान् को नाम नाश्रयेत् ॥ २६७
उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसम्मतः ।
चिन्तयेन्मनसा गङ्गां स गतिं परमां लभेत् ॥ २६८
न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः ।
आदेहपतनाद्गङ्गामुपास्ते यः पुमानिह ॥ २६९
महापुण्याच्च गगनात् पतन्तीं वै महेश्वरः ।
दधार शिरसा गङ्गां तामेव दिवि सेवते ॥ २७०
अलंकृतास्त्रयो लोकाः पथिभिर्विमलैस्त्रिभिः ।
यस्तु तस्या जलं सेवेत् कृतकृत्यः पुमान् भवेत् ॥ २७१
दिवि ज्योतिर्यथादित्यः पितॄणाञ्चैव चन्द्रमाः ।
देवेशश्च यथा नृणां गङ्गा च सरितां तथा ॥ २७२
मात्रा पित्रा सुतैर्दारैः विमुक्तस्य धनेन वा ।
न भवेद्धि तथा दुःखं यथा गङ्गावियोगजम् ॥ २७३
नारण्यैर्नेष्टविषयैर्न सुतैर्न धनागमैः ।
तथा प्रसादो भवति गङ्गां वीक्ष्य यथा भवेत् ॥ २७४
पूर्णमिन्दुं यथा दृष्ट्वा नृणां दृष्टिः प्रसीदति ।
तथा त्रिपथगां दृष्ट्वा नृणां दृष्टिः प्रसीदति ॥ २७५
तद्भावस्तद्गतमनास्तन्निष्ठस्तत्परायणः ।
गङ्गां योऽनुगतो भक्त्या स तस्याः प्रियतां व्रजेत् ॥ २७६



भूस्थैः खस्थैर्दिविष्ठैश्च भूतैरुच्चावचैरपि ।
गङ्गा विगाह्या सततमेतत् कार्यतमं सताम् ॥ २७७
विश्वलोकेषु पुण्यत्वात् गङ्गायाः प्रथितं यशः ।
यत् पुत्रान् सगरस्यैतो भस्माख्यानानयद्दिवम् ॥ २७८
वाच्चीरिताभिः सुमनोहराभिः द्रुताभिरत्यर्थसमुत्थिताभिः ।
गङ्गोर्मिभिर्भानुमतीभिरिद्धाः सहस्ररश्मिप्रतिमा भवन्ति ॥ २७९
पयस्विनीं घृतिनीमत्युदारां समृद्धिनीं वेगिनीं दुर्विगाह्याम् ।
गङ्गां गत्वा यैः शरीरं विसृष्टं गता धीरास्ते विबुधैः समत्वम् ॥
अन्धान् जडान्द्रव्यहीनांश्च गङ्गा यशस्विनी बृहती विश्वरूपा ।
देवैः सेन्द्रैर्मुनिभिर्मानवैश्च निषेविता सर्वकामैर्युनक्ति ॥ २८१
ऊर्जावतीं महापुण्यां मधुमतीं त्रिवर्त्मगाम् ।
त्रिलोकगोप्त्रीं ये गङ्गां संश्रितास्ते दिवं गताः ॥ २८२
यो वत्स्यति द्रक्ष्यति वाऽपि मर्त्यः तस्मै प्रयच्छन्ति सुखानि देवाः।
तद्भाविताः स्पर्शनदर्शनेन इष्टां गतिं तस्य सुरा दिशन्ति ॥
दक्षां पृश्निं बृहतीं विप्रकृष्टां शिवामृद्धां भागिनीं सुप्रसन्नाम् ।
विभावरीं सर्वभूतप्रतिष्ठां गङ्गां गता ये त्रिदिवं गतास्ते ॥ २८४
ख्यातिर्यस्याः खं दिवं गाञ्च नित्यं पुरा दिशो विदिशश्चावतस्थे ।
तस्या जलं सेव्य सरिद्वराया मर्त्याः सर्वे कृतकृत्या भवन्ति ॥
इयं गङ्गेति नियतं प्रतिष्ठा गुहस्य रुक्मस्य च गर्भयोषा ।
प्रातस्त्रिवर्गा घृतवहा विपाप्मा गङ्गाऽवतीर्णा वियतो विश्वतोया ॥

सुताऽवनीध्रस्य हरस्य भार्या

दिवो भुवश्चापि कृताऽनुरूपा ।

भव्या पृथिव्यां भगिनी चापि राजन्

गङ्गा लोकानां पुण्यदा वै त्रयाणाम् ॥ २८७

मधुस्रवा घृतधारा घृतार्चिर्महोर्मिभिः शोभिता ब्राह्मणैश्च ।

दिवश्च्युता शिरसाऽऽत्ता शिवेन गङ्गाऽवनीध्रात्त्रिदिवस्य माता ॥

योनिर्वरिष्ठा विरजा वितन्वी शय्याऽचिरा वारिवहा यशोदा ।

विश्वावती चाकृतिरिष्टसिद्धा गङ्गोक्षितानां भुवनस्य पन्थाः ॥

क्षान्त्या मह्या गोपने धारणे च दीप्त्या कृशानोस्तपनस्य चैव ।

तुल्या गङ्गा सम्मता ब्राह्मणानां गुहस्य ब्रह्मण्यतया च नित्यम् ॥

ऋषिष्टुतां विष्णुपदीं पुराणां सुपुण्यतोयां मनसाऽपि लोके ।

सर्वात्मना जाह्नवीं ये प्रपन्नास्ते ब्रह्मणः सदनं सम्प्रयाताः॥ २९१

लोकानवेक्ष्य जननीव पुत्रान् सर्वात्मना सर्वगुणोपपन्नान् ।

तत्स्थानकं ब्राह्ममभीप्समानैर्गङ्गा सदैवाऽऽत्मवशैरुपास्या ॥ २९२

उस्रां पुष्टां मिषतीं विश्वभोज्यां इरावतीं रेवतीं भूधराणाम् ।

शिष्टाश्रयाममितां ब्रह्मकान्तां गङ्गां श्रयेदात्मवान् सिद्धिकामः ॥

प्रसाद्य देवान् सविभून् समस्तान् भगीरथस्तपसोग्रेण गङ्गाम् ।

गामानयत्तामभिगम्य शश्वत् पुंसां भयं नेह चामुत्र विद्यात् ॥

उदाहृतः सर्वथा ते गुणानां मयैकदेशः प्रसमीक्ष्य बुद्ध्या ।

शक्तिर्न मे काचिदिहास्ति वक्तुं गुणान् सर्वान् परिमातुं तथैव ॥



मेरोः समुद्रस्य च सर्वयत्नैः संख्योपलानामुदकस्य वाऽपि ।

शक्यं वक्तुं नेह गङ्गाजलानां गुणाख्यानं परिमातुं तथैव ॥ २९६

तस्मादेतान् परया श्रद्धयोक्तान् गुणान् सर्वान् जाह्नवीयान् सदैव।

भवेद्वाचा मनसा कर्मणैव भक्त्या युक्तः श्रद्धया श्रद्दधानः ॥

लोकानिमांस्त्रीन् यशसा वितत्य सिद्धिं प्राप्य महतीं तां दुरापाम् ।

गङ्गाकृतानचिरेणैव लोकान् यथेष्टमिष्टान् विहरिष्यसि त्वम् ॥

तव मम च गुणैर्महानुभावा

जुषतु मतिं सततं स्वधर्मयुक्तैः ।

अभिमतजनवत्सला हि गङ्गा

जगति युनक्ति सुखैश्च भक्तिमन्तम् ॥ २९९

इतिपरममतिर्गुणानशेषान् ।

शिलरतये त्रिपथानुयोगरूपान् ।

बहुविधमनुशास्य तथ्यरूपान्

गगनतलं द्युतिमान् विवेश विद्वान् ॥ ३००

शिलवृत्तिस्तु सिद्धस्य वाक्यैः सम्बोधितस्तदा ।

गङ्गामुपास्य विधिवत् सिद्धिं प्राप सुदुर्लभाम् ॥

भारती आनुशासनिकी श्लोकत्रिशती

— समाप्ता —

युधिष्ठिर उवाच—

ब्रूहि सर्प यथाकामं प्रतिवक्ष्यामि ते वचः ।
अपि चेच्छक्नुयां प्रीतिं आहर्तुं ते भुजङ्गम ॥ १
वेद्यश्च ब्राह्मणेनेह तद्भवान्वेत्ति केवलम् ।
सर्पराज ततः श्रुत्वा प्रतिवक्ष्यामि ते वचः ॥ २

सर्प उवाच—

ब्राह्मणः को भवेद्राजन् वेद्यं किश्च युधिष्ठिर ।
ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे ॥ ३

युधिष्ठिर उवाच—

सत्यं दानं क्षमा शीलं आनृशंस्यं तपो घृणा ।
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतिः ॥ ४
वेद्यं सर्प परं ब्रह्म निर्दुःखमसुखं च यत् ।
यत्र गत्वा न शोचन्ति भवतः किं विवक्षितम् ॥ ५

सर्प उवाच—

चातुर्वर्ण्यं प्रमाणं च सत्यं च ब्रह्म चैव हि ।
शूद्रेष्वपि च सत्यं च दानमक्रोध एव च ॥ ६
अनृशंस्यमहिंसा च घृणा चैव युधिष्ठिर ।
वेद्यं यच्चात्र निर्दुःखं असुखं च नराधिप ।
ताभ्यां हीनं पदं चान्यत् न तदस्तीति लक्षये ॥ ७

युधिष्ठिर उवाच—

शूद्रे तु यद्भवेल्लक्ष्म द्विजे तच्च न विद्यते ।



न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥ ८
यत्रैतल्लक्ष्यते सर्प वृत्तं स ब्राह्मणस्स्मृतः ।
यत्रैतन्न भवेत्सर्प तं शूद्रमिति निर्दिशेत् ॥ ९
यत्पुनर्भवता प्रोक्तं न वेद्यं विद्यतीति च ।
ताभ्यां हीनमतोऽन्यत्र पदं नास्तीति चेदपि ॥ १०
एवमेतन्मतं सर्प ताभ्यां हीनं न विद्यते ।
यथा शीतोष्णयोर्मध्यं भवेन्नोष्णं न शीतता ॥ ११
एवं वै सुखदुःखाभ्यां हीनं नास्ति पदं क्वचित् ।
एषा मम मतिस्सर्प यथा वा मन्यते भवान् ॥ १२

सर्प उवाच—

यदि ते वृत्ततो राजन् ब्राह्मणः प्रसमीक्षितः ।
वृथा जातिस्तदायुष्मन् कृतिर्यावन्न विद्यते ॥ १३

युधिष्ठिर उवाच—

जातिरत्र महासर्प मनुष्यत्वे महामते ।
सङ्करात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥ १४
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ।
वाङ्मैथुनमथो जन्म मरणं च समं नृणाम् ॥ १५
इदमार्षं प्रमाणं च ये यजामह इत्यपि ।
तस्माच्छीलं प्रधानेष्टं विदुर्ये तत्त्वदर्शिनः ॥ १६

प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते ।
तदाऽस्य माता सावित्री पिता त्वाचार्य उच्यते ॥ १७

तावच्छूद्रसमो ह्येषः यावद्वेदे न जायते ।
तस्मिन्नेवं मतिद्वैधे मनुः स्वायम्भुवोऽब्रवीत् ॥ १८

कृतकृत्याः पुनर्वर्णा यदि वृत्तं न विद्यते ।
सङ्करस्तत्र नागेन्द्र बलवान्प्रसमीक्षितः ॥ १९

यत्रेदानीं महासर्प संस्कृतं वृत्तमिष्यते ।
तं ब्राह्मणमहं पूर्वं उक्तवान्भुजगोत्तम ॥ २०

भारते वनपर्वणि पतिव्रतोपाख्याने २०५ तमे अध्याये,
कौशिकं प्रति स्त्रियाः साध्व्या वाक्ये
ब्राह्मणस्य लक्षणमेवं उदीरितम् ॥

क्रोधरशत्रुश्शरीरस्थो मनुष्याणां द्विजोत्तम ।
यः क्रोधमोहौ त्यजति तं देवा ब्राह्मणं विदुः ॥ १

यो वदेदिह सत्यानि गुरुं सन्तोषयेत वा ।
हिंसितश्च न हिंसेत तं देवा ब्राह्मणं विदुः ॥ २

जितेन्द्रियो धर्मपरः स्वाध्यायनिरतश्शुचिः ।
कामक्रोधौ वशे यस्य तं देवा ब्राह्मणं विदुः ॥ ३

यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विनः ।
सर्वधर्मेषु चरतातं देवा ब्राह्मणं विदुः ॥ ४



योऽध्यापयेदधीयीत यजेद्वा याजयीत वा ।
दद्याद्वाऽपि यथाशक्ति तं देवा ब्राह्मणं विदुः ॥ ५

ब्रह्मचारी च वेदान्योऽप्यधीयाद्द्विजपुङ्गवः ।
स्वाध्याये चाप्रमत्तो वै तं देवा ब्राह्मणं विदुः ॥

---

THE MODERN PRINTING WORKS, MOUNT ROAD, MADRAS.

## ERRATA.

| Page. | Sloka. | For. | Read. |
|---|---|---|---|
| 121 | 5 | च्योतिश्च | ज्योतिश्च |
| 124 | 30 | पुंरुषंकारेण | पुरुषकारेण |
| " | 32 | पवतोद्भूतः | पवनोद्भूतः |
| 125 | 41 | तद्यो | सद्यो |
| 128 | 71 | पव | एव |
| 131 | 105 | घृष्पैः सुरगणान् वृक्षाः फलैश्चापि तथापितॄनू | पुष्पैः सुरगणान् वृक्षाः फलैश्चापि तथापितॄन् |
| 133 | 126 | तस्मदन्नं | तस्मादन्नं |
| 135 | 144 | न्वन्नं | त्वन्नं |
| 137 | 160 | सन्भवन्ति | सम्भवन्ति |
| 140 | 188 | खादकाथाय | खादकार्थाय |
| " | 190 | यस्माङ्ग्रसति | यस्माद्ग्रसति |
| 141 | 199 | च्वलमाना | ज्वलमाना |
| " | 204 | पुरुषाणि | परुषाणि |
| 143 | 224 | जन्तुर्गङ्ग | जन्तुर्गङ्गां |
| 144 | 235 | २६५ | २३५ |